श्रीवीतरागाय नमः

यति-क्रिया-मंजरी

अर्थात् महाव्रती और अणुव्रतीयों के दैनिक

नैमित्तिक समाचार क्रियाओंका

मूलाचार अनगारधर्मामृत चारित्रसार आचारसार

आदि पुरातन ऋषियों के ग्रंथानुसार

ब्र० सूरजमल जैन शास्त्री

द्वारा संग्रहीत

— :❀○—○❀: —

जिसको

श्री शांतिसागर जैन सिद्धान्त प्रकाशिनी संस्था के

महामन्त्री

गृहविरत ब्रह्मचारी श्रीलाल जैन काव्यतीर्थ ने

मुद्रक-सेठ हीरालालजी पाटणी निवाईवासी के मंत्रित्व में

संस्था के पवित्र प्रेस में छपाकर प्रकाशित किया।

श्रावण वीर निर्वाण संवत् २४८८ अगस्त १९६२

प्रस्तावना

क्रिया-कलाप नामकी पुस्तक पं० पन्नालालजी सोनी सिद्धांत शास्त्री ब्यावर वासी ने प्रकाशित कराई थी। उसमें संस्कृत व प्राकृत की सभी भक्तियां संस्कृत टीका सहित हैं। तथा नित्य नैमित्तिक क्रियाओं में भक्तियोंके करने की विधि अंत में बतलाई है। श्री १०५ आर्यिका ज्ञानमती जी माताजी ने क्रियाओं की विधि के साथ ही साथ भक्ति पाठ का प्रयोग कर दिया है। इसलिये प्रयोग विधि हर एक साधु के लिये करने में सरल हो जाती है। अतएव मैंने इसका संग्रह कर प्रकाशित कराना उत्तम समझ कर इसमें प्रथम ही स्तोत्र संग्रह मिला कर प्रकाशित किया है। सहस्रनाम आदि विशेष २ स्तोत्रों के अनंतर उत्तर भाग में अनगार धर्मामृत के नवम अध्याय के आधार से साधुओं की नित्य नैमित्तिक क्रियाओं का वर्णन है। इसमें प्रथम ही पिछली रात्रि में सो कर उठने के बाद वैरात्रीक स्वाध्याय करे पुनः रात्री प्रतिक्रमण करके रात्रियोग निष्ठापन पूर्वक रात्र्यनुष्ठानकी समाप्ति करे। पुनः जिन मंदिर में जाकर विधिवत् चैत्य पंचगुरु भक्ति पूर्वक देव वंदना अर्थात् सामायिक पुनः गुरुवंदना पुनः पौर्वाह्णिक स्वाध्याय मध्याह्न करके देव गुरु वंदना के नंतर आहार ग्रहण, प्रत्याख्यान ग्रहण आदि करके अपराह्न स्वाध्याय करे पुनः दैवसिक प्रतिक्रमण द्वारा दिवस संबंधी दोषों को दूर कर रात्रियोग ग्रहण पूर्वक दिवस संबंधी अनुष्ठान की समाप्ति करे। पुनः अपराह्णिक देव वन्दना के बाद पूर्व रात्रिक स्वाध्याय करके अल्प निद्रा लेवे इसमें प्रातः सामायिक का काल अनगार धर्मामृत के आधार से सूर्योदय होने से दो घड़ी तक माना है पश्चात् सामायिक के बाद गुरु वंदना होती है तथैव मध्याह्न में भी सामायिक के अनंतर विधिवत कृतिकर्म भक्ति गुरु पूर्वक वंदना होती है तथा सांय को प्रतिक्रमण के अनंतर

गुरु वंदना होती है ऐसे त्रिकाल देववंदना व गुरु वंदना तथा दैवसिक व रात्रिक प्रतिक्रमण तथा दिनमें दो बार तथा रात्रि में दो बार ऐसे चार बार स्वाध्याय करना व रात्रियोग ग्रहण तथा त्याग यह नित्य क्रियायें तथा अष्टम चतुर्दश आदि सम्बंधी नैमित्तिक क्रियायें है व दीक्षा विधि आदि हैं। प्रत्येक क्रियाओं में भक्ति पाठ आया है तो हर एक भक्ति एक २ बार ही आवे इसलिये दूसरी बार नहीं दी गई है तथा ईर्यापथ शुद्धि का दर्शन पाठ भी इसमें न आने से क्रियाओं के अन्त में उसे दे दिया है व चारित्र भक्तिकी आलोचना (अंचलिका) भी क्रियाओं में नहीं आई है अतः पृथक दे दी है तथैव बृहद् समाधि भक्ति कल्याणालोचना प्रायश्चित पाठ भी अन्त में है व प्राकृत भक्ति स्वामी कुन्दकुन्दाचार्यकृत अलग अन्त में है। व देवबन्दना पुरानी जो हर एक हस्त लिखित क्रिया कलापों में पाई जाती है वह जिसकी प्रभाचन्द्राचार्य कृत संस्कृत टीका भी मिलती है वह मूल ज्यों की त्यों देदी है पं० पन्नालालजी ने जो पाठ कुछ अधिक २ समझ कर ईर्यापथ शुद्धि चैत्य पंचगुरुभक्ति मात्र निकाल कर पाठ करके क्रिया कलाप में प्रकाशित कराया है। वह भी ज्यों की त्यों प्रथम रख दी है। दोनों ही देव वंदना विधि का पाठ इस में रख दिया गया है। व देव वंदना तथा सामायिक एक ही है इस प्रकरण में आगम के प्रमाण भी दिये है व सिद्धांत सूत्र के पढने के लिये दिक् शुद्धि आदि विधि भी बतलाई है। इसलिये मुख्यतया यह पुस्तक साधुओं के लिये अर्थात् मुनि, आर्यिका क्षुल्लक, ऐलक, क्षुल्लिकाओं के लिये ही उपयोगी है। साधु संयमी वर्गों को इसके द्वारा आगम कथित काल में आगम विहीत विधि के अनुसार क्रिया करनेमें कुशल होना चाहिये। पाक्षिक प्रतिक्रमण गणधर बलय के करने का विधान है सो गणधर बलय "णमो जिनानं णमो ओहि जिणाणं" आदि ही है परन्तु पं० पन्नालाल जी ने उसको पहले नहीं समझा अतः पूजाशास्त्र से लेकर गणधर

स्तुति "जितान् जितो रात्रो गणान गरिष्ठान्" और मिला दिया था सो यह पाठ अधिक होनेसे इसमें से निकाल दिया है।

निवेदक

ब्र० सूरजमल जैन

दिगम्बर जैनाचार्य शिवसागरजी संघस्थ

द्रव्य सहायकों के नाम

इस ग्रन्थ के प्रकाशन में नीचे लिखे महानुभावों ने सहायता की है अतः धन्यवाद के पात्र हैं:—

६०१) श्री अंगूरी बाई सुपुत्री सेठ जीवन लाल जी जैसवाल अजमेरने आर्यिका की दीक्षा लेते समय दिया।

१००) ब्रह्मचारिणी धूली बाई डेह (राजस्थान)

१०१) रतनी बाई फतेपुर ने क्षुल्लिका की दीक्षा लेते समय दिये

१२०) गुप्त दान

१०१) सेठ सुमेरमल जी चौधरी की धर्मपत्नी अजमेर (राज०)

१००) सेठ गुलाबचंद जी चांदमलजी पांड्या सुजानगढ़

१०१) श्रीमती जी जैन अगरवाल पो० टिकैतनगर

१०१) सुगुनो बाई, धर्मपत्नी गुलाबचंद जी पहाड्या सुजानगढ

१००) श्री मैनाबाई सुपुत्री सेठ भँवरलालजी काला सुजानगढ

१२६) ब्रह्मचारिणी पार्वती बाई सुजानगढ

३३) सेठ महावीर प्रसाद जी मोहन लाल जैन बाराबंकी

२१) सेठ नथ्थीलाल जी जैन जैसवाल अजमेर

१५) माता आदिमति जी के आहार की खुशी में दान

निवेदक

ब्र० श्रीलाल जैन काव्यतीर्थ

महामंत्री—श्री शांतिसागरजैनसिद्धांतप्रकाशिनी संस्था

शांतिवीर नगर, श्रीमहावीरजी (राजस्थान)

यतिक्रियामंजरी पूर्व भागकी पाठ सूची

यति-क्रिया-मंजरी उत्तरार्ध की

विषय सूची

❀ श्रीवीतरागाय नमः ❀

यति-क्रिया-मंजरी

पूर्व भाग

नमस्कार मन्त्र

णमो अरहंताणं, णमो सिद्धाणं, णमो आइरीयाणं
णमो उवज्झायाणं, णमो लोए सव्वसाहूणं ॥ १ ॥

मन्त्रं संसारसारं त्रिजगदनुपमं सर्वपापारिमन्त्रं,
संसारोच्छेदमन्त्रं विषमविषहरं कर्मनिर्मूलमन्त्रम् ।
मन्त्रं सिद्धिप्रदानं शिवसुखजननं केवलज्ञानमन्त्रं ।
मन्त्रं श्रीजैनमन्त्रं जप जप जपितं जन्मनिर्वाणमन्त्रं । २ ।

आकृष्टिं सुरसम्पदां विदधते मुक्तिश्रियो वश्यता-
मुच्चाटं विपदां चतुर्गतिभुवां विद्वेषमात्मैनसाम् ।

स्तम्भं दुर्गमनं प्रति प्रयततो मोहस्य सम्मोहनं,
पायात्पंचनमस्क्रियाक्षरमयी साराधना देवता ॥ ३ ॥
अनन्तानन्तसंसार—सन्ततिच्छेदकारणम् ।
जिनराजपदाम्भोज–स्मरणं शरणं मम ॥ ४ ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष जिनेश्वर ! ॥ ५ ॥
न हि त्राता न हि त्राता न हि त्राता जगत्त्रये ।
वीतरागात्परो देवो न भूतो न भविष्यति ॥ ६ ॥
जिने भक्तिर्जिने भक्तिर्जिने भक्तिर्दिने दिने ।
सदा मेऽस्तु सदा मेऽस्तु सदा मेस्तु भवे भवे ॥ ७ ॥

भूतकालतीर्थंकराः

१ श्रीनिर्वाण २ सागर ३ महासाधु ४ विमलप्रभ ५ श्रीधर ६ सुदत्त ७ अमलप्रभ ८ उद्धर ९ अंगिर १० सन्मति ११ सिंधु १२ कुसुमांजलि १३ शिवगण १४ उत्साह १५ ज्ञानेश्वर १६ परमेश्वर १७ विमलेश्वर १८ यशोधर १९ कृष्णमति २० ज्ञानमति २१ शुद्धमति २२ श्रीभद्र २३ अतिक्रांत २४ शांताश्चेति भूतकाल-सम्बन्धिचतुर्विंशति तीर्थंकरेभ्यो नमो नमः ॥

वर्तमानकालतीर्थंकराः

१ ऋषभ २ अजित ३ शम्भव ४ अभिनन्दन ५ सुमति

६ पद्मप्रभ ७ सुपार्श्व ८ चंद्रप्रभ ९ पुष्पदंत १० शीतल ११ श्रेयान् १२ वासुपूज्य १३ विमल १४ अनंत १५ धर्म १६ शांति १७ कुन्थु १८ अर १९ मल्लि २० मुनि-सुव्रत २१ नमि २२ नेमि २३ पार्श्व २४ वर्द्धमानाश्चेति वर्तमानकालसम्बन्धिचतुर्विंशतितीर्थकरेभ्यो नमो नमः

भविष्यत्कालतीर्थंकराः।

१ श्रीमहापद्म २ सुरदेव ३ सुपार्श्व ४ स्वयंप्रभ ५ सर्वात्मभूत ६ देवपुत्र ७ कुलपुत्र ८ उदंक ९ प्रोष्ठिल १० जयकीर्ति ११ मुनिसुव्रत १२ अर (अमम) १३ निष्पाप १४ निष्कषाय १५ विमल १६ निर्मल १७ चित्रगुप्त १८ समाधिगुप्त १९ स्वयंभू २० अनिवृत्तिक २१ जय २२ विमल २३ देवपाल २४ अनन्तवीर्याश्चेति भविष्यत्काल सम्बन्धिचतुर्विंशतितीर्थंकरेभ्यो नमो नमः॥

विदेहक्षेत्रस्थविंशतितीर्थंकराः

१ सीमंधर २ युग्मधर ३ बाहु ४ सुबाहु ५ सुजात ६ स्वयम्प्रभु ७ वृषभानन ८ अनन्तवीर्य ९ सूरप्रभ १० विशालकीर्ति ११ वज्रधर १२ चंद्रानन १३ भद्रबाहु १४ भुजंगम १५ ईश्वर १६ नेमप्रभ (नमि) १७ वीरषेण १८ महाभद्र १९ देवयश २० अजितवीर्याश्चेति विदेहक्षेत्रस्थ विंशतितीर्थकरेभ्यो नमो नमः॥

बृहत्स्वयंभूस्तोत्र

स्वयम्भुवा भूतहितेन भूतले समञ्जसज्ञानविभूतिचक्षुषा विराजितं येन विधुन्वता तमः क्षपाकरेणेव गुणोत्करैः करैः ।१। प्रजापतिर्यःप्रथमं जिजीविषूः शशास कृष्यादिषु कर्मसु प्रजाः। प्रबुद्धतत्त्वः पुनरद्भुतोदयो ममत्वतो निर्विविदे विदांवरः २ विहाय यः सागरवारिवाससं वधूमिवेमां वसुधावधूं सतीम् । मुमुक्षुरिक्ष्वाकुकुलादिरात्मवान् प्रभुः प्रवव्राज सहिष्णुरच्युतः ॥३॥ स्वदोषमूलं स्वसमाधितेजसा निनाय यो निर्दयभस्मसात्क्रियाम् । जगाद तत्त्वं जगतेऽर्थिनेऽञ्जसा बभूव च ब्रह्मपदामृतेश्वरः ॥४॥ स विश्वचक्षुर्वृषभोऽर्चितः सतां समग्रविद्यात्मवपुर्निरंजनः । पुनातु चेतो मम नाभिनन्दनो जिनो जितक्षुल्लकवादिशासनः ५

इत्यादिजिनस्तोत्रम् ॥१॥

यस्य प्रभावात्त्रिदिवच्युतस्य क्रीडास्वपि क्षीवमुखारविन्दः अजेयशक्तिर्भुवि बन्धुवर्गश्चकार नामाजित इत्यवन्ध्यम् ६ अद्यापि यस्याजितशासनस्य सतां प्रणेतुः प्रतिमङ्गलार्थम् । प्रगृह्यते नाम परं पवित्रं स्वसिद्धिकामेन जनेन लोके ।७। यः प्रादुरासीत्प्रभुशक्तिभूम्ना भव्याशयालीनकलङ्कशान्त्यै महामुनिर्मुक्तघनोपदेहो यथारविन्दाभ्युदयाय भास्वान् ८ येन प्रणीतं पृथुधर्मतीर्थं ज्येष्ठं जनाः प्राप्य जयन्ति दुःखम्

गाङ्गं ह्रदं चन्दनपङ्कशीतं गजप्रवेका इव धर्मतप्ताः ॥ ९ ॥

स ब्रह्मनिष्ठः सममित्रशत्रुर्विद्याविनिर्वान्तकषायदोषः । लब्धात्मलक्ष्मीरजितोऽजितात्मा जिनः श्रियं मे भगवान् विधत्ताम् ॥ १० ।

इत्यजितजिनस्तोत्रम् ॥२॥

त्वं शम्भवः संभवतर्षरोगैः संतप्यमानस्य जनस्य लोके । आसीरिहाकस्मिक एव वैद्यो वैद्यो यथा नाथ रुजां प्रशान्त्यै अनित्यमत्राणमहंक्रियाभिः प्रसक्तमिथ्याध्यवसायदोषम् । इदं जगज्जन्मजरान्तकार्त्तं निरञ्जनां शान्तिमजीगमस्त्वम् शतह्रदोन्मेषचलं हि सौख्यं तृष्णामयाप्यायनमात्रहेतुः । तृष्णाभिवृद्धिश्च तपत्यजस्रं तापस्तदायासयतीत्यवादीः १३ बंधश्च मोक्षश्च तयोश्च हेतुर्बद्धश्च मुक्तश्च फलं च मुक्तेः स्याद्वादिनो नाथ तवैव युक्तं नैकान्तदृष्टेस्त्वमतोऽसि शास्ता ॥१४॥ शक्रोऽप्यशक्तस्तव पुण्यकीर्त्तेः स्तुत्यां प्रवृत्तः किमु मादृशोऽज्ञः । तथापि भक्त्या स्तुतपादपद्मो ममार्य देयाः शिवतातिमुच्चैः ॥१५॥

इति शंभवजिनस्तोत्रम् ॥३॥

गुणाभिनन्दादभिनन्दनो भवान् दयावधूं क्षान्तिसखीम–शिश्रियत् । समाधितन्त्रस्तदुपोपपत्तये द्वयेन नैर्ग्रन्थ्यगुणेन चायुजत् ॥ १६ ॥ अचेतने तत्कृतबन्धजेऽपि ममेदमित्या–

भिनिवेशकग्रहात् । प्रभङ्गुरेस्थावरनिश्चयेन च क्षतं जगत्त-
त्त्वमजिग्रहद्भवान् ॥१७॥ क्षुदादिदुःखप्रतिकारतः स्थितिर्न
चेन्द्रियार्थप्रभवाल्पसौख्यतः । ततो गुणो नास्ति च देह-
देहिनोरितीदमित्थं भगवान् व्यजिज्ञपत् ॥ १८ । जनोऽ-
तिलोलोऽप्यनुबन्धदोषतो भयादकार्येष्विह न प्रवर्त्तते ।
इहाप्यमुत्राप्यनुबन्धदोषवित्कथं सुखे संसजतीति चाब्रवीत्
॥ १९ ॥ स चानुबन्धोऽस्य जनस्य तापकृत्तृषोभिवृद्धिः
सुखतो न च स्थितिः । इति प्रभो ! लोकहितं यतो मतं ततो
भवानेव गतिः सतां मतः ॥ २० ॥

इत्यभिनन्दनजिनस्तोत्रम् ॥ ४ ॥

अन्वर्थसंज्ञः सुमतिर्मुनिस्त्वं स्वयं मतं येन सुयुक्तिनीतम् ।
यतश्च शेषेषु मतेषु नास्ति सर्वक्रियाकारकतत्त्वसिद्धिः २१
अनेकमेकं च तदेव तत्त्वं भेदान्वयज्ञानमिदं हि सत्यम् ।
मृषोपचारोऽन्यतरस्य लोपे तच्छेषलोपोऽपि ततोऽनुपाख्यं ॥
सतः कथंचित्तदसत्त्वशक्तिः खे नास्ति पुष्पं तरुषु प्रसिद्धम्
सर्वस्वभावच्युतमप्रमाणं स्ववाग्विरुद्धं तव दृष्टितोऽन्यत् ॥
न सर्वथानित्यमुदेत्यपैति न च क्रियाकारकमत्र युक्तम् ।
नैवासतो जन्म सतो न नाशो दीपस्तमःपुद्गलभावतोऽस्ति
विधिर्निषेधश्च कथंचिदिष्टौ विवक्षया मुख्यगुणव्यवस्था ।
इति प्रणीतिः सुमतेस्तवेयं मतिप्रवेकः स्तुवतोऽस्तु नाथ ।२५।

इति सुमतिजिनस्तोत्रम् ॥ ५ ॥

पद्मप्रभः पद्मपलाशलेश्यः पद्मालयालिङ्गितचारुमूर्तिः ।
बभौ भवान् भव्यपयोरुहाणां पद्माकराणामिव पद्मबन्धुः ॥
बभार पद्मां च सरस्वतीं च भवान्पुरस्तात्प्रतिमुक्तिलक्ष्म्याः
सरस्वतीमेव समग्रशोभां सर्वज्ञलक्ष्मीं ज्वलितां विमुक्तः ॥
शरीररश्मिप्रसरः प्रभोस्ते बालार्करश्मिच्छविरालिलेप ।
नरामराकीर्णसभां प्रभावच्छैलस्य पद्माभमणेः स्वसानुम् ॥
नभस्तलं पल्लवयन्निव त्वं सहस्रपत्राम्बुजगर्भचारैः ।
पादाम्बुजैः पातितमोहदर्पो भूमौ प्रजानां विजहर्थ भूत्यै ॥
गुणाम्बुधेर्विप्रुषमप्यजस्रं नाखण्डलः स्तोतुमलं तवर्षेः ।
प्रागेव मादृक्किमुतातिभक्तिर्मां बालमालापयतीदमित्थम् ॥

इति पद्मप्रभस्तोत्रम् ॥६॥

स्वास्थ्यं यदात्यन्तिकमेष पुंसां स्वार्थो न भोगः परिभंगुरात्मा । तृषोऽनुषङ्गान्न च तापशांतिरितीदमाख्यद्भगवान् सुपार्श्वः ॥ ३१ ॥ अजङ्गमं जङ्गमनेययन्त्रं यथा तथा जीवधृतं शरीरम् । बीभत्सु पूति क्षयि तापकं च स्नेहो वृथात्रेति हितं त्वमाख्यः ।३२। अलंघ्यशक्तिर्भवितव्यतेयं हेतुद्वयाविष्कृतकार्यलिङ्गा । अनीश्वरो जन्तुरहंक्रियार्त्तः संहत्य कार्येष्विति साध्ववादीः ।३३। बिभेति मृत्योर्न ततोऽस्ति मोक्षो नित्यं शिवं वांछति नास्य लाभः । तथापि बालो भयकामवश्यो वृथा स्वयं तप्यत इत्यवादीः ॥३४॥ सर्वस्य तत्त्वस्य भवान् प्रमाता मातेव बालस्य हितानु–

शास्ता । गुणावलोकस्य जनस्य नेता मयापि भक्त्या
परिणूयसेऽद्य ॥३५॥

इति सुपार्श्वजिनस्तोत्रम् ॥७॥

चन्द्रप्रभं चन्द्रमरीचिगौरं चन्द्रं द्वितीयं जगतीव कान्तम् ।
वन्देऽभिवन्द्यं महतामृषीन्द्रं जिनं जितस्वान्तकषायबन्धम्
यस्याङ्गलक्ष्मीपरिवेषभिन्नं तमस्तमोरेरिव रश्मिभिन्नम् ।
ननाश बाह्यं बहुमानसं च ध्यानप्रदीपातिशयेन भिन्नम् ॥
स्वपक्षसौस्थित्यमदावलिप्ता वाक्सिंहनादैर्विमदा बभूवुः ।
प्रवादिनो यस्य मदार्द्रगण्डा गजा यथा केशरिणो निनादैः
यः सर्वलोके परमेष्ठितायाः पदं बभूवाद्भुतकर्मतेजाः ।
अनन्तधामाक्षरविश्वचक्षुः समन्तदुःखक्षयशासनश्च ॥३९॥
स चन्द्रमा भव्यकुमुद्वतीनां विपन्नदोषाभ्रकलङ्कलेपः ।
व्याकोशवाङ्न्यायमयूखमालः पूयात् पवित्रो भगवान्मनो मे

इति चन्द्रप्रभजिनस्तोत्रम् ॥८॥

एकान्तदृष्टिप्रतिषेधि तत्त्वं प्रमाणसिद्धं तदतत्स्वभावम् ।
त्वया प्रणीतं सुविधे ! स्वधाम्ना नैतत्समालीढपदं त्वदन्यैः
तदेव च स्यान्न तदेव च स्यात्तथा प्रतीतेस्तव तत्कथंचित्
नात्यन्तमन्यत्वमनन्यता च विधेर्निषेधस्य च शून्यदोषात् ।
नित्यं तदेवेदमिति प्रतीतेन नित्यमन्यत्प्रतिपत्तिसिद्धेः ।
न तद्विरुद्धं बहिरन्तरङ्गनिमित्तनैमित्तिकयोगतस्ते ॥४३॥
अनेकमेकं च पदस्य वाच्यं वृक्षा इति प्रत्ययवत्प्रकृत्या

आकांक्षिणः स्यादिति वै निपातो गुणानपेक्षे नियमेऽपवादः
गुणप्रधानार्थमिदं हि वाक्यं जिनस्य ते तद्द्विषतामपथ्यम्
ततोऽभिवन्द्यं जगदीश्वराणां ममापि साधोस्तव पादपद्मम्

इति सुविधिजिनस्तोत्रम् । ९ ।

न शीतलाश्चन्दनचन्द्ररश्मयो न गाङ्गमम्भो न च हारय-
ष्टयः । यथा मुनेस्तेऽनघवाक्यरश्मयःशमाम्बुगर्भाःशिशि-
रा विपश्चितां ॥ सुखाभिलाषानलदाहमूर्च्छितं मनो निजं
ज्ञानमयामृताम्बुभिः । विदिध्यपस्त्व विषदाहमोहितं यथा
भिषग्मन्त्रगुणैःस्वविग्रहं ॥ स्वजीविते कामसुखे च तृष्णया
दिवा श्रमार्त्ता निशि शेरते प्रजाः । त्वमार्य्य नक्तंदिव-
मप्रमत्तवानजागरेवात्मविशुद्धवर्त्मनि ॥ ८ ॥ अपत्यवित्तोत्त-
रलोकतृष्णया तपस्विनः केचन कर्म कुर्वते । भवान्पुनर्ज-
न्मजराजिहासया त्रयीं प्रवृत्तिं शमधीरवारुणत् ॥ ४९ ॥
त्वमुत्तमज्योतिरजः क्व निर्वृतः क्व ते परे बुद्धिलवोद्धवक्षताः
ततः स्वनिश्रेयसभावनापरैर्बुधप्रवेकैर्जिनशीतलेड्यसे ५०

इति शीतलजिनस्तोत्रम् । १० ।

श्रेयान् जिनः श्रेयसि वर्त्मनीमाः श्रेयःप्रजाःशासदजेयवाक्यं
भवांश्चकासे भुवनत्रयेऽस्मिन्नेको यथा वीतघनो विव-
स्वान् ५१ विधिर्विषक्तप्रतिषेधरूपः प्रमाणमत्रान्यतरत्प्र-
धानम् । गुणो परो मुख्यनियामहेतुर्नयः सदृष्टांतसमर्थनस्ते

विवक्षितो मुख्य इतीष्यतेऽन्यो गुणो विवक्षो न निरात्म-कस्ते । तथारिमित्रानुभयादिशक्तिर्द्वयावधिः कार्यकरं हि वस्तु ॥ दृष्टांतसिद्धावुभयोर्विवादे साध्यं प्रसिद्ध्येन्न तु तादृगस्ति । यत्सर्वथैकान्तनियामदृष्टं त्वदीयदृष्टिर्विभव-त्यशेषे ॥ ५४ ॥ एकान्तदृष्टिप्रतिषेधसिद्धिर्न्यायेषुभिर्मो-हरिपुं निरस्य । असि स्म कैवल्यविभूतिसम्राट् ततस्त्व-मर्हन्नसि मे स्तवार्हः ॥५५ ॥

इति श्रेयोजिनस्तोत्रम् ॥ ११ ॥

शिवासु पूज्योऽभ्युदयक्रियासु त्वं वासुपूज्यस्त्रिदशेन्द्रपूज्यः मयापि पूज्योऽल्पधिया मुनीन्द्र दीपार्चिषा किं तपनो न पूज्यः न पूजयार्थस्त्वयि वीतरागे न निन्दया नाथ विवान्तवैरे । तथापि ते पुण्यगुणस्मृतिर्नः पुनातु चित्तं दुरिताञ्जनेभ्यः ॥ पूज्यं जिनं त्वार्चयतो जनस्य सावद्यलेशो बहुपुण्यराशौ । दोषाय नालं कणिका विषस्य न दूषिका शीतशिवाम्बुराशौ यद्वस्तु बाह्यं गुणदोषसूतेर्निमित्तमभ्यन्तरमूलहेतोः । अध्यात्मवृत्तस्य तदङ्गभूतमभ्यन्तरं केवलमप्यलं ते ॥ ५६ ॥ बाह्येतरोपाधिसमग्रतेयं कार्येषु ते द्रव्यगतः स्वभावः । नैवान्यथामोक्षविधिश्च पुंसां तेनाभिवन्द्यस्त्वमृषिर्बुधानाम्

इति वासुपूज्यजिनस्तोत्रम् ॥ १२ ॥

य एव नित्यक्षणिकादयोनयामिथोऽनपेक्षाः स्वपरप्रणाशिनः त एव तत्त्वं विमलस्य ते मुनेः परस्परेक्षाः स्वपरोपकारिणः ।

यथैकशः कारकमर्थसिद्धये समीक्ष्य शेषं स्वसहायकारकम्
तथैव सामान्यविशेषमातृका नयास्तवेष्टा गुणमुख्यकल्पतः
परस्परेक्षान्वयभेदलिङ्गतः प्रसिद्ध सामान्यविशेषयोस्तव ।
समग्रतास्ति स्वपरावभासकं यथा प्रमाणं भुवि बुद्धिलक्षणम्
विशेषवाच्यस्य विशेषणं वचो यतो विशेष्यं विनियम्यते
च यत् । तयोश्च सामान्यमतिप्रसज्यते विवक्षितात्स्या-
दिति तेऽन्यवर्जनम् ॥ ६४ ॥ नयास्तव स्यात्पदसत्यलांछिता
रसोपविद्धा इव लोहधातवः । भवन्त्यभिप्रेतगुणा यतस्ततो
भवन्तमार्याः प्रणता हितैषिणः ॥ ६५ ॥

इति विमलजिनस्तोत्रम् ॥ १३ ॥

अनन्तदोषाशयविग्रहो ग्रहो विषङ्गवान्मोहमयश्चिरं हृदि ।
यतो जितस्तत्त्वरुचौ प्रसीदता त्वया ततोभूर्भगवानन-
न्तजित् ६६ कषायनाम्नां द्विषतां प्रमाथिनामशेषयन् नाम
भवानशेषवित् । विशोषणं मन्मथदुर्मदामयं समाधिभैष-
ज्यगुणैर्व्यलीनयत् ।। परिश्रमाम्बुर्भयवीचिमालिनी त्वया
स्वतृष्णासरिदार्य शोषिता । असंगघर्मार्कगभस्तितेजसा
परं ततो निर्वृतिधाम तावकम् ।। सुहृत्त्वयि श्री सुभगत्व-
मश्नुते द्विषंस्त्वयि प्रत्ययवत्प्रलीयते । भवानुदासीनत-
मस्तयोरपि प्रभो परं चित्रमिदं तवेहितम् ६९ ।। त्वमीदृश-
स्तादृश इत्ययं मम प्रलापलेशोऽल्पमतेर्महामुने । अशेष-
माहात्म्यमनीरयन्नपि शिवाय संस्पर्श इवामृताम्बुधेः ॥

इत्यनन्तजिनस्तोत्रम् ॥ १४ ॥

धर्मतीर्थमनघं प्रवर्त्तयन् धर्म इत्यनुमतः सतां भवान् ।
कर्मकत्तमदहत्तपोऽग्निभिः शर्म शाश्वतमवाप शङ्करः ॥७१।
देवमानवनिकायसत्तमै रेजिषे परिवृतो वृतो बुधैः ।
तारकापरिवृतोऽतिपुष्कलो व्योमनीव शशलांछनोऽमलः ॥
प्रातिहार्यविभवैः परिष्कृतो देहतोऽपि विरतो भवानभूत् ।
मोक्षमार्गमशिषन्नरामरान्नपि शासनफलैषणातुरः ॥७३ ॥
कायवाक्यमनसां प्रवृत्तयो नाऽभवंस्तव मुनेश्चिकीर्षया ।
नासमीक्ष्य भवतः प्रवृत्तयो धीर तावकमचिन्त्यमीहितम् ॥
मानुषीं प्रकृतिमभ्यतीतवान् देवतास्वपि च देवता यतः
तेन नाथ परमासि देवता श्रेयसे जिनवृष प्रसीद नः ।७५ ॥

इति धर्मजिनस्तोत्रम् ॥ १५ ॥

विधाय रक्षां परतः प्रजानां राजा चिरं यो ऽप्रतिमप्रतापः । व्यधात्पुरस्तात्स्वत एव शान्तिर्मुनिर्दयामूर्त्तिरिवाघशान्तिम् ॥ चक्रेण यः शत्रुभयंकरेण जित्वा नृपः सर्वनरेन्द्रचक्रम् । समाधिचक्रेण पुनर्जिगाय महोदयो दुर्जयमोहचक्रम् ॥ ७७ ॥ राजश्रिया राजसु राजसिंहो रराज यो राजसु भोगतन्त्रः । आर्हन्त्यलक्ष्म्या पुनरात्मतन्त्रो देवासुरोदारसभे रराज ॥ ७८ ॥ यस्मिन्नभूद्राजनि राजचक्रं मुनौ दयादीधितिधर्मचक्रम् । पूज्ये मुहुः प्राञ्जलि देवचक्रं,

ध्यानोन्मुखे ध्वंसि कृतान्तचक्रम् । स्वदोषशान्त्या विहि-
तात्मशान्तिः शान्तेर्विधाता शरणं गतानाम् । भूयाद्भव-
क्लेशभयोपशान्त्यै शान्तिर्जिनो मे भगवान् शरण्यः ८०

इति शान्तिजिनस्तोत्रम् ॥ १६ ॥

कुन्थुप्रभृत्यखिलसत्त्वदयैकतानः,
कुन्थुर्जिनो ज्वरजरामरणोपशान्त्यै ।
त्वं धर्मचक्रमिह वर्त्तयसि स्म भूत्यै,
भूत्वा पुरा क्षितिपतीश्वरचक्रपाणिः ॥ ८१ ॥
तृष्णार्चिषः परिदहन्ति न शान्तिरासा-
-मिष्टेन्द्रियार्थविभवैः परिवृद्धिरेव ।
स्थित्यैव कायपरितापहरं निमित्त-
मित्यात्मवान्विषयसौख्यपराङ्मुखोऽभूत् ॥ ८२ ॥
बाह्यं तपः परमदुश्चरमाचरंस्त्व-
माध्यात्मिकस्य तपसः परिबृंहणार्थम् ।
ध्यानं निरस्य कलुषद्वयमुत्तरेऽस्मिन्
ध्यानद्वये ववृतिषेऽतिशयोपपन्ने ॥ ८३ ॥
हुत्वा स्वकर्मकटुकप्रकृतीश्चतस्रो
रत्नत्रयातिशयतेजसि जातवीर्य्यः ।
विभ्राजिषे सकलवेदविधेर्विनेता
व्यभ्रे यथा वियति दीप्तरुचिर्विवस्वान् ॥ ८४ ॥

यस्मान्मुनीन्द्र तव लोकपितामहाद्या
विद्याविभूतिकणिकामपि नाप्नुवन्ति ।
तस्माद्भवन्तमजमप्रतिमेयमार्याः
स्तुत्यं स्तुवन्ति सुधियः स्वहितैकतानाः ॥ ८५ ॥

इति कुन्थुजिनस्तोत्रम् ॥ १७ ॥

गुणस्तोकं सदुल्लंघ्य तद्बहुत्वकथा स्तुतिः ।
आनन्त्यात्ते गुणा वक्तुमशक्यास्त्वयि सा कथम् ॥ ८६ ॥
तथापि ते मुनीन्द्रस्य यतो नामापि कीर्तितम् ।
पुनाति पुण्यकीर्तेर्नस्ततो ब्रूयाम किंचन ॥ ८७ ॥
लक्ष्मीविभवसर्वस्वं मुमुक्षोश्चक्रलांछनम् ।
साम्राज्यं सार्वभौमं ते जरत्तृणमिवाभवत् ॥ ८८ ॥
तव रूपस्य सौन्दर्यं दृष्ट्वा तृप्तिमनापिवान् ।
द्व्यक्षः शक्रः सहस्राक्षो बभूव बहुविस्मयः ॥ ८९ ॥
मोहरूपो रिपुः पापः कषायभटसाधनः ।
दृष्टिसम्पदुपेक्षास्त्रैस्त्वया धीर पराजितः ॥ ९० ॥
कन्दर्पस्योद्धरो दर्पस्त्रैलोक्यविजयार्जितः ।
ह्रेपयामास तं धीरे त्वयि प्रतिहतोदयः ॥ ९१ ॥
आयत्यां च तदात्वे च दुःखयोनिर्निरुत्तरा ।
तृष्णानदी त्वयोत्तीर्णा विद्यानावा विविक्तया ॥ ९२ ॥
अन्तकः क्रन्दको नृणां जन्मज्वरसखा सदा ।

त्वामनतिकान्तकं प्राप्य व्यावृत्तः कामकारतः ॥ ९३ ॥
भूषावेषायुधत्यागि विद्यादमदयापरम् ।
रूपमेव तवाचष्टे धीर दोषविनिग्रहम् ॥ ९४ ॥
समन्ततोऽङ्गभासां ते परिवेषेण भूयसा ।
तमो बाह्यमपाकीर्णमध्यात्मध्याननेजसा ॥ ९५ ॥
सर्वज्ञज्योतिषोद्भूस्तावको महिमोदयः ।
कं न कुर्यात् प्रणम्रं ते सत्त्वं नाथ सचेतनम् ॥ ९६ ॥
तव वागमृतं श्रीमत्सर्वभाषास्वभावकम् ।
प्रीणयत्यमृतं यद्वत् प्राणिनो व्यापि संसदि ॥ ९७ ॥
अनेकान्तात्मदृष्टिस्ते सती शून्यो विपर्ययः ।
ततः सर्वं मृषोक्तं स्यात्तदयुक्तं स्वघाततः ॥ ९८ ॥
ये परस्खलितोन्निद्राः स्वदोषेभनिमीलिनः ।
तपस्विनस्ते किं कुर्युरपात्रं त्वन्मतश्रियः ॥ ९९ ॥
ते तं स्वघातिनं दोषं शमीकर्त्तुमनीश्वराः ।
त्वद्द्विषः स्वहनो बालास्तत्त्वावक्तव्यतां श्रिताः ॥१००॥
सदेकनित्यवक्तव्यास्तद्विपक्षाश्च ये नयाः ।
सर्वथेति प्रदुष्यन्ति पुष्यन्ति स्यादितीहिते ॥ १०१ ॥
सर्वथा नियमत्यागी यथादृष्टमपेक्षकः ।
स्याच्छब्दस्तावके न्याये नान्येषामात्मविद्विषाम् ॥१०२॥
अनेकान्तोऽप्यनेकान्तः प्रमाणनयसाधनः ।
अनेकान्तः प्रमाणात्ते तदेकान्तोऽर्पितान्नयात् ॥ १०३ ॥

इति निरुपमयुक्तिशासनः प्रियहितयोगगुणानुशासनः ।
अरजिनदमतीर्थनायकस्त्वमिव सतां प्रतिबोधनायकः
मतिगुणविभवानुरूपतस्त्वयि वरदागमदृष्टिरूपतः ।
गुणकृशमपि किंचनोदितं मम भवताद् दुरिताशनोदितम्

इत्यरजिनस्तोत्रम् ॥ १८ ॥

यस्य महर्षेः सकलपदार्थप्रत्यवबोधः समजनि साक्षात् ।
सामरमर्त्यं जगदपि सर्वं प्राञ्जलिभूत्वा प्रणिपततिस्म ॥
यस्य च मूर्तिः कनकमयीव स्वस्फुरदाभाकृतपरिवेषा ॥
वागपि तत्त्वं कथयितुकामा स्यात्पदपूर्वा रमयति साधून् ।
यस्य पुरस्ताद्विगलितमाना न प्रतितीर्थ्या भुवि विवदन्ते
भूरपि रम्या प्रतिपदमासीज्जातविकोशाम्बुजमृदुहासा ॥
यस्य समन्ताज्जिनशिशिरांशोः शिष्यकसाधुग्रहविभवोभूत् ।
तीर्थमपि स्वं जननसमुद्रत्रासितसत्त्वोत्तरणपथोऽग्रम् ।
यस्य च शुक्लं परमतपोऽग्निर्ध्यानमनन्तं दुरितमधाक्षीत्
तं जिनसिंहं कृतकरणीयं मल्लिमशल्यं शरणमितोऽस्मि ।

इति मल्लिजिनस्तोत्रम् ॥ १६ ॥

अधिगतमुनिसुव्रतस्थितिर्मुनिवृषभो मुनिसुव्रतोऽनघः ।
मुनिपरिषदि निर्बभौ भवानुडुपरिषत्परिवीतसोमवत् ॥ १११
परिणतशिखिकण्ठरागया कृतमदनिग्रहविग्रहाभया ।
तव जिन तपसः प्रसूतया ग्रहपरिवेषरुचेव शोभितम् ॥
शशिरुचिशुचिशुक्तलोहितं सुरभितरं विरजो निजं वपुः ।

तव शिवमतिविस्मयं यते यदपि च वाङ्मनसोऽयमीहितम्।।
स्थितिजननिरोधलक्षणं चरमचरं च जगत्प्रतिक्षणम्
इति जिन सकलज्ञलाञ्छनं वचनमिदं वदतां वरस्य ते ।
दुरितमलकलंकमष्टकं निरुपमयोगबलेन निर्दहन् ।
अभवदभवसौख्यवान् भवान् भवतु ममापि भवोपशांतये ।

इति मुनिसुव्रतजिनस्तोत्रम् ।। २० ।।

स्तुतिः स्तोतुः साधोः कुशलपरिणामाय स तदा,
भवेन्मा वा स्तुत्यः फलमपि ततस्तस्य च सतः ।
किमेवं स्वाधीनाज्जगति सुलभे श्रायसपथे,
स्तुयान्न त्वा विद्वान्सततमपि पूज्य नमिजिनम् ।।
त्वया धीमन् ब्रह्मप्रणिधिमनसा जन्मनिगलं,
समूलं निर्भिन्नं त्वमसि विदुषां मोक्षपदवी ।
त्वयि ज्ञानज्योतिर्विभवकिरणैर्भाति भगवन्
अभूवन् खद्योता इव शुचिरवावन्यमतयः ।। ११७ ।।
विधेयं वार्यं चानुभयमुभयं मिश्रमपि तत्,
विशेषैः प्रत्येकं नियमविषयैश्चापरिमितैः ।
सदाऽन्योन्यापेक्षैः सकलभुवनज्येष्ठगुरुणा,
त्वया गीतं तत्त्वं बहुनयविवक्षेतरवशात् ।। ११८ ।।
अहिंसा भूतानां जगति विदितं ब्रह्म परमं,
न सा तत्रारम्भोऽस्त्यणुरपि च यत्राश्रमविधौ ।
ततस्तत्सिद्ध्यर्थं परमकरुणो ग्रन्थमुभयं,

भवानेवात्याक्षीन्न च विकृतवेषोपधिरतः ॥११६॥
वपुर्भूषावेषव्यवधिरहितं शान्तिकरणं,
गतस्ते संचष्टे स्मरशरविषातंकविजयम् ।
विना भीमैः शस्त्रैरदयहृदयामर्षविलयं,
ततस्त्वं निर्मोहः शरणमसि नः शान्तिनिलयः ।
इति नमिजिन स्तोत्रम् ॥ २१ ॥
भगवानृषिः परमयोगदहनहुतकल्मषेन्धनः ।
ज्ञानविपुलकिरणैः सकलं प्रतिबुद्ध्य बुद्धकमलायतेक्षणः ॥
हरिवंशकेतुरनवद्यविनयदमतीर्थनायकः ।
शीलजलधिरभवो विभवस्त्वमरिष्टनेमिर्जिनकुञ्जरोऽजरः ॥
त्रिदशेन्द्रमौलिमणिरत्नकिरणविसरोपचुम्बिनम् ।
पादयुगलममलं भवतो विकसितकुशेशयदलारुणोदरम् ॥
नखचन्द्ररश्मिकवचातिरुचिरशिखराङ्गुलिस्थलम् ।
स्वार्थनियतमनसः सुधियः प्रणमन्ति मन्त्रमुखरा महर्षयः॥
द्युतिमद्रथाङ्गरविबिम्बकिरणजटिलांशुमण्डलः ।
नीलजलजदलराशिवपुः सह बन्धुभिर्गरुडकेतुरीश्वरः ॥
हलभृच्च ते स्वजनभक्तिमुदितहृदयौ जनेश्वरौ ।
धर्मविनयरसिकौ सुतरां चरणारविन्दयुगलं प्रणेमतुः ॥
ककुदं भुवः खचरयोषिदुषितशिखरैरलंकृतः ।
मेघपटलपरिवीततटस्तव लक्षणानि लिखितानि वज्रिणा ॥
वहतीति तीर्थमृषिभिश्च सततमभिगम्यतेऽद्य च ।

प्रीतिविततहृदयैः परितो भृशमूर्ज्जयन्त इति विश्रुतोऽचलः
बहिरन्तरप्युभयथा च करणमविघाति नार्थकृत् ।
नाथ युगपदखिलं च सदा त्वमिदं तलामलकवद्विवेदिथ ॥
अत एव ते बुधनुतस्य चरितगुणमद्भुतोदयम् ।
न्यायविहितमवधार्य जिने त्वयि सुप्रसन्नमनसः स्थिता वयं

इत्यरिष्टनेमिजिनस्तोत्रम् ॥ २२॥

तमालनीलैः सधनुस्तडिद्गुणैः प्रकीर्णभीमाशनिवायुवृष्टिभि
र्बलाहकैर्वैरिवशैरुपद्रुतो महामना यो न चचाल योगतः ।
बृहत्फणामंडलमण्डपेन यं स्फुरत्तडित्पिङ्गरुचोपसर्गिणम् ।
जुगूह नागो धरणो धराधरं विरागसन्ध्यातडिदम्बुदो यथा
स्वयोगनिस्त्रिंशनिशातधारया निशात्य यो दुर्जयमोहविद्विषं
अवापदार्हन्त्यमचिन्त्यमद्भुतं त्रिलोकपूजातिशयास्पदं पदम्
यमीश्वरं वीक्ष्य विधूतकल्मषं तपोधनास्तेऽपि तथा बुभूषवः
वनौकसः स्वश्रमबन्ध्यबुद्धयः शमोपदेशं शरणं प्रपेदिरे ॥
स सत्यविद्यातपसां प्रणायकः समग्रधीरुग्रकुलाम्बरांशुमान्
मया सदा पार्श्वजिनःप्रणम्यते विलीनमिथ्यापथदृष्टिविभ्रमः

इति पार्श्वजिनस्तोत्रम् ॥ २३ ॥

कीर्त्या भुवि भासि तया वीर त्वं गुणसमुच्छ्रया भासितया
भासोडुसभासितया सोम इव व्योम्नि कुन्दशोभासितया
तव जिन शासनविभवो जयति कलावपि गुणानुशासन-

विभवः । दोषकशामनविभवः स्तुवंति चैनं प्रभाकृ-शासन विभवः ॥ १३७ ॥ अनवद्यः स्याद्वादस्तव दृष्टेष्टाविरोधतः स्याद्वादः । इतरो न स्याद्वादो सद्वितयविरोधान्मुनीश्वराऽस्याद्वादः ॥ १३८ ॥ त्वमसि सुरासुरमहितो ग्रन्थिकसत्त्वाशयप्रणामामहितः । लोकत्रयपरमहितोऽनावरणज्योतिरुज्ज्वलद्धामहितः ॥ १३९ ॥ सभ्यानामभिरुचितं दधासि गुणभूषणं श्रिया चारुचितम् । मग्नं स्वस्यां रुचिरं जयसि च मृगलाञ्छनं स्वकान्त्या रुचितम् ।१४०। त्वं जिन गतमदमायस्तव भावानां मुमुक्षुकामदमायः । श्रेयान् श्रीमदमायस्त्वया समादेशि सप्रयामदमायः १४१ गिरभित्त्यवदानवतः श्रीमत इव दन्तिनः स्रवदानवतः तव शमवद्दानवतो गतमूर्जितमपगतप्रमादानवतः १४२ बहुगुणसंपदमकलं परमतमपि मधुरवचनविन्यासकलम् । नयभक्त्यवतंसकलं तव देव मतं समन्तभद्रं सकलम्

इति वीरजिनस्तोत्रम् ॥ २४॥

यो निःशेषजिनोक्तधर्मविषयः श्रीगौतमाद्यैः कृतः,
सूक्तार्थैरमलैः स्तवोयमसमः स्वल्पैः प्रसन्नैः पदैः ।
तद्व्याख्यानमदो यथावगतः किञ्चित्कृतं लेशतः,
स्थेयांश्चन्द्रदिवाकरावधि बुधप्रह्लाददचेतस्यलम् ॥ १ ॥

इति बृहत्स्वयंभूस्तोत्रं समाप्तम्

श्रीजिनसेनाचार्यकृतं

जिनसहस्रनामस्तोत्रम्

स्वयंभुवे नमस्तुभ्यमुत्पाद्यात्मानमात्मनि ।
स्वात्मनैव तथोद्भूतवृत्तयेऽचिंत्यवृत्तये ॥ १ ॥

नमस्ते जगतां पत्ये लक्ष्मीभर्त्रे नमोऽस्तु ते ।
विदांवर नमस्तुभ्यं नमस्ते वदतांवर ॥ २ ॥

कामशत्रुहणं देवमामनन्ति मनीषिणः ।
त्वामानमन्सुरेण्मौलिभालाभ्यर्चितक्रमम् ॥ ३ ॥

ध्यानद्रुघणनिर्भिन्नघनघातिमहातरुः ।
अनंतभवसन्तानजयादासीदनन्तजित् ॥ ४ ॥

त्रैलोक्यनिर्जयावाप्तदुर्दर्पमतिदुर्जयम् ।
मृत्युराजं विजित्यासीज्जिन ! मृत्युंजयो भवान् ॥ ५ ॥

विधूताशेषसंसारबन्धनो भव्यबांधवः ।
त्रिपुरारिस्त्वमेवासि जन्ममृत्युजरान्तकृत् ॥ ६ ॥

त्रिकालविषयाशेषतत्त्वभेदात् त्रिधोत्थितम् ।
केवलाख्यं दधच्चक्षुस्त्रिनेत्रोऽसि त्वमीशितः ॥ ७ ॥

त्वामन्धकान्तकं प्राहुर्मोहान्धासुरमर्दनात् ।
अर्द्धं ते नारयो यस्मादर्धनारीश्वरोऽस्यतः ॥ ८ ॥

शिवः शिवपदाध्यासाद् दुरितारिहरो हरः ।
शंकरः कृतशं लोके शंभवस्त्वं भवन्सुखे ॥ ९ ॥

वृषभोऽसिजगज्ज्येष्ठः पुरुः पुरुगुणोदयैः ।
नाभेयो नाभिसंभूतेरिक्ष्वाकुकुलनंदनः ॥ १० ॥

त्वमेकः पुरुषस्कंधस्त्वं द्वे लोकस्य लोचने ।
त्वं त्रिधाबुद्धसन्मार्गस्त्रिज्ञस्त्रिज्ञानधारकः ॥ ११ ॥
चतुश्शरणमांगल्यमूर्तिस्त्वं चतुरः सुधीः ।
पञ्चब्रह्ममयो देवः पावनस्त्वं पुनीहि माम् ॥ १२ ॥
स्वर्गावतारिणे तुभ्यं सद्यो जातात्मने नमः ।
जन्माभिषेकवामाय वामदेव नमोऽस्तु ते ॥ १३ ॥
सुनिष्क्रान्तावघोराय पदं परममीयुषे ।
केवलज्ञानसंसिद्धावीशानाय नमोऽस्तु ते ॥ १४ ॥
पुरुस्तत्पुरुषत्वेन विमुक्तिपदभागिने ।
नमस्तत्पुरुषावस्थां भाविनीं तेऽद्य बिभ्रते ॥ १५ ॥
ज्ञानावरणनिर्ह्रासान्नमस्तेऽनन्तचक्षुषे ।
दर्शनावरणोच्छेदान्नमस्ते विश्वदृश्वने ॥ १६ ॥
नमो दर्शनमोहघ्ने क्षायिकामलदृष्टये ।
नमश्चारित्रमोहघ्ने विरागाय महौजसे ॥ १७ ॥
नमस्तेऽनन्तवीर्याय नमोऽनन्तसुखात्मने ।
नमस्तेऽनन्तलोकाय लोकालोकावलोकिने ॥ १८ ॥
नमस्तेऽनन्तदानाय नमस्तेऽनन्तलब्धये ।
नमस्तेऽनन्तभोगाय नमोऽनन्तोपभोगिने ॥ १९ ॥
नमः परमयोगाय नमस्तुभ्यमयोनये ।
नमः परमपूताय नमस्ते परमर्षये ॥ २० ॥
नमः परमविद्याय नमः परमतच्छिदे ।

नमः परमतत्त्वाय नमस्ते परमात्मने ॥ २१ ॥
नमः परमरूपाय नमः परमतेजसे ।
नमः परममार्गाय नमस्ते परमेष्ठिने ॥ २२ ॥
परमर्द्धि जुषे धाम्ने परमज्योतिषे नमः ।
नमः पारेतमःप्राप्तधाम्ने परतरात्मने ।२३ ।
नमः क्षीणकलंकाय क्षीणबंध नमोऽस्तु ते ।
नमस्ते क्षीणमोहाय क्षीणदोषाय ते नमः ॥ २४ ॥
नमः सुगतये तुभ्यं शोभनां गतिमीयुषे ।
नमस्तेतान्द्रियज्ञानसुखायानिन्द्रियात्मने ॥ २५ ॥
कायबन्धननिर्मोक्षादकायाय नमोस्तु ते ।
नमस्तुभ्यमयोगाय योगिनामधियोगिने ॥ २६ ॥
अवेदाय नमस्तुभ्यमकषायाय ते नमः ।
नमः परमयोगीन्द्र वन्दितांघ्रिद्वयाय ते ॥ २७ ॥
नमः परमविज्ञान नमः परमसंयत ।
नमः परमदृग्दृष्टपरमार्थाय ते नमः ॥ २८ ॥
नमस्तुभ्यमलेश्याय शुक्ललेश्यांशकस्पृशे ।
नमो भव्येतरावस्थाव्यतीताय विमोक्षिणे ॥ २९ ॥
संज्ञ्यसंज्ञिद्वयावस्थाव्यतिरिक्तामलात्मने ।
नमस्ते वीतसंज्ञाय नमः क्षायिकदृष्टये ॥ ३० ॥
अनाहाराय तृप्ताय नमः परमभाजुषे ।
व्यतीताशेषदोषाय भवाब्धेः पारमीयुषे ॥ ३१

अजराय नमस्तुभ्यं नमस्ते वीतजन्मने।
अमृत्यवे नमस्तुभ्यमचलायाक्षरात्मने ॥ ३२ ॥
अलमास्तां गुणस्तोत्रमनन्तास्तावका गुणाः।
त्वां नामस्मृतिमात्रेण पर्युपासिसिषामहे ॥ ३३ ॥
एवं स्तुत्वा जिनं देवं भक्त्या परमया सुधीः।
पठेदष्टोत्तरं नाम्नां सहस्रं पापशांतये ॥ ३४ ॥

इति पीठिका

प्रसिद्धाष्टसहस्रेद्धलक्षणं त्वां गिरां पतिम्।
नाम्नामष्टसहस्रेण तोष्टुमोभीष्टसिद्धये ॥ १ ॥
श्रीमान्स्वयंभूर्वृषभः संभवःशंभुरात्मभूः।
स्वयंप्रभः प्रभुर्भोक्ता विश्वभूरपुनर्भवः ॥ २ ॥
विश्वात्मा विश्वलोकेशो विश्वतश्चक्षुरक्षरः।
विश्वविद्विश्वविद्येशो विश्वयोनिरनश्वरः ॥ ३ ॥
विश्वदृश्वा विभुर्धाता विश्वेशो विश्वलोचनः।
विश्वव्यापी विधिर्वेधाः शाश्वतो विश्वतोमुखः ॥ ४ ॥
विश्वकर्मा जगज्ज्येष्ठो विश्वमूर्तिर्जिनेश्वरः।
विश्वदृग्विश्वभूतेशो विश्वज्योतिरनीश्वरः ॥ ५ ॥
जिनो जिष्णुरमेयात्मा विष्णुरीशो जगत्पतिः।
अनन्तचिदचिन्त्यात्मा भव्यबन्धुरबन्धनः ॥ ६ ॥
युगादिपुरुषो ब्रह्मा पञ्चब्रह्ममयः शिवः।

पर: परतर: सूक्ष्म: परमेष्ठी सनातन: । ७ ।
स्वयंज्योतिरजोऽजन्मा ब्रह्मयोनिरयोनिज: ।
मोहारिविजयी जेता धर्मचक्री दयाध्वज: ॥ ८ ॥
प्रशान्तारिरनन्तात्मा योगी योगेश्वरार्चित: ।
ब्रह्मविद् ब्रह्मतत्त्वज्ञो ब्रह्मोद्याविद्यतीश्वर: ॥ ९ ॥
शुद्धो बुद्ध: प्रबुद्धात्मा सिद्धार्थ: सिद्धशासन: ।
सिद्ध: सिद्धान्तविद्ध्येय: सिद्धसाध्योजगद्धित: ॥ १० ॥
सहिष्णुरच्युतोऽनंत: प्रभविष्णुर्भवोद्भव: ।
प्रभूष्णुरजरोऽजर्यो भ्राजिष्णुर्धीश्वरोऽव्यय: ॥ ११ ॥
विभावसुरसंभूष्णु: स्वयंभूष्णु: पुरातन: ।
परमात्मा परं ज्योतिस्त्रिजगत्परमेश्वर: ॥ १२ ॥

इति श्रीमदादिशतम ॥ १ ॥

दिव्यभाषापतिर्दिव्य: पूतवाक्पूतशासन: ।
पूतात्मा परमज्योतिर्धर्माध्यक्षो दमीश्वर: ॥ १ ॥
श्रीपतिर्भगवानर्हन्नरजा विरजा: शुचि: ।
तीर्थकृत्केवलीशान: पूजार्ह: स्नातकोऽमल: ॥ २ ॥
अनन्तदीप्तिर्ज्ञानात्मा स्वयंबुद्ध: प्रजापति: ।
मुक्त: शक्तो निराबाधो निष्कलो भुवनेश्वर: ॥ ३ ॥
निरञ्जनो जगज्ज्योतिर्निरुक्तोक्तिर्निरामय: ।
अचलस्थितिरक्षोभ्य: कूटस्थ: स्थाणुरक्षय: ॥ ४ ॥
अग्रणीर्ग्रामणीर्नेता प्रणेता न्यायशास्त्रकृत्

शास्ता धर्मपतिर्धर्म्यो धर्मात्मा धर्मतीर्थकृत ॥ ५ ॥
वृषध्वजो वृषाधीशो वृषकेतुर्वृषायुधः ।
वृषो वृषपतिर्भर्ता वृषभाङ्को वृषोद्भवः ॥ ६ ॥
हिरण्यनाभिर्भूतात्मा भूतभृद् भूतभावनः ।
प्रभवो विभवो भास्वान् भवो भावो भवान्तकः ॥ ७ ॥
हिरण्यगर्भः श्रीगर्भः प्रभूतविभवोद्भवः ।
स्वयंप्रभुः प्रभूतात्मा भूतनाथो जगत्प्रभुः ॥ ८ ॥
सर्वादिः सर्वदृक् सार्वः सर्वज्ञः सर्वदर्शनः ।
सर्वात्मा सर्वलोकेशः सर्ववित्सर्वलोकजित् ॥ ९ ॥
सुगतिः सुश्रुतः सुश्रुक् सुवाक् सूरिर्बहुश्रुतः ।
विश्रुतो विश्वतः पादो विश्वशीर्षः शुचिश्रवाः ॥ १० ॥
सहस्रशीर्षः क्षेत्रज्ञः सहस्राक्षः सहस्रपात् ।
भूतभव्यभवद्भर्ता विश्वविद्यामहेश्वरः ॥ ११ ॥

इति दिव्यादिशतम् ॥ २ ॥

स्थविष्ठः स्थविरो ज्येष्ठः पृष्ठः प्रेष्ठो वरिष्ठधीः ।
स्थेष्ठो गरिष्ठो बंहिष्ठः श्रेष्ठो निष्ठो गरिष्ठगीः ॥१॥
विश्वभृट् विश्वसृट् विश्वेट् विश्वभुग्विश्वनायकः ।
विश्वाशीर्विश्वरूपात्मा विश्वजिद्विजितान्तकः ॥२॥
विभवो विभयो वीरो विशोको विजरो जरन् ।
विरागो विरतोऽसङ्गो विविक्तो वीतमत्सरः ॥ ३ ॥
विनेयजनताबन्धुर्विलीनाशेषकल्मषः ।

वियोगो योगविद्विद्वान्विधाता सुविधिः सुधीः ॥४॥
क्षान्तिभाक्पृथिवीमूर्तिः शान्तिभाक् सलिलात्मकः ।
वायुमूर्तिरसङ्गात्मा वह्निमूर्तिरधर्मधृक् ॥५॥
सुयज्वा यजमानात्मा सुत्वा सुत्रामपूजितः ।
ऋत्विग्यज्ञपतिर्यज्ञो यज्ञाङ्गममृतं हविः ॥ ६ ॥
व्योममूर्तिरमूर्तात्मा निर्लेपो निर्मलोऽचलः ।
सोममूर्तिः सुसौम्यात्मा सूर्यमूर्तिर्महाप्रभः ॥७॥
मन्त्रविन्मन्त्रकृन्मन्त्री मंत्रमूर्तिरनन्तगः ।
स्वतन्त्रस्तन्त्रकृत्स्वान्तः कृतान्तान्तः कृतान्तकृत् ॥८॥
कृती कृतार्थः सत्कृत्यः कृतकृत्यः कृतक्रतुः ।
नित्यो मृत्युंजयोऽमृत्युरमृतात्मामृतोद्भवः ॥९॥
ब्रह्मनिष्ठः परंब्रह्म ब्रह्मात्मा ब्रह्मसम्भवः ।
महाब्रह्मपतिर्ब्रह्मेट् महाब्रह्मपदेश्वरः ॥१०॥
सुप्रसन्नः प्रसन्नात्मा ज्ञानधर्मदमप्रभुः ।
प्रशमात्मा प्रशान्तात्मा पुराणःपुरुषोत्तमः ॥११॥

इति स्थविष्ठादिशतम् ॥३॥

महाशोकध्वजोऽशोकः कः स्रष्टा पद्मविष्टरः ।
पद्मेशः पद्मसंभूतिः पद्मनाभिरनुत्तरः ॥१॥
पद्मयोनिर्जगद्योनिरित्यः स्तुत्यः स्तुतीश्वरः ।
स्तवनार्हो हृषीकेशो जितजेयः कृतक्रियः ॥२॥
गणाधिपो गणज्येष्ठो गण्यः पुण्यो गणाग्रणीः ।

गुणाकरो गुणांभोधिर्गुणज्ञो गुणनायकः ॥३॥
गुणाकरो गुणोच्छेदी निर्गुणः पुण्यगीर्गुणः ।
शरण्यः पुण्यवाक्पूतो वरेण्यः पुण्यनायकः ॥४॥
अगण्यः पुण्यधीर्गण्यः पुण्यकृत्पुण्यशासनः ।
धर्मारामो गुणग्रामः पुण्यापुण्यनिरोधकः ॥५॥
पापापेतो विपापात्मा विपाप्मा वीतकल्मषः ।
निर्द्वन्द्वो निर्मदः शांतो निर्मोहो निरुपद्रवः ॥६॥
निर्निमेषो निराहारो निष्क्रियो निरुपप्लवः ।
निष्कलंको निरस्तैना निर्द्धूतांगो निराश्रयः ॥७॥
विशालो विपुलज्योतिरतुलोऽचिंत्यवैभवः ।
सुसंवृतः सुगुप्तात्मा सुभृत्सुनयतत्त्ववित् ॥८॥
एकविद्यो महाविद्यो मुनिः परिवृढः पतिः ।
धीशो विद्यानिधिः साक्षी विनेता विहतांतकः ॥९॥
पिता पितामहः पाता पवित्रः पावनो गतिः ।
त्राता भिषग्वरो वर्यो वरदः परमः पुमान् ॥१०॥
कविः पुराणपुरुषो वर्षीयान्वृषभः पुरुः ।
प्रतिष्ठाप्रसवो हेतुर्भुवनैकपितामहः ॥११॥

इति महाशोकध्वजादिशतम् ॥४॥

श्रीवृक्षलक्षणः श्लक्ष्णो लक्षण्यः शुभलक्षणः ।
निरक्षः पुंडरीकाक्षः पुष्कलः पुष्करेक्षणः ॥१॥
सिद्धिदः सिद्धसंकल्प सिद्धात्मा सिद्धसाधनः ।

बुद्धबोध्यो महाबोधिर्वर्द्धमानो महर्द्धिकः ॥२॥
वेदांगो वेदविद्वेद्यो जातरूपो विदांवरः ।
वेदवेद्यः स्वसंवेद्यो विवेदो वदतांवरः ॥३॥
अनादिनिधनो व्यक्तो व्यक्तवाग्व्यक्तशासनः ।
युगादिकृद् युगाधारो युगादिर्जगदादिजः ॥४॥
अतीन्द्रोऽतींद्रियो धींद्रो महेन्द्रोऽतींद्रियार्थदृक् ।
अनिंद्रियोऽहमिंद्रार्च्यो महेन्द्रमहितो महान् ॥५॥
उद्भवः कारणं कर्ता पारगो भवतारकः ।
अग्राह्यो गहनं गुह्यं परार्घ्यः परमेश्वरः ।६।
अनंतर्द्धिरमेयर्द्धिरचिंत्यर्द्धिः समग्रधीः ।
प्राग्र्यः प्राग्रहरोऽभ्यग्र्यः प्रत्यग्रोऽग्र्योऽग्रिमोऽग्रजः ॥७॥
महातपा महातेजा महोदर्को महोदयः ।
महायशा महाधामा महासत्त्वो महाधृतिः ॥८॥
महाधैर्यो महावीर्यो महासंपन्महाबलः ।
महाशक्तिर्महाज्योतिर्महाभूतिर्महाद्युतिः ॥९॥
महामतिर्महानीतिर्महाक्षांतिर्महोदयः ।
महाप्रज्ञो महाभागो महानंदो महाकविः ॥१०॥
महामहा महाकीर्तिर्महाकांतिर्महावपुः
महादानो महाज्ञानो महायोगो महागुणः ॥११॥
महामहपतिः प्राप्तमहाकल्याणपंचकः ।
महाप्रभुर्महाप्रातिहार्याधीशो महेश्वरः ॥१२॥

इति श्रावृत्त्यादिशतम् ॥५॥

महामुनिर्महामौनी महाध्यानी महादमः ।
महाक्षमो महाशीलो महायज्ञो महामखः ॥१॥
महाव्रतपतिर्मह्यो महाकांतिधरोऽधिपः ।
महामैत्रीमयोऽमेयो महोपायो महोदयः ॥२॥
महाकारुणिको मंता महामन्त्रो महायतिः ।
महानादो महाघोषः महेज्यो महसां पतिः ॥३॥
महाध्वरधरो धुर्यो महौदार्यो महेष्टवाक् ।
महात्मा महसां धाम महर्षिर्महितोदयः ॥४॥
महाक्लेशांकुशः शूरो महाभूतपतिर्गुरुः ।
महापराक्रमोनंतो महाक्रोधरिपुर्वशी ॥५॥
महाभवाब्धिसंतारी महामोहाद्रिसूदनः ।
महागुणाकरः क्षांतो महायोगीश्वरः शमी ॥६॥
महाध्यानपतिर्ध्याता महाधर्मो महाव्रतः ।
महाकर्मारिहात्मज्ञो महादेवो महेशिता ॥७॥
सर्वक्लेशापहः साधुः सर्वदोषहरो हरः ।
असंख्येयोऽप्रमेयात्मा शमात्मा प्रशमाकरः ॥८॥
सर्वयोगीश्वरोऽचिंत्यः श्रुतात्मा विष्टरश्रवाः ।
दांतात्मा दमतीर्थेशो योगात्मा ज्ञानसर्वगः ॥९॥
प्रधानमात्मा प्रकृतिः परमः परमोदयः ।
प्रक्षीणबंधः कामारिः क्षेमकृत्क्षेमशासनः ॥१०॥

प्रणयः प्राणः प्राणदः प्रणतेश्वरः ।
प्रमाणं प्रणिधिर्दक्षो दक्षिणोऽध्वर्युरध्वरः ॥११॥
आनंदो नंदनो नंदो वंद्योऽनिंद्योऽभिनंदनः ।
कामहा कामदः काम्यः कामधेनुररिंजयः ॥१२॥

इति महामुन्यादिशतम् ॥६॥

असंस्कृतःसुसंस्कारः प्राकृतो वैकृतांतकृत् ।
अंतकृत्कांतिगुः कांतश्चिंतामणिरभीष्टदः ॥१॥
अजितो जितकामारिरमितोऽमितशासनः ।
जितक्रोधो जितामित्रो जितक्लेशो जितांतकः ॥२॥
जिनेंद्रः परमानन्दो मुनींद्रो दुन्दुभिस्वनः ।
महेंद्रवंद्यो योगींद्रो यतींद्रो नाभिनन्दनः ॥३॥
नाभेयो नाभिजोऽजातः सुव्रतो मनुरुत्तमः ।
अभेद्योऽनत्ययोऽनाश्वानधिकोऽधिगुरुः सुगीः ॥४॥
सुमेधा विक्रमी स्वामी दुराधर्षो निरुत्सुकः ।
विशिष्टः शिष्टभुक् शिष्टः प्रत्ययः कामनोऽनघः ॥५॥
क्षेमी क्षेमंकरोऽक्षय्यः क्षेमधर्मपतिः क्षमी ।
अग्राह्यो ज्ञाननिग्राह्यो ध्यानगम्यो निरुत्तरः ॥६॥
सुकृती धातुरिज्यार्हः सुनयश्चतुराननः ।
श्रीनिवासश्चतुर्वक्त्रश्चतुरास्यश्चतुर्मुखः ॥७॥
सत्यात्मा सत्यविज्ञानः सत्यवाक्सत्यशासनः ।
सत्याशीः सत्यसंधानः सत्यः सत्यपरायणः ॥८॥

स्थेयान्स्थवीयान्नेदीयान्दवीयान्दूरदर्शनः ।
अणोरणीयाननणुर्गुरुराद्यो गरीयसाम् ॥९॥
सदायोगः सदाभोगः सदातृप्तः सदाशिवः ।
सदागतिः सदासौख्यः सदाविद्यः सदोदयः ॥१०॥
सुघोषः सुमुखः सौम्यः सुखदः सुहितः सुहृत् ।
सुगुप्तो गुप्तिभृद् गोप्ता लोकाध्यक्षो दमीश्वरः ॥११॥

इति असंस्कृतादिशतम् ॥७॥

बृहन्बृहस्पतिर्वाग्मी वाचस्पतिरुदारधीः ।
मनीषी धिषणो धीमाञ्छेमुशीषो गिरांपतिः ॥१॥
नैकरूपो नयस्तुंगो नैकात्मा नैकधर्मकृत् ।
अविज्ञेयोऽप्रतर्क्यात्मा कृतज्ञः कृतलक्षणः ॥२॥
ज्ञानगर्भो दयागर्भो रत्नगर्भः प्रभास्वरः ।
पद्मगर्भो जगद्गर्भो हेमगर्भः सुदर्शनः ॥३॥
लक्ष्मीवांस्त्रिदशाऽध्यक्षो दृढीयानिन ईशिता ।
मनोहरो मनोज्ञांगो धीरो गम्भीरशासनः ॥४॥
धर्मयूपो दयायागो धर्मनेमिर्मुनीश्वरः ।
धर्मचक्रायुधो देवः कर्महा धर्मघोषणः ॥५॥
अमोघवागमोघाज्ञो निर्मलोऽमोघशासनः ।
सुरूपः सुभगस्त्यागी समयज्ञः समाहितः ॥६॥
सुस्थितः स्वास्थ्यभाक्स्वस्थो नीरजस्को निरुद्धवः
अलेपो निष्कलंकात्मा वीतरागो गतस्पृहः ॥७॥

वश्येन्द्रियो वियुक्तात्मा निःसपत्नो जितेन्द्रियः ।
प्रशान्तोऽनन्तधामर्षिर्मंगलं मलहाऽनघः ॥ ८ ॥
अनीदृगुपमाभूतो दिष्टिर्दैवमगोचरः ।
अमूर्तो मूर्तिमानेको नैको नानैकतत्त्वदृक् ९
अध्यात्मगम्योऽगम्यात्मा योगविद्योगिवन्दितः
सर्वत्रगः सदाभावी त्रिकालविषयार्थदृक् १०
शंकरः शंवदो दान्तो दमी क्षांतिपरायणः ।
अधिपः परमानन्दः परात्मज्ञः परात्परः ११
त्रिजगद्वल्लभोऽभ्यर्च्यस्त्रिजगन्मंगलोदयः ।
त्रिजगत्पतिपूज्यांघ्रिस्त्रिलोकाग्रशिखामणिः ।१२।
इति बृहदादिशतम् ॥८॥

त्रिकालदर्शी लोकेशो लोकधाता दृढव्रतः
सर्वलोकातिगः पूज्यः सर्वलोकैकसारथिः १
पुराणपुरुषः पूर्वः कृतपूर्वांगविस्तरः ।
आदिदेवः पुराणाद्यः पुरुदेवोऽधिदेवता २
युगमुख्यो युगज्येष्ठो युगादिस्थितिदेशकः ।
कल्याणवर्णः कल्याणः कल्यः कल्याणलक्षणः ३
कल्याणप्रकृतिर्दीप्तकल्याणात्मा विकल्मषः ।
विकलंकः कलातीतः कलिलघ्नः कलाधरः ४
देवदेवो जगन्नाथो जगद्बन्धुर्जगद्विभुः ।
जगद्धितैषी लोकज्ञः सर्वगो जगदग्रजः ५

चराचरगुरुर्गोप्यो गूढात्मा गूढगोचरः।
सद्योजातः प्रकाशात्मा ज्वलज्ज्वलनसप्रभः ६
आदित्यवर्णो भर्माभः सुप्रभः कनकप्रभः।
सुवर्णवर्णो रुक्माभः सूर्यकोटिसमप्रभः ७
तपनीयनिभस्तुंगो बालार्काभोऽनलप्रभः।
संध्याभ्रबभ्रुर्हेमाभस्तप्तचामीकरप्रभः ८
निष्टप्तकनकच्छायः कनत्काञ्चनसन्निभः।
हिरण्यवर्णः स्वर्णाभः शातकुम्भनिभप्रभः ९
द्युम्नाभो जातरूपाभो तप्तजाम्बूनदद्युतिः।
सुधौतकलधौतश्रीः प्रदीप्तो हाटकद्युतिः १०
शिष्टेष्टः पुष्टिदः पुष्टः स्पष्टः स्पष्टाक्षरः क्षमः
शत्रुघ्नोऽप्रतिघोऽमोघः प्रशास्ता शासिता स्वभूः ११
शान्तिनिष्ठो मुनिज्येष्ठः शिवतातिः शिवप्रदः।
शान्तिदः शान्तिकृच्छान्तिः कांतिमान्कामितप्रदः १२
श्रेयोनिधिरधिष्ठानमप्रतिष्ठः प्रतिष्ठितः।
सुस्थिरः स्थावरः स्थाणुः प्रथीयान्प्रथितः पृथुः १३

इति त्रिकालदर्श्यादिशतम् ॥६॥

दिग्वासा वातरशनो निर्ग्रन्थेशो निरम्बरः।
निष्किञ्चनो निराशंसो ज्ञानचक्षुरमोमुहः १
तेजोराशिरनन्तौजा ज्ञानाब्धिः शीलसागरः।
तेजोमयोऽमितज्योतिर्ज्योतिमूर्तिस्तमोऽपहः २

जगच्चूडामणिर्दीप्तः सर्वविघ्नविनायकः।
कलिघ्नः कर्मशत्रुघ्नो लोकालोकप्रकाशकः ३
अनिद्रालुरतंद्रालुर्जागरूकः प्रभामयः।
लक्ष्मीपतिर्जगज्ज्योतिर्धर्मराजः प्रजाहितः ४
मुमुक्षुर्बंधमोक्षज्ञो जिताक्षो जितमन्मथः।
प्रशांतरसशैलूषो भव्यपेटकनायकः ५
मूलकर्ताखिलज्योतिर्मलघ्नो मूलकारणः।
आप्तो वागीश्वरः श्रेयाञ्छ्रायसोक्तिर्निरुक्तवाक् ६
प्रवक्ता वचसामीशो मारजिद्विश्वभाववित्।
सुतनुस्तनुनिर्मुक्तः सुगतो हतदुर्नयः ७
श्रीशः श्रीश्रितपादाब्जो वीतभीरभयंकरः।
उत्सन्नदोषो निर्विघ्नो निश्चलो लोकवत्सलः ८
लोकोत्तरो लोकपतिर्लोकचक्षुरपारधीः।
धीरधीर्बुद्धसन्मार्गः शुद्धः सूनृतपूतवाक् ९
प्रज्ञापारमितः प्राज्ञो यतिर्नियमितेंद्रियः।
भदन्तो भद्रकृद्भद्रः कल्पवृक्षो वरप्रदः १०
समुन्मूलितकर्मारिः कर्मकाष्ठाशुशुक्षणिः।
कर्मण्यः कर्मठः प्रांशुर्हेयादेयविचक्षणः ११
अनन्तशक्तिरच्छेद्यस्त्रिपुरारिस्त्रिलोचनः।
त्रिनेत्रस्त्र्यम्बकस्त्र्यक्षः केवलज्ञानवीक्षणः ॥१२॥
समंतभद्रः शांतारिर्धर्माचार्यो दयानिधिः।

सूक्ष्मदर्शी जितानंगः कृपालुर्धर्मदेशकः ॥१३॥
शुभंयुः सुखसाद्भूतः पुण्यराशिरनामयः ।
धर्मपालो जगत्पालो धर्मसाम्राज्यनायकः ॥१४॥

इति दिग्वासादिअष्टाधिकशतम् । १०॥

इत्यष्टाधिकसहस्रनामावली समाप्ता ।

धाम्नः पते तवामूनि नामान्यागमकोविदैः ।
समुच्चितान्यनुध्यायन्पुमान्पूतस्मृतिर्भवेत् ॥१॥
गोचरोऽपि गिरामासां त्वमवाग्गोचरो मतः ।
स्तोता तथाप्यसंदिग्धं त्वत्तोभीष्टफलं लभेत् ॥२॥
त्वमतोऽसि जगद्बन्धुस्त्वमऽतोसि जगद्भिषक् ।
त्वमतोसि जगद्धाता त्वमतोसि जगद्धितः ॥३॥
त्वमेकं जगतां ज्योतिस्त्वं द्विरूपोपयोगभाक् ।
त्वं त्रिरूपैकमुक्त्यंगं स्वोत्थानंतचतुष्टयः ॥४॥
त्वं पंचब्रह्मतत्त्वात्मा पंचकल्याणनायकः ।
षड्भेदभावतत्त्वज्ञस्त्वं सप्तनयसंग्रहः ॥५॥
दिव्याष्टगुणमूर्तिस्त्वं नवकेवललब्धिकः ।
दशावतारनिर्धार्यो मां पाहि परमेश्वर ॥६॥
युष्मन्नामावलीदृब्धविलसत्स्तोत्रमालया ।
भवंतं वरिवस्यामः प्रसीदानुगृहाण नः ॥७॥
इदं स्तोत्रमनुस्मृत्य पूतो भवति भाक्तिकः ।
यः स पाठं पठत्येनं स स्यात्कल्याणभाजनम् ॥८॥

ततः सदेदं पुण्यार्थी पुमान्पठति पुण्यधीः ।
पौरूहुतीं श्रियं प्राप्तुं परमामभिलाषुकः ॥९॥
स्तुत्वेति मघवा देवं चराचरजगद्गुरुं ।
ततस्तीर्थविहारस्य व्यधात्प्रस्तावनामिमाम् ॥१०॥
स्तुतिः पुण्यगुणोत्कीर्तिः स्तोता भव्यः प्रसन्नधीः ।
निष्ठितार्थो भवांस्तुत्यः फलं नैश्रेयसं सुखं ॥११॥
यः स्तुत्यो जगतां त्रयस्य न पुनः स्तोता स्वयं कस्यचित्
ध्येयो योगिजनस्य यश्च नितरां ध्याता न स्वं कस्यचित्
यो नेतृन् नयते नमस्कृतिमलं नंतव्यपक्षेक्षणः ।
स श्रीमान् जगतां त्रयस्य च गुरुर्देवः पुरुः पावनः ॥१२॥
तं देवं त्रिदशाधिपार्चितपदं घातिक्षयानंतरं,
प्रोत्थानंतचतुष्टयं जिनमिमं भव्याब्जनीनामिनम् ।
मानस्तंभविलोकनानतजगन्मान्यं त्रिलोकीपतिं,
प्राप्ताचिंत्यबहिर्विभूतिमनघं भक्त्या प्रवंदामहे ॥३१॥

इति श्रीजिनसहस्रनामस्तवनं समाप्तम् ।

श्रीमानतुङ्गाचार्यविरचितं

भक्तामरस्तोत्रम् ।

भक्तामरप्रणतमौलिमणिप्रभाणा–
मुद्योतकं दलितपापतमोवितानम्
सम्यक् प्रणम्य जिनपादयुगं युगादा-
वालम्बनं भवजले पततां जनानां ॥१॥

यः संस्तुतः सकलवाङ्मयतत्त्वबोधादुद्भूतबुद्धिपटुभिः सुरलोकनाथैः। स्तोत्रैर्जगत्त्रितयचित्तहरैरुदारैः स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥२॥ बुद्ध्या विनापि विबुधार्चितपादपीठ, स्तोतुं समुद्यतमतिर्विगतत्रपोऽहं। बालं विहाय जलसंस्थितमिंदुबिम्बमन्यःक इच्छति जनःसहसा ग्रहीतुम् ३ वक्तुं गुणान्गुणसमुद्र शशांककांतान् कस्ते क्षमः सुरगुरुप्रतिमोऽपि बुद्ध्या। कल्पांतकालपवनोद्धतनक्रचक्रं, को वा तरीतुमलमंबुनिधिं भुजाभ्यां ।४। सोहं तथापि तव भक्तिवशान्मुनीश, कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः। प्रीत्यात्मवीर्यमविचार्य मृगी मृगेंद्रं, नाभ्येति किं निजशिशोः परिपालनार्थम् ।५। अल्पश्रुतं श्रुतवतां परिहासधाम, त्वद्भक्तिरेव मुखरीकुरुते बलान्माम्। यत्कोकिलः किल मधौ मधुरं विरौति, तच्चाम्रचारुकलिकानिकरैकहेतु ॥ त्वत्संस्तवेन भवसंततिसंनिबद्धं पापं क्षणात्क्षयमुपैति शरीरभाजाम्, आक्रांत लोकमलिनीलमशेषमाशु सूर्यांशुभिन्नमिव शार्वरमंधकारम् मत्वेति नाथ तव संस्तवनं मयेद--मारभ्यते तनुधियापि तव प्रभावात्, चेतो हरिष्यति सतां नलिनीदलेषु मुक्ताफलद्युतिमुपैति ननूदबिंदुः ॥८॥ आस्तां तव स्तवनमस्तसमस्तदोषं त्वत्संकथापि जगतां दुरितानि हन्ति। दूरे सहस्रकिरणः कुरुते प्रभैव, पद्माकरेषु जलजानि विकासभांजि ॥९॥ नात्यद्भुतं भुवनभूषण भूतनाथ, भूतैर्गुणैर्भुवि भवंतमभि-

ष्टुवन्तः । तुल्या भवन्ति भवतो ननु तेन किं वा,भूत्याश्रितं य इह नात्मसमं करोति ।१०। दृष्ट्वा भवंतमनिमेषविलोकनीयं,नान्यत्र तोषमुपयाति जनस्य चक्षुः । पीत्वा पयःशशिकरद्युतिदुग्धसिन्धोः, क्षारं जलं जलनिधेरसितुं क इच्छेत् ।। यैः शांतरागरुचिभिः परमाणुभिस्त्वं,निर्मापितस्त्रिभुवनैकललामभूत । तावंत एव खलु तेप्यणवः पृथिव्यां, यत्ते समानमपरं न हि रूपमस्ति ।।१२।। वक्त्रं क ते सुर–नरोरगनेत्रहारि,निश्शेषनिर्जितजगत्त्रितयोपमानम् । बिम्बं कलंकमलिनं क निशाकरस्य,यद्वासरे भवति पाण्डुपलाश कल्पम् ।।१३।। सम्पूर्णमण्डलशशांककलाकलाप,शुभ्रा गुणास्त्रिभुवनं तव लंघयन्ति । ये संश्रितास्त्रिजगदीश्वर नाथमेक, कस्तान्निवारयति संचरतो यथेष्टम् ।।१४।। चित्रं किमत्र यदि ते त्रिदशाङ्गनाभिर्नीतं मनागपि मनो न विकारमार्गम् । कल्पांतकालमरुता चलिताचलेन, किं मन्दराद्रिशिखरं चलितं कदाचित् ।।१५।। निर्धूमवर्तिरपव–र्जिततैलपूरः कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि । गम्यो न जातु मरुतां चलिताचलानां, दीपोपरस्त्वमसि नाथ जगत्–प्रकाशः ।।३१। नास्तं कदाचिदुपयासि न राहुगम्यः, स्पष्टीकरोषि सहसा युगपज्जगन्ति । नाम्भोधरोदरनिरुद्ध–महाप्रभावः, सूर्यातिशायिमहिमासि मुनीन्द्र लोके ।।१७।। नित्योदयं दलितमोहमहान्धकारं, गम्यं न राहुवदनस्य न

वारिदानाम् । विभ्राजते तव मुखाब्जमनल्पकान्ति–विद्योत-यज्जगदपूर्वशशांकविम्बम् ॥१८॥ किं शर्वरीषु शशिनाह्नि विवस्वता वा युष्मन्मुखेन्दुदलितेषु तमःसु नाथ, निष्पन्नशालि वनशालिनि जीवलोके कार्यं कियज्जलधरैर्जलभारनम्रैः१६ ज्ञानं यथा त्वयि विभाति कृतावकाशं, नैवं तथा हरिहरादिषु नायकेषु । तेजो महामणिषु याति यथा महत्त्वं, नैवं तु काच-शकले किरणाकुलेऽपि ॥२०॥ मन्ये वरं हरिहरादय एव दृष्टा, दृष्टेषु येषु हृदयं त्वयि तोषमेति । किं वीक्षितेन भवता भुवि येन नान्यः, कश्चिन्मनो हरति नाथ भवान्तरेऽपि ॥२१॥ स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्, नान्या सुतं त्वदुपमं जननी प्रसूता । सर्वा दिशो दधति भानि सह-स्त्ररश्मिं, प्राच्येव दिग्जनयति स्फुरदंशुजालम् ॥२२॥ त्वामामनन्ति मुनयः परमं पुमांसमादित्यवर्णममलं तमसः पुरस्तात् । त्वामेव सम्यगुपलभ्य जयन्ति मृत्युं, नान्यः शिवः शिवपदस्य मुनीन्द्र पंथाः ॥२३॥ त्वामव्ययं विभु-मचिन्त्यमसंख्यमाद्यं, ब्रह्माणमीश्वरमनन्तमनङ्गकेतुम् । योगीश्वरं विदितयोगमनेकमेकं, ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥२४॥ बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधात्, त्वं शंक-रोऽसि भुवनत्रयशंकरत्वात् । धातासि धीर शिवमार्गविधे-र्विधानाद्, व्यक्तं त्वमेव भगवन्पुरुषोत्तमोसि ।२५। तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ, तुभ्यं नमः क्षितितलामलभूष-

णाय । तुभ्यं नमस्त्रिजगतः परमेश्वराय, तुभ्यं नमो जिन भवोदधिशोषणाय ॥२६॥ को विस्मयोत्र यदि नाम गुणैरशेषैस्त्वं संश्रितो निरवकाशतया मुनीश । दोषैरुपात्त विविधाश्रयजातगर्वैः, स्वप्नान्तरेपि न कदाचिदपीक्षितोसि ॥२७॥ उच्चैरशोकतरुसंश्रितमुन्मयूख–माभाति रूपममलं भवतो नितान्तम् । स्पष्टोल्लसत्किरणमस्ततमोवितानं बिम्बं रवेरिव पयोधरपार्श्ववर्ति ॥२८॥ सिंहासने मणिमयूख–शिखाविचित्रे, विभ्राजते तव वपुः कनकावदातम् । बिम्बं वियद्विलसदंशुलतावितानं,तुङ्गोदयाद्रिशिरसीव सहस्ररश्मेः ॥२९॥ कुन्दावदातचलचामरचारुशोभं, विभ्राजते तव वपुः कलधौतकान्तम् । उद्यच्छशाङ्कशुचिनिर्झरवारिधारमुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥३०॥ छत्रत्रयं तव विभाति शशाङ्ककान्त–मुच्चैःस्थितं स्थगितभानुकरप्रतापम् । मुक्ता-फलप्रकरजालविवृद्धशोभं, प्रख्यापयत्त्रिजगतः परमेश्वर-त्वम् ॥३१॥ गम्भीरताररवपूरितदिग्विभागस्त्रैलोक्य लोकशुभसङ्गमभूतिदक्षः । सद्धर्मराजजयघोषणघोषकः सन्खे दुन्दुभिर्ध्वनति ते यशसःप्रवादी ॥३२॥ मन्दारसुन्दर न-मेरुसुपारिजातसन्तानकादिकुसुमोत्करवृष्टिरुद्धा गन्धोदबि-न्दुशुभमन्दमरुत्प्रयाता दिव्या दिवः पतति ते वचसां ततिर्वा ॥३३॥ शुम्भत्प्रभावलयभूरिविभा विभोस्ते,लोकत्रये द्युतिमतां द्युतिमाक्षिपन्ती प्रोद्यद्दिवाकरनिरन्तर भूरिसं-

रुया दीप्त्या जयत्यपि निशामपि सोमसौम्याम् ।३४॥ स्वर्गापवर्गगममार्गविमार्गणेष्टः, सद्धर्मतत्त्वकथनैकपटुस्त्रिलोक्याः, दिव्यध्वनिर्भवति ते विशदार्थसर्वभाषास्वभावपरिणामगुणैः प्रयोज्यः ॥३५॥ उन्निद्रहेमनवपङ्कजपुञ्जकान्ती पर्युल्लसन्नखमयूखशिखाभिरामौ । पादौ पदानि तव यत्र जिनेन्द्र धत्तः, पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥३६॥ इत्थं यथा तव विभूतिरभूज्जिनेन्द्र ! धर्मोपदेशनविधौ न तथा परस्य । यादृक्प्रभा दिनकृतः प्रहतान्धकारा, तादृक्कुतो ग्रहगणस्य विकाशिनोऽपि ॥३७॥ श्च्योतन्मदाविलविलोलकपोलमूल—मत्तभ्रमद्भ्रमरनादविवृद्धकोपम् । ऐरावताभमिभमुद्धतमापतन्तं, दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ।३८। भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्तमुक्ताफलप्रकरभूषितभूमिभागः, बद्धक्रमः क्रमगतं हरिणाधिपोऽपि नाक्रामति क्रमयुगाचलसंश्रितं ते ॥३९। कल्पांतकालपवनोद्धतवह्निकल्पं, दावानलं ज्वलितमुज्ज्वलमुत्स्फुलिङ्गम् विश्वं जिघित्सुमिव सम्मुखमापतंतं, त्वन्नामकीर्तनजलं शमयत्यशेषम ॥४०॥ रक्तेक्षणं समदकोकिलकण्ठनीलं क्रोधोद्धतं फणिनमुत्फणमापतंतम् । आक्रामति क्रमयुगेण निरस्तशंकस्त्वन्नामनागदमनी हृदि यस्य पुंसः ४१ वल्गत्तुरंगगजगर्जितभीमनाद—माजौ बलं बलवतामपि भूपतीनाम् । उद्यद्दिवाकरमयूखशिखापविद्धं, त्वत्कीर्तना-

त्तम इवाशु भिदामुपैति ४२ कुन्ताग्रभिन्नगजशोणितवारि-
वाह वेगावतारतरणातुरयोधभीमे । युद्धे जयं विजितदुर्जय-
जेयपक्षास्त्वत्पादपंकजवनाश्रयिणो लभन्ते ॥४३॥ अम्भो-
निधौ क्षुभितभीषणनक्रचक्र–पाठीनपीठभयदोल्वणवाडवा-
ग्नौ,रङ्गत्तरङ्गशिखरस्थितयानपात्रास्त्रासं विहाय भवतः स्म-
रणाद् व्रजन्ति ।४४। उद्भूतभीषणजलोदरभारभुग्नाः शो-
च्यां दशामुपगताश्च्युतजीविताशाः । त्वत्पादपंकजरजोमृ-
तदिग्धदेहा, मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥४५॥
आपादकण्ठमुरुशृङ्खलवेष्टिताङ्गाः,गाढं बृहन्निगडकोटिनिघृ-
ष्टजंघाः । त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः,सद्यः स्वयं
विगतबन्धभया भवन्ति ॥४६॥ मत्तद्विपेन्द्रमृगराजदवान-
लाहि-संग्रामवारिधिमहोदरबन्धनोत्थम् । तस्याशु नाश-
पयाति भयं भियेव, यस्तावकं स्तवमिमं मतिमानधीते
४७॥ स्तोत्रस्रजं तव जिनेन्द्र गुणैर्निबद्धां, भक्त्या मया
निधवर्णविचित्रपुष्पाम् । धत्ते जनो य इह कण्ठगताम-
स्रं तं मानतुङ्गमवशा समुपैति लक्ष्मीः ॥४८॥

इति श्रीमानतुङ्गाचार्यविरचितं भक्तामरस्तोत्रम् ।

श्रीकुमुदचन्द्रप्रणीतं

कल्याणमन्दिरस्तोत्रम् ।

ाणमन्दिरमुदारमवद्यभेदि––––भीताभयप्रदमनिन्दित-
पद्मम् । संसारसागरनिमज्जदशेषजन्तु-पोतायमानमभि-
जिनेश्वरस्य ॥१॥ यस्य स्वयं सुरगुरुर्गरिमाम्बुराशेः

स्तोत्रं सुविस्तृतमतिर्न विभुर्विधातुम् । तीर्थेश्वरस्य कमठ-स्मयधूमकेतोस्तस्याहमेष किल संस्तवनं करिष्ये ॥२॥ (युग्मम्) सामान्यतोऽपि तव वर्णयितुं स्वरूपमस्मादृशाः कथमधीश भवंत्यधीशाः । धृष्टोऽपि कौशिकशिशुर्यदि वा दिवान्धो, रूपं प्ररूपयति किं किल घर्मरश्मेः ॥३॥ मोहक्षयादनुभवन्नपि नाथ मर्त्यो, नूनं गुणान्गणयितुं न तव क्षमेत । कल्पान्तवान्तपयसः प्रकटोऽपि यस्मात्, मीयेत केन जलधेर्ननु रत्नराशिः ॥४। अभ्युद्यतोस्मि तव नाथ जडाशयोपि, कर्तुं स्तवं लसदसंख्यगुणाक-रस्य । बालोपि किं न निजबाहुयुगं वितत्य, विस्तीर्णतां कथयति स्वधियाम्बुराशेः ॥५॥ ये योगिनामपि न यान्ति गुणास्तवेश, वक्तुं कथं भवति तेषु ममावकाशः । जाता तदेवमसमीक्षितकारितेयं, जल्पन्ति वा निजगिरा ननु पक्षिणोऽपि ॥६॥ आस्तामचिन्त्यमहिमा जिन संस्तवस्ते, नामापि पाति भवतो भवतो जगन्ति । तीव्रातपोपहतपा-न्थजनान्निदाघे, प्रीणाति पद्मसरसः सरसोनिलोपि । ७। हृद्वर्तिनि त्वयि विभो शिथिलीभवन्ति, जन्तोः क्षणेन निविडा अपि कर्मबन्धाः । सद्यो भुजङ्गमया इव मध्य-भाग-मभ्यागते वनशिखण्डिनि चन्दनस्य ।८। मुच्यत एव मनुजाः सहसा जिनेन्द्र, रौद्रैरुपद्रवशतैस्त्वयि वीक्षि-तेपि । गोस्वामिनि स्फुरिततेजसि दृष्टमात्रे, चौरैरिवाशु

पशाच: प्रपलायमानैः ॥९॥ त्वं तारको जिन कथं भविनां त एव, त्वामुद्वहन्ति हृदयेन यदुत्तरन्तः । यद्वा दृतिस्तरति यज्जलमेष नून-मन्तर्गतस्य मरुतः स किलानुभावः १० यस्मिन्हरप्रभृतयोपि हतप्रभावाः सोपि त्वया रतिपतिः क्षपितः क्षणेन । विध्यापिता हुतभुजः पयसाथ येन, पीतं न किं तदपि दुर्धरवाडवेन ११ स्वामिन्ननल्पगरिमाण-मपि प्रपन्नास्, त्वां जन्तवः कथमहो हृदये दधानाः । जन्मोदधिं लघु तरन्त्यतिलाघवेन, चिन्त्यो न हंत महतां यदि वा प्रभावः ॥१२॥ क्रोधस्त्वया यदि ! विभो प्रथमं निरस्तो, ध्वस्तास्तदा वद कथं किल कर्मचौराः । प्लोष-त्यमुत्र यदि वा शिशिरापि लोके,नीलद्रुमाणि विपिनानि न किं हिमानी ॥१३॥ त्वां योगिनो जिन सदा परमात्म-रुप-मन्वेषयन्ति हृदयाम्बुजकोपदेशे । पूतस्य निर्मलरुचेर्यदि वा किमन्य-दक्षस्य सम्भवपदं ननु कर्णिकायाः ॥१४॥ ध्यानाज्जिनेश भवतो भविनः क्षणेन, देहं विहाय परमात्मदशां व्रजन्ति । तीव्रानलादुपलभावमपास्य लोके, चामीकरत्वमचिरादिव धातुभेदाः ॥१५॥ अन्तः सदैव जिन यस्य विभाव्यसे त्वं, भव्यैः कथं तदपि नाशयसे शरीरम् । एतत्स्वरूपमथ मध्यविवर्तिनो हि,यद्विग्रहं प्रशम-यन्ति महानुभावाः ॥१६॥ आत्मा मनीषिभिरयं त्वद-भेदबुद्ध्या, ध्यातो जिनेन्द्र भवतीह भवत्प्रभावः । पानी-

यमप्यमृतमित्यनुचिन्त्यमानं, किं नाम नो विषविकारम-
पाकरोति ॥१७॥ त्वामेव वीततमसं परवादिनोऽपि, नूनं
विभो हरिहरादिधिया प्रपन्नाः। किं काचकामलिभिरीश
सितोऽपि शंखो, नो गृह्यते विविधवर्णविपर्ययेण ॥१८॥
धर्मोपदेशसमये सविधानुभावा–दास्तां जनो भवति ते तरु-
रप्यशोकः। अभ्युद्गते दिनपतौ समहीरुहोऽपि, किं वा
विबोधमुपयाति न जीवलोकः ॥१९॥ चित्रं विभो कथम–
वाङ्मुखवृन्तमेव, विष्वक्पतत्यविरला सुरपुष्पवृष्टिः। त्वद्-
गोचरे सुमनसां यदि वा मुनीश! गच्छन्ति नूनमध एव
हि बन्धनानि ॥२०॥ स्थाने गभीरहृदयोदधिसम्भवायाः,
पीयूषतां तव गिरः समुदीरयन्ति। पीत्वा यतः परमसं-
मदसंगभाजो, भव्या व्रजन्ति तरसाप्यजरामरत्वम्। २१॥
स्वामिन्सुदूरमवनम्य समुत्पतन्तो, मन्ये वदन्ति शुचयः
सुरचामरौघाः। येऽस्मै नतिं विदधते मुनिपुङ्गवाय, ते
नूनमूर्ध्वगतयः खलु शुद्धभावाः ॥२२॥ श्यामं गभीरगिरि-
मुज्ज्वलहेमरत्न–सिंहासनस्थमिह भव्यशिखण्डिनस्त्वाम्।
आलोकयन्ति रभसेन नदन्तमुच्चैश्चामीकराद्रिशिरसीव
नवाम्बुवाहम् ॥२३॥ उद्गच्छता तव शितिद्युतिमण्डलेन,
लुप्तच्छदच्छविरशोकतरुर्बभूव। सांनिध्यतोऽपि यदि वा
वीतराग! नीरागतां व्रजति को न सचेतनोऽपि ॥२४॥
भोः प्रमादमवधूय भजध्वमेन–मागत्य निर्वृतिपुरीं प्रति

सार्थवाहम् । एतन्निवेदयति देव जगत्त्रयाय, मन्ये नदन्नभिनभः सुरदुन्दुभिस्ते ॥२५॥ उद्द्योतितेषु भवता भुवनेषु नाथ, तारान्वितो विधुरयं विहताधिकारः । मुक्ताकलापकलितोरुसितातपत्र व्याजात्त्रिधाधृततनुर्ध्रुवमभ्युपेतः ॥२६। स्वेन प्रपूरितजगत्त्रयपिण्डितेन, कान्तिप्रतापयशसामिव संचयेन । माणिक्यहेमरजतप्रविनिर्मितेन, सालत्रयेण भगवन्नभितो विभासि ॥२७। दिव्यस्रजो जिन नमत्त्रिदशाधिपाना–मुत्सृज्य रत्नरचितानपि मौलिबन्धान् । पादौ श्रयन्ति भवतो यदि वापरत्र, त्वत्सङ्गमे सुमनसो न रमन्त एव ॥२८॥ त्वं नाथ जन्मजल–धेर्विपराङ्मुखोऽपि, यत्तारयस्यसुमतो निजपृष्ठलग्नान् । युक्तं हि पार्थिवनिपस्य सतस्तवैव, चित्रं विभो यदसि कर्मविपाकशून्यः ॥२९॥ विश्वेश्वरोऽपि जनपालक दुर्गतस्त्वं, किं वाक्षरप्रकृतिरप्यलिपिस्त्वमीश । अज्ञानवत्यपि सदैव कथंचिदेव,ज्ञानं त्वयि स्फुरति विश्वविकासहेतु ३० प्राग्भारसम्भृतनभांसि रजांसि रोषा-दुत्थापितानि कमठेन शठेन यानि । छायापि तैस्तव न नाथ हता हताशो, ग्रस्तस्त्वमीभिरयमेव परं दुरात्मा ॥३१॥ यद्गर्जदूर्जितघनौघमदभ्रभीम--भ्रश्यत्तडिन्मुसलमांसलघोरधारम् । दैत्येन मुक्तमथ दुस्तरवारि दध्रे, तेनैव तस्य जिन दुस्तरवारि–कृत्यम् ॥३२॥ ध्वस्तोर्ध्वकेशविकृताकृतिमर्त्यमुण्ड-प्रालंब-

भृङ्गयदवक्त्रविनिर्यदग्निः। प्रेतव्रजः प्रतिभवंतमपीरितो यः, सोऽस्याभवत्प्रतिभवं भवदुःखहेतुः ॥३३॥ धन्यास्त एव भुवनाधिप ये त्रिसंध्य-माराधयन्ति विधिवद्विधुतान्य-कृत्याः। भक्त्योल्लसत्पुलकपक्ष्मलदेहदेशाः, पादद्वयं तव विभो भुवि जन्मभाजः ॥३४॥ अस्मिन्नपारभववारिनिधौ मुनीश, मन्ये न मे श्रवणगोचरतां गतोऽसि। आकर्णिते तु तव गोत्रपवित्रमन्त्रे, किं वा विपद्विषधरी सविधं समेति ॥३५॥ जन्मांतरेपि तव पादयुगं न देव, मन्ये मया महित-मीहितदानदक्षम्। तेनेह जन्मनि मुनीश पराभवानां, जातो निकेतनमहं मथिताशयानाम् ॥३६॥ नूनं न मोहतिमिरा-वृतलोचनेन, पूर्वं विभो सकृदपि प्रविलोकितोऽसि। मर्मा-विधो विधुरयन्ति हि मामनर्थाः, प्रोद्यत्प्रबन्धगतयः कथम-न्यथैते ॥३७॥ आकर्णितोऽपि महितोऽपि निरीक्षितोऽपि, नूनं न चेतसि मया विधृतोऽसि भक्त्या। जातोऽस्मि तेन जनबान्धव दुःखपात्रं, यस्मात्क्रियाः प्रतिफलंति न भाव-शून्याः ॥३८॥ त्वं नाथ दुःखिजनवत्सल हे शरण्य, कारुण्यपुण्यवसते वशिनां वरेण्य। भक्त्या नते मयि महेश दयां विधाय, दुःखांकुरोद्दलनतत्परतां विधेहि ॥३९॥ निःसंख्यसारशरणं शरणं शरण्य-मासाद्य सादितरिपुप्रथि-तावदानम्। त्वत्पादपङ्कजमपि प्रणिधानवन्ध्यो, वन्ध्योऽस्मि चेद् भुवनपावन हा हतोऽस्मि ॥४०॥ देवेन्द्रवन्द्य विदिता-

खिलवस्तुसार, संसारतारक विभो भुवनाधिनाथ। त्रायस्व देव करुणाहृद मां पुनीहि, सीदन्तमद्य भयदव्यसनाम्बुराशेः ॥४१॥ यद्यस्ति नाथ भवदंघ्रिसरोरुहाणां, भक्तेः फलं किमपि सन्ततसंचितायाः। तन्मे त्वदेकशरणस्य शरण्य भूयाः स्वामी त्वमेव भुवनेऽत्र भवान्तरेऽपि ॥४२॥ इत्थं समाहितधियो विधिवज्जिनेन्द्र, सान्द्रोल्लसत्पुलककञ्चुकिताङ्गभागाः। त्वद्बिम्बनिर्मलमुखाम्बुजबद्धलक्ष्या, ये संस्तवं तव विभो रचयन्ति भव्याः ॥४३॥ जननयनकुमुदचन्द्र, प्रभास्वराः स्वर्गसम्पदो भुक्त्वा। ते विगलितमलनिचया, अचिरान्मोक्षं प्रपद्यन्ते ॥४४॥

इति कल्याणमन्दिरस्तोत्रम्।

श्रीवादिराजप्रणीतं

एकीभावस्तोत्रम्

एकीभावं गत इव मया यः स्वयं कर्मबन्धो, घोरं दुःखं भवभवगतो दुर्निवारः करोति। तस्याप्यस्य त्वयि जिनरवे भक्तिरुन्मुक्तये चेज्जेतुं शक्यो भवति न तया कोऽपरस्तापहेतुः ॥१॥ ज्योतीरूपं दुरितनिवहध्वान्तविध्वंसहेतुम्त्वामेवाहुर्जिनवर चिरं तत्त्वविद्याभियुक्ताः, चेतोवासे भवसि च मम स्फारमुद्रासमानस्तस्मिन्नंहः कथमिव तमो वस्तुतो वस्तुमीष्टे ।२ आनन्दाश्रुस्नपितवदनं गद्गदं चाभिजल्पन्

यश्चार्चत त्वयि दृढमनाः स्तोत्रमन्त्रैर्भवन्तम् । तस्याभ्य- स्तादपि च सुचिरं देहवल्मीकमध्यान्निष्कास्यन्ते विविध- विषमव्याधयः काद्रवेयाः ।३। प्रागेवेह त्रिदिवभवनादेष्यता भव्यपुण्यात्, पृथ्वीचक्रं कनकमयतां देव निन्ये त्वयेदम् । ध्यानद्वारं मम रुचिकरं स्वान्तगेहं प्रविष्टस्तत्किं चित्रं जिन वपुरिदं यत्सुवर्णीकरोषि ।।४।। लोकस्यैकस्त्वमसि भग- वन्निर्निमित्तेन बन्धुस्त्वय्येवासौ सकलविषया शक्तिरप्रत्य- नीका । भक्तिस्फीतां चिरमधिवसन्मामिकां चित्तशय्यां, मय्युत्पन्नं कथमिव ततः क्लेशयूथं सहेथाः ।।५।। जन्मा- टव्यां कथमपि मया देव दीर्घं भ्रमित्वा,प्राप्तैवेयं तव नय- कथास्फारपीयूषवापी । तस्या मध्ये हिमकरहिमव्यूहशीते नितान्तं, निर्मग्नं मां न जहति कथं दुःखदावोपतापाः ।६ पादन्यासादपि च पुनतो यात्रया ते त्रिलोकीं, हेमाभासो भवति सुरभिः श्रीनिवासश्च पद्मः । सर्वाङ्गेण स्पृशति भग- वंस्त्वय्यशेषं मनो मे, श्रेयः किं तत्स्वयमहरहर्यन्न मामभ्यु- पैति ।७। पश्यन्तं त्वद्वचनममृतं भक्तिपात्र्या पिबन्तं, कर्मारण्यात्पुरुषमसमानन्दधाम प्रविष्टम् । त्वां दुर्वारस्मर- मदहरं त्वत्प्रसादैकभूमिं, क्रूराकाराः कथमिव रुजाकण्ट- का निर्लुठन्ति ८ पाषाणात्मा तदितरसमः केवलं रत्नमूर्ति- र्मानस्तम्भो भवति च परस्तादृशो रत्नवर्गः । दृष्टिप्राप्तो हरति स कथं मानरोगं नराणां, प्रत्यासत्तिर्यदि न भवत-

स्तस्य तच्छक्तिहेतुः ॥९॥ हृद्यः प्राप्तो मरुदपि भवन्मूर्ति-
शैलोपवाही, सद्यः पुन्सां निरवधिरुजाधूलिबन्धं धुनोति।
ध्यानाहूतो हृदयकमलं यस्य तु त्वं प्रविष्टस्तस्याशक्यः क
इह भुवने देव लोकोपकारः ।१०। जानासि त्वं मम भव-
भवे यच्च यादृक्च दुःखं, जातं यस्य स्मरणमपि मे
शस्त्रवन्निष्पिनष्टि। त्वं सर्वेशः सकृप इति च त्वामुपेतो-
ऽस्मि भक्त्या, यत्कर्तव्यं तदिह विषये देव एव प्रमाणम्
।११। प्रापद् दैवं तव नुतिपदैर्जीवकेनोपदिष्टैः, पापाचारी
मरणसमये सारमेयोऽपि सौख्यम्। कः संदेहो यदुपलभते
वासवश्रीप्रभुत्वं, जल्पञ्जाप्यैर्मणिभिरमलैस्त्वन्नमस्कार-
चक्रम ॥१२। शुद्धे ज्ञाने शुचिनि चरिते सत्यपि त्वय्यनीचा
भक्तिर्नो चेदनवधिसुखावञ्चिकाकुञ्चिकेयम्। शक्योद्घाटं
भवति हि कथं मुक्तिकामस्य पुन्सो, मुक्तिद्वारं परिदृढमहा-
मोहमुद्राकवाटम् ॥१३। प्रच्छन्नः खल्वयमघमयैरन्धकारैः
समन्तात्, पन्था मुक्तेः स्थपुटितपदैः क्लेशगर्तैरगाधैः।
तत्कस्तेन व्रजति सुखतो देव तत्त्वावभासी, यद्यग्रेऽग्रे न
भवति भवद्भारतीरत्नदीपः ।१४। आत्मज्योतिर्निधिरनवधि-
र्द्रष्टुरानन्दहेतुः, कर्मक्षोणीपटलपिहितो योऽनवाप्यः परे-
षाम्। हस्ते कुर्वन्त्यनतिचिरतस्तं भवद्भक्तिभाजः, स्तोत्रै-
र्बन्धप्रकृतिपुरुषोद्दामधात्रीखनित्रैः ॥१५। प्रत्युत्पन्ना नय-
हिमगिरेरायता चामृताब्धेः, या देव त्वत्पदकमलयोः सङ्गता

भक्तिगङ्गा । चेतस्तस्यां मम रुचिवशादाप्लुतं क्षालितांहः कल्माषं यद्भवति किमियं देव संदेहभूमिः ॥१६। प्रादुर्भूत स्थिरपदसुख त्वामनुध्यायतो मे, त्वय्येवाहं स इति मतिरुत्पद्यते निर्विकल्पा । मिथ्यैवेयं तदपि तनुते तृप्तिमभ्रेपरूपां दोषात्मानोऽप्यभिमतफलास्त्वत्प्रसादाद्भवन्ति ।१७। मिथ्यावादं मलमपनुदन्सप्तभङ्गीतरंगैर्वागम्भोधिर्भुवनमखिलं देव पर्येति यस्ते । तस्यावृत्तिं सपदि विबुधाश्चेतसैवाचलेन,व्यातन्वन्तः सुचिरममृतासेवया तृप्नुवन्ति ॥१८॥ आहार्येभ्यः स्पृहयति परं यः स्वभावादहृद्यः,शस्त्रग्राही भवति सततं वैरिणा यश्च शक्यः । सर्वाङ्गेषु त्वमसि सुभगस्त्वं न शक्यः परेषां, नत्किं भूषावसनकुसुमैः किं च शस्त्रैरुदस्त्रैः ॥१९। इन्द्रः सेवां तव सुकुरुतां किं तया श्लाघनं ते, तस्यैवेयं भवलयकरी श्लाघ्यतामातनोति । त्वं निस्तारी जननजलधेः सिद्धिकान्तापतिस्त्वं,त्वं लोकानां प्रभुरिति तव श्लाघ्यते स्तोत्रमित्थम् ॥२०॥ वृत्तिर्वाचामपरसदृशी न त्वमन्येन तुल्यःस्तुत्युद्गाराः कथमिव ततस्त्वय्यमी नः क्रमन्ते । मैवं भूवंस्तदपि भगवन्भक्तिपीयूषपुष्टास्ते भव्यानामभिमतफलाः पारिजाता भवन्ति ॥२१॥ कोपावेशो न तव न तव क्वापि देव प्रसादो, व्याप्तं चेतस्तव हि परमोपेक्षयैवानपेक्षम् । आज्ञावश्यं तदपि भुवनं संनिधिर्वैरहारी,क्वैवं भूतं

भुवनतिलक प्राभवं त्वत्परेषु ॥२२॥ देव स्तोतुं त्रिदिवगणिकामण्डलीगीतकीर्ति, तोतूर्ति त्वां सकलविषयज्ञानमूर्ति जनो यः। तस्य क्षेमं न पदमटतो जातु जोहूर्ति पन्थास्तत्त्वग्रन्थस्मरणविषये नैष मोमूर्ति मर्त्यः ॥२३॥ चित्ते कुर्वन्निरवधिसुखज्ञानदृग्वीर्यरूपं,देव त्वां यः समयनियमादादरेण स्तवीति। श्रेयोमार्गं स खलु सुकृती तावता पूरयित्वा, कल्याणानां भवति विषयः पंचधा पंचितानाम् ॥२४॥ भक्तिप्रह्वमहेन्द्रपूजितपद त्वत्कीर्तने न क्षमाः, सूक्ष्मज्ञानदृशोऽपि संयमभृतः के हन्त मन्दा वयम्। अस्माभिः स्तवनच्छलेन तु परस्त्वय्यादरस्तन्यते स्वात्माधीनसुखैषिणां स खलु नः कल्याणकल्पद्रुमः ॥२५॥ वादिराजमनु शाब्दिकलोको, वादिराजमनु तार्किकसिंहः। वादिराजमनु काव्यकृतस्ते, वादिराजमनु भव्यसहायः ॥२६॥

इति श्रीवादिराजकृतमेकीभावस्तोत्रम्

अथ श्रीधनंजयकविप्रणीतं

विषापहारस्तोत्रम्

स्वात्मस्थितः सर्वगतः समस्तव्यापारवेदी विनिवृत्तसङ्गः। प्रवृद्धकालोऽप्यजरो वरेण्यः पायादपायात्पुरुषः पुराणः ॥१॥
परैरचिन्त्यं युगभारमेकः, स्तोतुं वहन्योगिभिरप्यशक्यः।

स्तुत्योऽद्य मेऽसौ वृषभो न भानोः,किमप्रवेशे विशति प्रदीपः
तत्याज शक्रः शक्तनाभिमानं,नाहं त्यजामि स्तवनानुबन्धम्
स्वल्पेन बोधेन ततोऽधिकार्थं वातायनेनेव निरूपयामि ॥३॥
त्वं विश्वदृश्वा सकलैरदृश्यो, विद्वानशेषं निखिलैरवेद्यः ।
वक्तुं कियान्कीदृशमित्यशक्यः, स्तुतिस्ततोऽशक्तिकथा
तवास्तु ॥ ४ ॥ व्यापीडितं बालमिवात्मदोषैरुल्लाघतां
लोकमवापिपस्त्वम् । हिताहितान्वेषणमान्द्यभाजः सर्वस्य
जन्तोरसि बालवैद्यः ॥५॥ दाता न हर्ता दिवसं विवस्वा-
नद्य श्व इत्यच्युतदर्शिताशः । सव्याजमेवं गमयत्यशक्तः
क्षणेन दत्सेऽभिमतं नताय ॥६॥ उपैति भक्त्या सुमुखः
सुखानि त्वयि स्वभावाद्विमुखश्च दुःखम् । सदावदातद्यु-
तिरेकरूपस्तयोस्त्वमादर्श इवाऽवभासि ॥७॥ अगाध-
ताऽब्धेः स यतः पयोधिर्मेरोश्च तुङ्गा प्रकृतिः स यत्र ।
द्यावापृथिव्योः पृथुता तथैव व्याप त्वदीया भुवनान्तराणि
॥८॥ तवानवस्था परमार्थतत्त्वं त्वया न गीतः पुनरागमश्च,
दृष्टं विहाय त्वमदृष्टमैषीर्विरुद्धवृत्तोऽपि समंजसस्त्वम् ॥९॥
स्मरः सुदग्धो भवतैव तस्मिन्नुद्धूलितात्मा यदि नाम
शम्भुः । अशेत वृन्दोपहतोपि विष्णुः,किं गृह्यते येन भवा-
नजागः ॥१०॥ स नीरजाः स्यादपरोघवान्वा तद्दोषकी-
र्त्यैव न ते गुणित्वम् । स्वतोम्बुराशेर्महिमा न देव,
स्तोकापवादेन जलाशयस्य ॥११॥ कर्मस्थितिं जन्तुरनेक-

भूमिं नयत्यमुं सा च परस्परस्य । त्वं नेतृभावं हि तयो-र्भवाब्धौ, जिनेन्द्र नौनाविकयोरिवाख्यः ॥१२॥ सुखाय दुःखानि गुणाय दोषान्, धर्माय पापानि समाचरन्ति । तैलाय बालाः सिकतासमूहं, निपीडयन्ति स्फुटमत्वदीयाः ॥१३॥ विषापहारं मणिमौषधानि, मन्त्रं समुद्दिश्य रसायनं च । भ्राम्यन्त्यहो न त्वमिति स्मरन्ति, पर्यायनामानि तवैव तानि ॥१४॥ चित्ते न किञ्चित्कृतवानसि त्वं, देवः कृतश्चेतसि येन सर्वम् । हस्ते कृतं तेन जगद्विचित्रं, सुखेन जीवत्यपि चित्तबाह्यः ॥१५॥ त्रिकालतत्त्वं त्वमवैस्त्रिलोकीस्वामीति संख्या नियतेरमीषाम्, बोधाधिपत्यं प्रति नाभविष्यंस्तेऽन्येपि चेद् व्याप्स्यदमूनपीदम् ॥१६॥ नाकस्य पत्युः परिकर्म रम्यं, नागम्यरूपस्य तवोपकारि । तस्यैव हेतुः स्वसुखस्य भानोरुद्बिभ्रतश्छत्रमिवादरेण ॥१७॥ क्वोपेक्षकस्त्वं क्व सुखोपदेशः, स चेत् किमिच्छाप्रतिकूलवादः क्वासौ क्व वा सर्वजगत्प्रियत्वं, तन्नो यथातथ्यमवेविजं ते ॥१८॥ तुङ्गात्फलं यत्तदकिंचनाच्च प्राप्यं समृद्धान्न धनेश्वरादेः । निरम्भसोप्युच्चतमादिवाद्रेर्नैकापि निर्याति धुनी पयोधेः ॥१९॥ त्रैलोक्यसेवानियमाय दण्डं दध्रे यदिन्द्रो विनयेन तस्य । तत्प्रातिहार्यं भवतः कुतस्त्यं तत्कर्मयोगाद्यदि वा तवास्तु ॥२०॥ श्रिया परं पश्यति साधु निःस्वः श्रीमान्न कश्चित्कृपणं त्वदन्यः । यथा

प्रकाशस्थितमन्धकार–स्थायीन्नतेसौ न तथा तमःस्थम् २१
स्ववृद्धिनिःश्वासनिमेषभाजि प्रत्यक्षमात्मानुभवेपि मूढः।
किंवाखिलज्ञे यविवर्तिबोध–स्वरूपमध्यक्षमवैति लोकः २२
तस्यात्मजस्तस्य पितेति देवः त्वां येऽवगायन्ति कुलं
प्रकाश्य। तेऽद्यापि नन्वाश्मनमित्यवश्यं, पाणौ कृतं हेम
पुनस्त्यजन्ति ॥२३॥ दत्तस्त्रिलोक्यां पटहोऽभिभूताः
सुरासुरास्तस्य महान्स लाभः। मोहस्य मोहस्त्वयि को
विरोद्धुमूलस्य नाशो बलवद्विरोधः।२४। मार्गस्त्वयैको
ददृशे विमुक्तेश्चतुर्गतीनां गहनं परेण। सर्वं मया दृष्टमिति
स्मयेन, त्वं मा कदाचिद् भुजमालुलोके।२५। स्वर्भानुर-
र्कस्य हविर्भुजोऽम्भः कल्पान्तवातोम्बुनिधेर्विघातः।
संसारभोगस्य वियोगभावो विपक्षपूर्वाभ्युदयास्त्वदन्ये २६
अजानतस्त्वां नमतः फलं यत्तज्जानतोऽन्यं न तु देवतेति।
हरन्मणिं काचधिया दधानस्तं तस्य बुद्ध्या वहतो न रिक्तः,
प्रशस्तवाचश्चतुराः कषायैः, दग्धस्य देवव्यवहारमाहुः।
गतस्य दीपस्य हि नन्दितत्वं,दृष्टं कपालस्य च मङ्गलत्वम्
॥२८॥ नानार्थमेकार्थमदस्त्वदुक्तं, हितं वचस्ते निशमय्य
वक्तुः। निर्दोषतां के न विभावयन्ति, ज्वरेण मुक्तः सुगमः
स्वरेण ॥२९। न क्वापि वाञ्छा ववृते च वाक्ते, काले
क्वचित्कोऽपि तथा नियोगः। न पूरयाम्यंबुधिमित्युदंशुः
स्वयं हि शीतद्युतिरभ्युदेति ॥३०॥ गुणा गभीराः परमाः

प्रसन्ना बहुप्रकारा बहवस्तवेति । दृष्टोऽयमन्तः स्तवने न तेषां गुणो गुणानां किमतः परोऽस्ति ।३१।। स्तुत्या परं नाभिमतं हि भक्त्या स्मृत्या प्रणत्या च ततो भजामि, स्मरामि देवं प्रणमामि नित्यं, केनाप्युपायेन फलं हि साध्यम् ।३२। ततस्त्रिलोकीनगराधिदेवं, नित्यं परं ज्योतिरनन्तशक्तिम् । अपुण्यपापं परपुण्यहेतुं नमाम्यहं वन्द्यमवन्दितारम् ।।३३।। अशब्दमस्पर्शमरूपगन्धं, त्वां नीरसं तद्विषयावबोधम्, सर्वस्य मातारममेयमन्यैर्जिनेन्द्रमस्मार्यमनुस्मरामि ।३४।। अगाधमन्यैर्मनसाऽप्यलंघ्यं, निष्किञ्चनं प्रार्थितमर्थवद्भिः । विश्वस्य पारं तमदृष्टपारं,पतिं जिनानां शरणं व्रजामि ३५ त्रैलोक्यदीक्षागुरवे नमस्ते,यो वर्धमानोपि निजोन्नतोभूत् । प्राग्गण्डशैलः पुनरद्रिकल्पः, पश्चान्नमेरुः कुलपर्वतोभूत ।३६ । स्वयं प्रकाशस्य दिवा निशा वा,न बाध्यता यस्य न बाधकत्वम् । न लाघवं गौरवमेकरूपं, वन्दे विभुं कालकलामतीतम् ।।३७।। इति स्तुतिं देव विधाय दैन्याद्वरं न याचे त्वमुपेक्षकोसि । छाया तरुं संश्रयतः स्वतः स्यात्, कश्छायया याचितयात्मलाभः ।।३८।। अथास्ति दित्सा यदि वोपरोधस्त्वय्येव सक्तां दिश भक्तिबुद्धिम् । करिष्यते देव तथा कृपां मे को वात्मपोष्ये सुमुखो न सूरिः ।।३९।। वितरति विहिता यथा कथंचिज्जिन विनताय मनीषितानि भक्तिः । त्वयि नुतिविषया

पुनर्विशेषाद्दिशन्ति सुखानि यशो धनं जयं च ॥४०॥

इति श्रीधनंजयकृतं विषापहारस्तोत्रम् ।

श्री भूपालकविप्रणीता

जिनचतुर्विंशतिका

श्रीलीलायतनं महीकुलगृहं कीर्तिप्रमोदास्पदं, वाग्देवी-रतिकेतनं जयरमाक्रीडानिधानं महत् । स स्यात्सर्वमहोत्सवैकभवनं यः प्रार्थितार्थप्रदं प्रातः पश्यति कल्पपादपदलच्छायं जिनांघ्रिद्वयम् ॥१॥ शान्तं वपुः श्रवणहारि वचश्चरित्रं, सर्वोपकारि तव देव ततः श्रुतज्ञाः । संसारमारवमहास्थलरुद्रसान्द्र—च्छायामहीरुह भवन्तमुपाश्रयंते ॥२॥ स्वामिन्नद्य विनिर्गतोऽस्मि जननीगर्भान्धकूपोदरादद्योद्घाटितदृष्टिरस्मि फलवज्जन्मास्मि चाद्य स्फुटम्, त्वामद्राक्षमहं यदक्षयपदानन्दाय लोकत्रयीनेत्रेन्दीवरकाननेन्दुममृतस्यन्दिप्रभाचन्द्रिकम् ३। निःशेषत्रिदशेन्द्रशेखरशिखारत्नप्रदीपावली-सान्द्रीभूतमृगेन्द्रविष्टरतटीमाणिक्यदीपावलिः । क्वेयं श्रीः क्व च निःस्पृहत्वमिदमित्यूहातिगस्त्वादृशः, सर्वज्ञानदृशश्चरित्रमहिमा लोकेश लोकोत्तरः ॥४॥ राज्यं शासनकारिनाकपति यत्त्यक्तं तृणावज्ञया, हेलानिर्दलितत्रिलोकमहिमा यन्मोहमल्लो जितः । लोकालोकमपि स्वबोधमुकुरस्यान्तःकृतं यत् त्वया, सैषाश्चर्यपरम्परा जिन-

चर क्वान्यत्र संभाव्यते ॥५॥ दानं ज्ञानधनाय दत्तमसकृत्पात्राय सद्वृत्तये, चीर्णान्युग्रतपांसि तेन सुचिरं पूजाश्च बह्व्यः कृताः। शीलानां निचयः सहामलगुणैः सर्वः समासादितो, दृष्टस्त्वं जिन येन दृष्टिसुभगः श्रद्धापरेण क्षणम् ॥६॥ प्रज्ञापारमितः स एव भगवान्पारं स एव श्रुतस्कंधाब्धेर्गुणरत्नभूषण इति श्लाघ्यः स एव ध्रुवम्। नीयन्ते जिन येन कर्णहृदयालंकारतां त्वद्गुणाः, संसाराहिविषापहारमणयस्त्रैलोक्यचूडामणे ॥७॥ जयति दिविजवृन्दान्दोलितैरिन्दुरोचिर्निचयरुचिभिरुच्चैश्चामरैर्वीज्यमानः। जिनपतिरनुरज्यन्मुक्तिसाम्राज्यलक्ष्मी-युवतिनवकटाक्षक्षेपलीलां दधानैः ॥८॥ देवः श्वेतातपत्रत्रयचमरिरुहाशोकभाश्चक्रभाषा-पुष्पौघासारसिंहासनसुरपटहैरष्टभिः प्रातिहार्यैः। साश्चर्यैर्भ्राजमानः सुरमनुजसभाम्भोजिनीभानुमाली, पायान्नः पादपीठीकृतसकलजगत्पालमौलिर्जिनेन्द्रः ॥ ९ ॥ नृत्यत्स्वर्दन्तिदन्ताम्बुरुहनटन्नाकनारीनिकायः, सद्यस्त्रैलोक्ययात्रोत्सवकरनिनदातोद्यमाद्यन्निलिम्पः। हस्ताम्भोजातलीलाविनिहितसुमनोदामरम्यामरस्त्रीकाम्यः कल्याणपूजाविधिषु विजयते देव देवागमस्ते ॥ १० ॥ चक्षुष्मानहमेव देव भुवने नेत्रामृतस्यन्दिनं, त्वद्वक्त्रेन्दुमतिप्रसादसुभगैस्तेजोभिरुद्भासितम्। येनालोकयता मयाऽनतिचिराच्चक्षुः कृतार्थीकृतं, द्रष्टव्यावधिवीक्षणव्यतिकर

म्याजृम्भमाणोत्सवम् ।११। कन्तोः सकान्तमपि मल्लमवैति कश्चिन्मुग्धो मुकुन्दमरविन्दजमिन्दुमौलिम्। मोघीकृतत्रिदशयोषिदपाङ्गपातस्तस्य त्वमेव विजयी जिनराजमल्लः ।।१२।' किसलयितमनल्पं त्वद्विलोकाभिलाषात्कुसुमितमतिसान्द्रं त्वत्समीपप्रयाणात्, मम फलितममन्दं त्वन्मुखेन्दोरिदानीं नयनपथमवाप्ताद्देव पुण्यद्रुमेण १३ त्रिभुवनवनपुष्पयत्पुष्पकोदण्डदर्पप्रसरदभिनवाम्भोमुक्तिसूक्तिप्रसूतिः। स जयति जिनराजव्रातजीमूतसङ्घः,शतमखशिखिनृत्यारम्भनिर्बन्धबन्धुः ।।१४।। भूपालस्वर्गपालप्रमुखनरसुरश्रेणिनेत्रालिमालालीलाचैत्यस्य चैत्यालयमखिलजगत्कौमुदीन्दोर्जिनस्य उत्तंसीभूतसेवाञ्जलिपुटनलिनीकुड्मलास्त्रिः परीत्य, श्रीपादच्छाययापस्थितभवदवथुः संश्रितोऽस्मीव मुक्तिम् १५ देव त्वदंघ्रिनखमण्डलदर्पणेऽस्मिन्नर्घ्ये निसर्गरुचिरे चिरदृष्टवक्त्रः। श्रीकीर्तिकान्तिधृतिसङ्गमकारणानि, भव्यो न कानि लभते शुभमङ्गलानि ।।१६।। जयति सुरनरेन्द्रश्रीसुधानिर्झरिण्याः, कुलधरणिधरोऽयं जैनचैत्याभिरामः। प्रविपुलफलधर्मानोकहाग्रप्रवाल—प्रसरशिखरशुम्भत्केतनः श्रीनिकेतः ।।१७।। विनमदमरकान्ताकुन्तलाक्रान्तकान्तिस्फुरितनखमयूखद्योतिताशान्तरालः। दिविजमनुजराजव्रातपूज्यक्रमाब्जो, जयति विजितकर्मारातिजालो जिनेन्द्रः ।।१८।। सुप्तोत्थितेन सुमुखेन सुमङ्गलाय, द्रष्टव्यमस्ति

यदि मङ्गलमेव वस्तु। अन्येन किं तदिह नाथ तवैव वक्त्रं त्रैलोक्यमङ्गलनिकेतनमीक्षणीयम् ॥१९॥ त्वं धर्मोदयतापसाश्रमशुकस्त्वं काव्यबन्धक्रम-क्रीडानन्दनकोकिलस्त्वमुचितः श्रीमल्लिकाषट्पदः। त्वं पुन्नागकथारविन्दसरसीहंसस्त्वमुत्तंसकैः,कैर्भूपाल न धार्यसे गुणमणिस्रङ्मालिभिर्मौलिभिः ॥२०॥ शिवसुखमजरश्रीसङ्गमं चाभिलष्य, स्वमभिनिगमयन्ति क्लेशपाशेन केचित्। वयमिह तु वचस्ते भूपतेर्भावयन्तस्तदुभयमपि शश्वल्लीलया निर्विशामः ।२१। देवेन्द्रास्तव मज्जनानि विदधुर्देवाङ्गना मंगलान्यापेठुः शरदिन्दुनिर्मलयशो गन्धर्वदेवा जगुः। शेषाश्चापि यथानियोगमखिलाः सेवां सुराश्चक्रिरे,तत्किं देव! वयं विदध्म इति नश्चित्तं तु दोलायते ॥२२॥ देव त्वज्जननाभिषेकसमये रोमाञ्चसत्कञ्चुकैः,देवेन्द्रैर्यदनर्ति नर्तनविधौ लब्धप्रभावैः स्फुटम्। किंचान्यत्सुरसुन्दरीकुचतटप्रान्तावनद्धोत्तम-प्रेङ्खद्वल्लकिनादझंकृतमहो तत्केन संवर्ण्यते ॥२३॥ देव त्वत्प्रतिबिम्बमम्बुजदलस्मेरेक्षणं पश्यतां,यत्रास्माकमहो महोत्सवरसो दृष्टेरियान्वर्तते साक्षात्तत्रभवन्तमीक्षितवतां कल्याणकाले तदा, देवानामनिमेषलोचनतया वृत्तः स किं वर्ण्यते ॥२४॥ दृष्टं धाम रसायनस्य महतां दृष्टं निधीनां पदं, दृष्टं सिद्धरसस्य सद्म सदनं दृष्टं च चिन्तामणेः। किं दृष्टैरथवानुषङ्गिकफलैरेभिर्मयाद्य ध्रुवं दृष्टं मुक्तिविवाह-

मङ्गलगृहं दृष्टे जिनश्रीगृहे ॥२८॥ दृष्टस्त्वं जिनराजचन्द्र विकसद्भूपेन्द्रनेत्रोत्पलैः, स्नातं त्वन्नुतिचन्द्रिकाम्भसि भवद्विद्वच्चकोरोत्सवे । नीतश्चाद्य निदाघजः क्लमभरः शांतिं मया गम्यते, देव त्वद्गतचेतसैव भवतो भूयात्पुनर्दर्शनम् ॥२९॥

इति जिनचतुर्विंशतिका

अकलंकस्तोत्र

शार्दूलविक्रीडितछंदः ।

त्रैलोक्यं सकलं त्रिकालविषयं सालोकमालोकितं, साक्षाद्येन यथा स्वयं करतले रेखात्रयं सांगुलि । रागद्वेष भयामयान्तकजरालोलत्वलोभादयो, नालं यत्पदलंघनाय स महादेवो मया वंद्यते ॥१॥ दग्धं येन पुरत्रयं शरभुवा तीव्रार्चिषा वह्निना, यो वा नृत्यति मत्तवत्पितृवने यस्यात्मजो वा गुहः । सोऽयं किं मम शंकरो भयतृषारोषार्ति मोहक्षयं, कृत्वा यः स तु सर्वविक्तनुभृतां क्षेमंकरः शंकरः ॥२॥ यत्नाद्येन विदारितं कररुहैर्दैत्येन्द्रवक्षःस्थलं, सारथ्येन धनंजयस्य समरे योऽमारयत्कौरवान् । नासौ विष्णुरनेककालविषयं यज्ज्ञानमव्याहतं, विश्वं व्याप्य विजृंभते स तु महाविष्णुः सदेष्टो मम ॥३॥ उर्वश्यामुदपादि रागबहुलं चेतो यदीयं पुनः, पात्रीदंडकमंडलुप्रभृतयो यस्याकृतार्थस्थितिम् । आविर्भावयितुं भवंति स कथं ब्रह्मा भवे-

न्मादृशां, क्षुत्तृष्णाश्रमरागरोगरहितो ब्रह्मा कृतार्थोऽस्तु नः ॥४॥ यो जग्ध्वा पिशितं समत्स्यकवलं जीवं च शून्यं वदन्, कर्त्ता कर्मफलं न भुंक्त इति यो वक्ता स बुद्धः कथम्। यज्ज्ञानं क्षणवृत्ति वस्तुसकलं ज्ञातुं न शक्तं सदा, यो जानन्युगपज्जगत्त्रयमिदं साक्षात् स बुद्धो मम ॥५॥

स्रग्धरा छन्द।

ईशः किं छिन्नलिंगो यदि विगतभयः शूलपाणिः कथं स्यात्, नाथः किं भैक्ष्यचारी यतिरिति स कथं सांगनः सात्मजश्च। आर्द्राजः किंत्वजन्मा सकलविदिति किं वेत्ति नात्मान्तरायं, संक्षेपात्सम्यगुक्तं पशुपतिमपशुः कोऽत्र धीमानुपास्ते ।६। ब्रह्मा चर्माक्षसूत्री सुरयुवतिरसावेशविभ्रान्तचेताः, शम्भुः खट्वांगधारी गिरिपतितनयापांगलीलानुविद्धः। विष्णुश्चक्राधिपः सन्दुहितरमगमद् गोपनाथस्य मोहादर्हन्विध्वस्तरागो जितसकलभयः कोऽयमेष्वाप्तनाथः ॥७॥ एको नृत्यति विप्रसार्य ककुभां चक्रे सहस्रं भुजानेकः शेषभुजंगभोगशयने व्यादाय निद्रायते। दृष्टुं चारुतिलोत्तमामुखमगादेकश्चतुर्वक्त्रता—मेते मुक्तिपथं वदंति विदुषामित्येतदत्यद्भुतम् ॥८॥ यो विश्वं वेद वेद्यं जननजलनिधेर्भंगिनः पारदृश्वा, पौर्वापर्याविरुद्धं वचनमनुपमं निष्कलंकं यदीयम्। तं वंदे साधुवंद्यं सकलगुणनिधिं ध्वस्तदोषद्विषन्त बुद्धं वा वर्द्धमानं शतद-

लनिलयं केशवं वा शिवं वा ।९। माया नास्ति जटाकपा-लमुकुटं चन्द्रो न मूर्द्धावली, खट्वांगं न च वासुकिर्न च धनुः शूलं न चोग्रं मुखं । कामो यस्य न कामिनी न च वृषो गीतं न नृत्यं पुनः, सोऽस्मान्पातु निरंजनो जिनपतिः सर्वत्र सूक्ष्मः शिवः ॥१०॥ नो ब्रह्मांकितभूतलं न च हरेः शम्भोर्न मुद्रांकितं, नो चन्द्रार्ककरांकितं सुरपतेर्वज्रांकितं नैव च । षड्वक्त्रांकितबौद्धदेवहुतभुग्यक्षोरगैर्नांकितं नग्नं पश्यत वादिनो जगदिदं जैनेन्द्रमुद्रांकितं ।११॥ मौंजीदंडकमंडलुप्रभृतयो नो लाञ्छनं ब्रह्मणो, रुद्रस्यापि जटाकपालमुकुटं कौपीनखट्वांगना । विष्णोश्चक्रगदादि शंखमतुलं बुद्धस्य रक्ताम्बरं, नग्नं पश्यत वादिनो जगदिदं जैनेन्द्रमुद्रांकितं १२ नाहंकारवशीकृतेन मनसा न द्वेषिणा केवलं, नैरात्म्यं प्रतिपद्य नश्यति जने कारुण्यबुद्धया मया । राज्ञः श्रीहिमशीतलस्य सदसि प्रायो विदग्धात्मनो बौद्धौघान्सकलान् विजित्य स घटः पादेन विस्फालितः ॥१३॥ खट्वांगं नैव हस्ते न च हृदि रचिता लम्बते मुण्डमाला, भस्मांगं नैव शूलं न च गिरिदुहिता नैव हस्ते कपालं । चन्द्रार्द्धं नैव मूर्द्धन्यपि वृषगमनं नैव कंठे फणीन्द्रः, तं वन्दे त्यक्तदोषं भवभयमथनं चेश्वरं देवदेवम् ॥१४॥ किं वाद्यो भगवानमेयमहिमाः देवोकलंक कलौ, काले यो जनतासु धर्मनिहितो देवोऽकलंको जिनः । यस्य

स्फारविवेकमुद्गलहरीजाले प्रमेयाकुला, निर्मग्ना तनुतेतरां भगवती तारा शिरःकम्पनम् ॥१५॥ सा तारा खलु देवता भगवतीमन्यापि मन्यामहे, षण्मासावधिजाड्यसांख्यभगवद्भट्टाकलंकप्रभोः । वाक्कल्लोलपरम्पराभिरमते नूनं मनोमज्जन-व्यापारं सहते स्म विस्मितमतिः सन्ताडितेतस्ततः ॥१६ ॥

इति अकलंकस्तोत्रम् ।

सुप्रभातस्तोत्रम्

यत्स्वर्गावतरोत्सवे यदभवज्जन्माभिषेकोत्सवे, यद्दीक्षाग्रहणोत्सवे यदखिलज्ञानप्रकाशोत्सवे । यन्निर्वाणगमोत्सवे जिनपतेः पूजाद्भुतं तद्भवैः, संगीतस्तुतिमंगलैः प्रसरतां मे सुप्रभातोत्सवः ॥१॥ श्रीमन्नतामरकिरीटमणिप्रभाभिरालीढपादयुगदुर्द्धरकर्मदूर । श्रीनाभिनन्दन जिनाजितशंभवाख्य, त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥२॥ छत्रत्रयप्रचलचामरवीज्यमान देवाभिनंदनमुने सुमते जिनेंद्र, पद्मप्रभारुणमणिद्युतिभासुरांग, त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥३॥ अर्हन् सुपार्श्व कदलीदलवर्णगात्र, प्रालेयतारगिरिमौक्तिकवर्णगौर । चंद्रप्रभस्फटिकपाण्डुर पुष्पदंत, त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥४॥ संततकांचनरुचे जिनशीतलाख्य श्रेयान्विनष्टदुरिताष्टकलंकपंक । बंधूकबंधुररुचे जिनवासुपूज्य, त्वद्ध्यानतोऽस्तु सततं

मम सुप्रभातम् ॥ ५ ॥ उद्दंडदर्पकरिपो त्रिमलामलांग स्थेमन्ननंतजिदनंतसुखांबुराशे। दुष्कर्मकल्मषविवर्जित धर्मनाथ, त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥६॥ देवामरीकुसुमसंन्निभ शांतिनाथ, कुंथो दयागुणविभूषणभूषितांग देवाधिदेव भगवन्नरतीर्थनाथ त्वद्ध्यानतोस्तु सततं मम सुप्रभातम् ।७। यन्मोहमल्लमदभंजनमल्लिनाथ, क्षेमंकराविततथशासनसुव्रताख्य, यत्संपदाप्रशमितो नमिनामधेय, त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ८ तापिच्छगुच्छरुचिरोज्ज्वल नेमिनाथ, घोरोपसर्गविजयिन् जिनपार्श्वनाथ। स्याद्वादसूक्तिमणिदर्पणवर्द्धमान, त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥९॥ प्रालेयनीलहरितारुणपीतभासं, यन्मूर्तिमव्ययसुखावसथं मुनींद्राः। ध्यायंति सप्ततिशतं जिनवल्लभानां, त्वद्ध्यानतोस्तु सततं मम सुप्रभातम् ॥१०॥ सुप्रभातं सुनक्षत्रं, मांगल्यं परिकीर्तितम्। चतुर्विंशतितीर्थानां, सुप्रभातं दिने दिने ॥११॥ सुप्रभातं सुनक्षत्रं श्रेयः प्रत्यभिनंदितम्। देवता ऋषयः सिद्धाः, सुप्रभातं दिने दिने ॥१२॥ सुप्रभातं तवैकस्य, वृषभस्य महात्मनः। येन प्रवर्तितं तीर्थं, भव्यसत्त्वसुखावहम् ॥१३॥ सुप्रभातं जिनेंद्राणां, ज्ञानोन्मीलितचक्षुषां। अज्ञानतिमिरांधानां, नित्यमस्तमितो रविः ॥१४॥ सुप्रभातं जिनेंद्रस्य, वीरः कमललोचनः। येन कर्माटवी दग्धा, शुक्लध्यानोग्र-

वह्निना ॥१५॥ सुप्रभातं सुनक्षत्रं, सुकल्याणं सुमंगलम् । त्रैलोक्यहितकर्तृणां, जिनानामेव शासनम् ॥१६॥

इति सुप्रभातस्तोत्रम् ।

स्व० पं० भागचन्द्रविरचितं

महावीराष्टकस्तोत्रम् ।

शिखरिणी छन्दः

यदीये चैतन्ये मुकुर इव भावाश्चिदचितः, समं भांति ध्रौव्यव्ययजनिलसंतोन्तरहिताः । जगत्साक्षी मार्गप्रगट-नपरो भानुरिव यो, महावीरस्वामी नयनपथगामी भवतु मे (नः) ॥१॥ अताम्रं यच्चक्षुः—कमलयुगलं स्पंदरहितं, जनान्कोपापायं प्रकटयति वाभ्यंतरमपि । स्फुटं मूर्तिर्यस्य प्रशमितमयी वातिविमला, महावीर० ॥२॥ नमन्नाकेन्द्रा-लीमुकुटमणिभाजालजटिलं, लसत्पादांभोजद्वयमिह यदीयं तनुभृतां । भवज्वालाशांत्यै प्रभवति जलं वा स्मृतमपि, महावीर० ॥३॥ यदर्चाभावेन प्रमुदितमना दर्दुर इह, क्षणादासीत्स्वर्गी गुणगणसमृद्धः सुखनिधिः । लभंते सद्भक्ताः शिवसुखसमाजं किमु तदा, महावीर० ॥४॥ कनत्स्वर्णाभासोऽप्यपगततनुर्ज्ञाननिवहो, विचित्रात्माप्येको नृपतिवरसिद्धार्थतनयः । अजन्मापि श्रीमान् विगतभव-रागोऽद्भुतगतिर्, महावीर० ॥५॥ यदीया वाग्गंगा विविध-

नयकल्लोलविमला, बृहज्ज्ञानांभोभिर्जगति जनतां या स्नपयति । इदानीमप्येषा बुधजनमरालैः परिचिताः महावीर० ॥६॥ अनिर्वारोद्रेकस्त्रिभुवनजयी कामसुभटः कुमारावस्थायामपि निजबलाद्येन विजितः । स्फुरन्नित्यानंदप्रशमपदराज्याय स जिनः, महावीर० ॥७॥ महामोहातङ्कप्रशमनपराकस्मिकभिषग्, निरापेक्षो बंधुर्विदितमहिमा मङ्गलकरः । शरण्यः साधूनां भवभयभृतामुत्तमगुणो, महावीर० ॥ ८ ॥

महावीराष्टकं स्तोत्रं, भक्त्या भागेन्दुना कृतं ।
यः पठेच्छृणुयाच्चापि, स याति परमां गतिम् ॥९॥

अथ दृष्टाष्टकस्तोत्रम्

दृष्टं जिनेन्द्रभवनं भवतापहारि, भव्यात्मनां विभवसंभव भूरिहेतु । दुग्धाब्धिफेनधवलोज्ज्वलकूटकोटि—नद्धध्वज प्रकरराजिविराजमानम् ॥१॥ दृष्टं जिनेन्द्रभवनं भुवनैकलक्ष्मीः, धामर्द्धिवर्द्धितमहामुनिसेव्यमानम् । विद्याधरामरवधूजनमुक्तदिव्य— पुष्पाञ्जलिप्रकरशोभितभूमिभागम् ॥२॥ दृष्टं जिनेन्द्रभवनं भवनादिवास—विख्यातनाकगणिकागणगीयमानम् । नानामणिप्रचयभासुररश्मिजालव्यालीढनिर्मलविशालगवाक्षजालम् ॥३॥ दृष्टं जिनेन्द्रभवनं सुरसिद्धयक्ष—गन्धर्वकिन्नरकरार्पितवेणुवीणा । संगी-

तमिश्रितनमस्कृतधीरनादै—रापूरिताम्बरतलोरुदिगन्त-रालम् ॥४॥ दृष्टं जिनेन्द्रभवनं विलसद्विलोल—माला कुलालिललितालकविभ्रमाणम् । माधुर्यवाद्यलयनृत्यवि-लासिनीनां, लीलाचलद्वलयनूपुरनादरम्यम् ॥५॥ दृष्टं जिनेन्द्रभवनं मणिरत्नहेम—सारोज्ज्वलैः कलशचामरदर्प-णाद्यैः । सन्मंगलैः सततमष्टशतप्रभेदै-र्विभ्राजितं विमल मौक्तिकदामशोभम् ॥६॥ दृष्टं जिनेन्द्रभवनं वरदेवदारु कर्पूरचन्दनतरुष्कसुगन्धिधूपैः, मेघायमानगगने पवनाभि-घातचञ्चच्चलद्विमलकेतनतुङ्गशालम् ७ दृष्टं जिनेन्द्रभवनं धवलातपत्रच्छायानिमग्नतनुयक्षकुमारवृन्दैः । दोधू-यमानसितचामरपंक्तिभासं, भामंडलद्युतियुतप्रतिमाभिरा-मम् ॥८॥ दृष्टं जिनेन्द्रभवनं विविधप्रकार—पुष्पोपहार रमणीयसुरत्नभूमि । नित्यं वसंततिलकश्रियमादधानं, सन्मंगलं सकलचन्द्रमुनीन्द्रवन्द्यम् ॥९॥ दृष्टं मयाद्य मणिकाञ्चनचित्रतुङ्गसिंहासनादिजिनबिम्बविभूतियुक्तम् । चैत्यालयं यदतुलं परिकीर्तितं मे, सन्मंगलं सकलचन्द्र-मुनीन्द्रवन्द्यम् ॥१०॥

अथाद्याष्टकस्तोत्रम्

अद्य मे सफलं जन्म नेत्रे च सफले मम ।
त्वामद्राक्षं यतो देव हेतुमक्षयसम्पदः ॥१॥

अद्य संसारगम्भीरपारावारः सुदुस्तरः ।
सुतरोऽयं क्षणेनैव जिनेन्द्र तव दर्शनात् ॥२॥
अद्य मे क्षालितं गात्रं नेत्रे च विमले कृते ।
स्नातोऽहं धर्मतीर्थेषु जिनेन्द्र तव दर्शनात् ॥ ३॥
अद्य मे सफलं जन्म प्रशस्तं सर्वमंगलम् ।
संसारार्णवतीर्णोऽहं जिनेन्द्र तव दर्शनात् ॥४॥
अद्य कर्माष्टकज्वालं विधूतं सकषायकम्
दुर्गतेर्विनिवृत्तोऽहं जिनेन्द्र तव दर्शनात् ॥५॥
अद्य सौम्या ग्रहाः सर्वे शुभाश्चैकादश स्थिताः ।
नष्टानि विघ्नजालानि जिनेन्द्र तव दर्शनात् ॥६॥
अद्य नष्टो महाबन्धः कर्मणां दुःखदायकः ।
सुखसंगसमापन्नो जिनेन्द्र तव दर्शनात् ॥
अद्य कर्माष्टकं नष्टं दुःखोत्पादनकारकम् ।
सुखाम्भोधिनिमग्नोऽहं जिनेन्द्र तव दर्शनात् ॥८॥
अद्य मिथ्यान्धकारस्य हन्ता ज्ञानदिवाकरः ।
उदितो मच्छरीरेऽस्मिन् जिनेन्द्र तव दर्शनात् ॥९॥
अद्याहं सुकृतीभूतो निर्धूताशेषकल्मषः ।
भुवनत्रयपूज्योऽहं जिनेन्द्र तव दर्शनात ॥१०॥
अद्याष्टकं पठेद्यस्तु गुणानन्दितमानसः ।
तस्य सर्वार्थसंसिद्धिर्जिनेन्द्र तव दर्शनात् ॥११॥

मंगलाष्टकम्

श्रीमन्नम्रसुरासुरेंद्रमुकुटप्रद्योतरत्नप्रभाभास्वत्पादनखेंदवः प्रवचनांभोधाववस्थायिनः । ये सर्वे जिनसिद्धसूर्यनुगतास्ते पाठकाः साधवः, स्तुत्या योगिजनैश्च पञ्चगुरवः कुर्वंतु मे मंगलम् ॥१॥ सम्यग्दर्शनबोधवृत्तममलं रत्नत्रयं पावनं, मुक्तिश्रीनगराधिनाथजिनपत्युक्तोऽपवर्गप्रदः । धर्मः सूक्तिसुधा च चैत्यमखिलं चैत्यालयं श्र्यालयं,प्रोक्तं च त्रिविधं चतुर्विधममी कुर्वंतु मे मंगलम् २ नाभेयादिजिनाधिपास्त्रिभुवनख्यातास्चतुर्विंशतिः, श्रीमन्तो भरतेश्वरप्रभृतयो ये चक्रिणो द्वादश । ये विष्णुप्रतिविष्णुलांगलधराः सप्तोत्तरा विंशति–स्त्रैकाल्ये प्रथितास्त्रिषष्टिपुरुषाः कुर्वन्तु मे मंगलम्: ।३। देव्योष्टौ च जयादिका द्विगुणिता विद्यादिका देवताः,श्रीतीर्थंकरमातृकाश्च जनका यक्षाश्च यक्ष्यस्तथा । द्वात्रिंशन्त्रिदशाधिपास्तिथिसुरा दिक्कन्यकाश्चाष्टधा, दिक्पाला दश चेत्यमी सुरगणाः कुर्वंतु मे मंगलम् ॥४॥ ये सर्वौषधऋद्धयः सुतपसो वृद्धिंगताः पञ्च ये, ये चाष्टांगमहानिमित्तकुशला येऽष्टाविधाश्चारणाः । पञ्चज्ञानधरास्त्रयोऽपि बलिनो,ये बुद्धिऋद्धीश्वराः, सप्तैते सकलार्चिता गणभृतः कुर्वंतु मे मंगलम् ॥५॥ कैलाशे वृषभस्य निर्वृतिमही वीरस्य पावापुरे, चम्पायां वसुपूज्यसज्जिनपतेः सम्मेदशैलेऽर्हताम् । शेषाणामपि चो-

र्जयन्तशिखरे नेमीश्वरस्यार्हतो, निर्वाणावनयः प्रसिद्ध-
विभवाः कुर्वंतु मे मंगलम् ॥६। ज्योतिर्व्यन्तरभावनामर-
गृहे मेरौ कुलाद्रौ तथा, जम्बूशाल्मलिचैत्यशाखिषु तथा
वक्षाररूप्याद्रिषु। इष्वाकारगिरौ च कुंडलनगे द्वीपे च
नन्दीश्वरे, शैले ये मनुजोत्तरे जिनगृहाः कुर्वंतु मे मंगलं
॥ ७ ॥ यो गर्भावतरोत्सवो भगवतां जन्माभिषेको-
त्सवो, यो जातः परिनिष्क्रमेण विभवो यः केवलज्ञान-
भाक्। यः कैवल्यपुरप्रवेशमहिमा संभावितः स्वर्गिभिः,
कल्याणानि च तानि पंच सततं कुर्वंतु मे मंगलम् ॥८॥
इत्थं श्रीजिनमंगलाष्टकमिदं सौभाग्यसम्पत्प्रदं,
कल्याणेषु महोत्सवेषु सुधियस्तीर्थंकराणामुपः।
ये शृण्वन्ति पठन्ति तैश्च सुजनैर्धर्मार्थकामान्विता,
लक्ष्मीराश्रयते व्यपायरहिता निर्वाणलक्ष्मीरपि ॥९॥

वीतरागस्तोत्रम्

मिश्रित भाषा

शिवं शुद्धबुद्धं परं विश्वनाथं
न देवो न बन्धुर्न कर्ता न कर्म ॥
न अंगं न सङ्गं न स्वेच्छा न कायम्,
चिदानन्दरूपं नमो वीतरागम् ॥१॥
न बन्धो न मोक्षो न रागादिलोभं,

न योगं न भोगं न व्याधिं न शोकम्
न कोपं न मानं न मायं न लोभम्,
चिदानन्दरूपं नमो वीतरागम् ॥२॥
न हस्तौ न पादौ न घ्राणं न जिह्वा,
न चक्षुर्न कर्णं न वक्त्रं न निद्रा ॥
न स्वामी न भृत्यं न देवो न मर्त्यः,
चिदानन्दरूपं नमो वीतरागम् ॥३॥
न जन्म न मृत्युः न मोहो न चिन्ता,
न क्षुद्रो न भीतो न कार्श्यं न तन्द्रा ॥
न स्वेदं न खेदं न वर्णं न मुद्रा,
चिदानन्दरूपं नमो वीतरागम् ॥४॥
त्रिदंडे त्रिखंडे हरे विश्वनाथम्,
हृषीकेशविध्वस्तपरमारिजालम् ॥
न पुण्यं न पापं न चाक्षादिपापम्,
चिदानन्दरूपं नमो वीतरागम् ॥
न बालो न वृद्धो न तुच्छो न मूढो,
न खेदं न भेदं न मूर्तिर्न स्वेदः ।
न कृष्णं न शुक्लं न मोहं न तंद्रा,
चिदानन्दरूपं नमो वीतरागम् ॥६॥
न आद्यं न मध्यं न अन्तं न चान्यत् ।
न द्रव्यं न क्षेत्रं न कालो न भावः ।

न शिष्यो गुरुर्नापि न हीनं न दीनम्,
चिदानन्दरूपं नमो वीतरागम् ॥७॥
ज्ञानस्वरूपं स्वयं तत्त्ववेदी,
न पूर्णं न शून्यं न चैत्यं स्वरूपी ॥
न चान्योन्यभिन्नं न परमार्थमेकम्,
चिदानन्दरूपं नमो वीतरागम् ॥८॥
आत्मारामगुणाकरं गुणनिधिं चैतन्यरत्नाकरं ।
सर्वे भूतगतागते सुखदुखे ज्ञाते त्वया सर्वगे ।
त्रैलोक्याधिपते स्वयं स्वमनसा ध्यायन्ति योगीश्वराः ।
वंदे तं हरिवंशहर्षहृदयं श्रीमान् हृदाभ्युद्यताम् ॥९॥

अथ परमानन्दस्तोत्रम्

परमानन्दसंयुक्तं, निर्विकारं निरामयम् ॥
ध्यानहीना न पश्यन्ति, निजदेहे व्यवस्थितम् ।१।
अनंतसुखसम्पन्नं ज्ञानामृतपयोधरम् ॥
अनंतवीर्यसंपन्नं, दर्शनं परमात्मनः ॥२॥
निर्विकारं निराबाधं सर्वसंगविवर्जितम् ।
परमानन्दसम्पन्नं, शुद्धचैतन्यलक्षणम् ॥ ३ ॥
उत्तमा स्वात्मचिंता स्यात्, मोहचिंता च मध्यमा ।
अधमा कामचिंता स्यात्, परचिंताधमाधमा ॥४॥
निर्विकल्पसमुत्पन्नं, ज्ञानमेव सुधारसम् ।
विवेकमंजलिं कृत्वा, तं पिबंति तपस्विनः ॥५॥

सदानन्दमयं जीवं, यो जानाति स पंडितः ।
स सेवते निजात्मानं, परमानंदकारणम् ॥६॥
नलिनाच्च यथा नीरं भिन्नं तिष्ठति सर्वदा ।
सोऽयमात्मा स्वभावेन, देहे तिष्ठति निर्मलः ॥७॥
द्रव्यकर्ममलैर्मुक्तं, भावकर्मविवर्जितम् ।
नोकर्मरहितं सिद्धं, निश्चयेन चिदात्मकम् ॥८॥
आनंदं ब्रह्मणो रूपं, निजदेहे व्यवस्थितम् ।
ध्यानहीना न पश्यन्ति, जात्यन्धा इव भास्करम् ।९।
सद्ध्यानं क्रियते भव्यं, मनो येन विलीयते ।
तत्क्षणं दृश्यते शुद्धं, चिच्चमत्कारलक्षणम् ॥१०॥
ये ध्यानलीना मुनयः प्रधानाः, ते दुःखहीना नियमा-द्भवन्ति । सम्प्राप्य शीघ्रं परमात्मतत्त्वं, ब्रजन्ति मोक्षं क्षणमेकमेव ।११। आंनंदरूपं, परमात्मतत्त्वं, समस्तसंकल्प विकल्पमुक्तम् । स्वभावलीना निवसंति नित्यं, जानाति योगी स्वयमेव तत्त्वं ।१२। निजानंदमयं शुद्धं, निराकारं निरामयम् । अनन्तसुखसम्पन्नं, सर्वसंगविवर्जितम् ॥१३ ।
लोकमात्रप्रमाणोयं, निश्चये न हि संशयः ।
व्यवहारे तनुमात्रः, कथितः परमेश्वरैः ॥१४॥
यत्क्षणं दृश्यते शुद्धं, तत्क्षणं गतविभ्रमः ।
स्वस्थचित्तः स्थिरीभूत्वा, निर्विकल्पसमाधितः ।१५।
स एव परमं ब्रह्म, स एव जिनपुंगवः ।
स एव परमं तत्त्वं, स एव परमो गुरुः ॥ १६ ॥

स एव परमं ज्योतिः, स एव परमं तपः ।
स एव परमं ध्यानं, स एव परमात्मकः ॥ १७ ॥
स एव सर्वकल्याणं, स एव सुखभाजनम् ।
स एव शुद्धचिद्रूपं, स एव परमं शिवः ॥ १८ ॥
स एव परमानंदः, स एव सुखदायकः ।
स एव परमज्ञानं, स एव गुणसागरः ॥ १९ ॥
परमाल्हादसंपन्नं, रागद्वेषविवर्जितम् ।
सोहं तं देहमध्येषु, यो जानाति स पंडितः ॥२०॥
आकाररहितं शुद्धं, स्वस्वरूपे व्यवस्थितम् ।
सिद्धमष्टगुणोपेतं, निर्विकारं निरंजनम् ॥२१॥
तत्सदृशं निजात्मानं, यो जानाति स पंडितः ।
सहजानंदचैतन्यप्रकाशाय महीयसे ॥२२॥
पाषाणेषु यथा हेम, दुग्धमध्ये यथा घृतम् ।
तिलमध्ये यथा तैलं, देहमध्ये तथा शिवः ॥२३॥
काष्ठमध्ये यथा वह्निः, शक्तिरूपेण तिष्ठति ।
अयमात्मा शरीरेषु, यो जानति स पंडितः ॥२४॥

आचार्य शांतिसागर-स्तुतिः ।

पूज्यातिपूज्यैर्यतिभिस्सुवंद्यं, संसारगंभीरसमुद्रसेतुम् । ध्यानैकनिष्ठं गरिमागरिष्ठं,आचार्यवर्यं प्रणमामि नित्यं ॥१॥ ध्यानादिसैन्यं परिवर्ध्य पूर्णं, कर्मारिवर्गं प्रवि-

हत्य वेगात् । नीरागस्वातंत्र्यपदं प्रतिष्ठं, आ० ॥२॥ यो मुख्यसूरिर्मुनिनायकानां, आचारपारं गतवान्समग्रं । ध्यानप्रभावेन प्रवृद्धदीप्तिः, आ० ॥३॥ दुर्जयकं द्वादशधा कषायं, जित्वा निजात्मानुभवैकशुद्ध्या, षष्ठे गुणे सप्तमके गत तं, आ० ।४। आभ्यन्तरो बाह्य उपाधिभारः, दूरीकृतो येन वितृष्णभावात् । दैगम्बरं सुन्दरदिव्यकायं,आ० ॥५॥ धर्मामृतं पाययति प्रभूतं,यो भव्यजीवान् करुणास्वरूपः । स्वात्मस्वरूपं च चकार तेभ्यः, आ० ॥६॥ योऽनेकसाधून् विपर्ययविरक्तान्, निर्ग्रंथलिंगे विधिना चकार । गुरूपरागोपि च वीतरागः, आ० ७ महागभीरं विशदीकृतार्थं, शास्त्राब्धिपारं गतवान् समग्रम् तथापि प्रज्ञामदताविरक्तः, आ० ॥८॥ यथा कुन्दकुन्दः गुरुर्नयपादः, अभूत्साधुसंसेव्यमानप्रपादः । तथैवाधुना लोकपूज्यं यतीन्द्र भजे सूरिवर्यं सदा साधुवंद्यम् ॥९॥ यथा दुष्टजीवेन घोरोपसर्गाः, कृताः पार्श्वनाथे त्रिलोकैकपूज्ये । तथा दुष्टलोकोपसर्गं सहिष्णुं, भजे० ॥१०॥ यतीनामनेके यथा शिष्यवर्गाः, प्रभोः कुन्दकुन्दस्य सूरेरभूवन् । तथैवाधुना साधुसदोहशिष्यम्, भजे० ॥११॥ यथा सूत्रचिह्नं हि रत्नत्रयस्य पुरा भारते पूर्वपूज्यैर्निरुक्तम् । तथैवाधुना सूत्रचिह्नं ददानं भजे० ।१२। शांतेरगारं विनष्टाग्निभारं जगत्कञ्जमित्रं गुणाढ्यं पवित्रम् । वरिष्ठः सुपूज्य गरिष्ठप्र-

धानं, भजे० ॥१३॥ भीमगौडा महाशक्तिशाली, स्वमाता सती सत्यरूपा सुरूपा। तयोः पुत्ररत्नं जिताचारियत्नं भजे० ॥१४॥ जगद्भूरीं कर्तयित्वा कृपार्थों, गृहीत्वा शुभध्यानरूपां स्वभावाम्। प्रपेदे गुणं सप्तमञ्चकहीनं,भ० ॥१५॥ गुणारामनीरं भवाम्भोधितीरं, सदा निर्विकारं गृहीतात्मसारम्। कषायादिदुर्दण्डदोर्दण्डभेदं, भजे० १६ महद्ध्याननिष्ठं महत्सु प्रकृष्टं, महर्षिप्रतिष्ठं वचो यस्य मिष्टम्। चिदानंदरूपे स्वरूपे प्रविष्टं, भजे० ।१७। निर्ग्रंथ साधुमधुपव्रजराजमाना,त्वत्पादपद्मकलिका धवलाभिरामा, नक्षत्रवृन्दपरिवेष्टितचन्द्रबिम्बः, देवैः सुदृष्टिरुचिभिर्मघवा यथा वा ॥१८॥ यत्पादसेवनरता खलु भव्यलोकाः, संसारतो झटिति यांति विरक्तबुद्धिम्। यद्गीः प्रशस्यमहनीयमहेतुका च, पंचाननस्य समतां सदसि व्यनक्ति ॥ १९ ॥ मिथ्यान्धकारपटलं प्रविहाय शीघ्रं, तत्त्वप्रसारकिरणैः सुखदैः समन्तात्,श्रद्धापरायणजनाम्बुजकोरकांश्च, सन्तोषयन् विगततापरविस्त्वमेव ॥ २० ॥ मिथ्यान्धकारपरिमर्दनरश्मिजालं, ज्ञानप्रकाशितजगत्प्रविकाशिसूर्यम्। ध्यानैकताननियतं मुनिराजसेव्यं,आचार्यवर्यगुरुपादमहं नमामि ॥२१॥ गुणास्त्वदीयाः धवलाः गभीराः, सुरेन्द्रनागेन्द्रनरेन्द्रपूज्याः। विभांति सूरे ! तव दिव्यदेहे, ततोसि पूज्यः खलु विश्वलोके ।२२। दर्शं दर्शं

सूरिशान्तस्वरूपं पायं पायं वाक्यपीयूषधाराम्, स्मारं स्मारं तद्गुणान् स्पष्टपादाः, जाताः शान्ताः साधवोऽप्यनेके ॥२३॥ चित्त चित्त शान्तमूर्तेः सुबोधः, बोधे बोधे तत्स्वरूपानुरूपम् । रूपे रूपे स्वात्मवृत्तौ प्रवृत्तिः, वृत्तौ वृत्तौ कुन्थुनेमीन्दुवीराः ॥२४॥ आसीद्यः खलु दक्षिणायनकरः पश्चादुदीच्यां गतः, ज्ञानध्यानतपःप्रभामयवपुः संधारयन् दीप्तिमान् । सम्यग्ज्ञानमरीचिभिर्विकसिता आशाश्च येनाखिलाः, सोऽयं सूरिरपूर्वभानुरुदितो लोके सदा शान्तिदः ॥२५॥ सुखदयाखिलबोधविधानया, विधिविशाखिकठोरकुठारया । विगतरागगुरुर्जिनदीक्षया, तरति तारयति भ्रमजालतः ॥२६॥

आचार्यश्रीमदुमास्वामिविरचितं

तत्त्वार्थसूत्रम् ।

मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृताम् ।
ज्ञातारं विश्वतत्त्वानां वन्दे तद्गुणलब्धये ॥

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥१॥

तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् ॥२॥ तन्निसर्गादधिगमाद्वा ॥ ३ ॥ जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम् ॥४॥ नामस्थापनाद्रव्यभावतस्तन्न्यासः ॥५॥ प्रमाणनयैरधिगमः ॥ ६ ॥ निर्देशस्वामित्वसाधनाऽधिकरणस्थितिविधानतः ॥७॥ सत्संख्याक्षेत्रस्पर्शनकालान्तरभा-

योऽल्पबहुत्वैश्च ॥८॥ मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानम् ॥९॥तत्प्रमाणे ॥१०॥ आद्ये परोक्षम् ॥११॥ प्रत्यक्षमन्यत् ॥१२॥ मतिः स्मृतिः संज्ञा चिन्ताऽभिनिबोध इत्यनर्थान्तरम् ।१३। तदिन्द्रियानिन्द्रियनिमित्तम् ॥१४॥ अवग्रहेहावायधारणाः ॥ १५ ॥ बहुबहुविधक्षिप्राऽनिःसृताऽनुक्तध्रुवाणां सेतराणाम् ॥१६॥ अर्थस्य ॥ १७ ॥ व्यञ्जनस्यावग्रहः ॥१८॥ न चक्षुरनिन्द्रियाभ्याम् ॥१९॥ श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम् २० भवप्रत्ययोऽवधिर्देवनारकाणाम् २१ क्षयोपशमनिमित्तः षड्विकल्पः शेषाणाम् ॥२२॥ ऋजुविपुलमती मनःपर्ययः ॥२३॥ विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः ।२४। विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्यययोः ।२५। मतिश्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु ॥२६॥ रूपिष्ववधेः ॥२७॥ तदनन्तभागे मनःपर्ययस्य ॥२८॥ सर्वद्रव्यपर्यायेषु केवलस्य ॥२९॥ एकादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥ ३० ॥ मतिश्रुतावधयो विपर्ययश्च ॥३१॥ सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत् ।३२। नैगमसंग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवंभूता नयाः ॥३३॥

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे प्रथमोऽध्यायः ॥१॥

औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च ॥ १ ॥ द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमम् ॥२॥ सम्यक्त्वचारित्रे ॥३॥ ज्ञानदर्शन दानलाभभोगोपभोगवीर्याणि च ॥४॥ ज्ञानाज्ञानदर्शन लब्धयश्चतुस्त्रित्रिपञ्चभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च ।५। गतिकषायलिङ्गमिथ्यादर्शनाऽज्ञानासंयताऽसिद्धलेश्याश्चतुश्चतुस्त्र्येकैकैकैकषड्भेदाः ॥६॥ जीवभव्याऽभव्यत्वानि च ॥७॥ उपयोगो लक्षणम् ॥८॥ स द्विविधोऽष्ट चतुर्भेदः ॥९॥ संसारिणो मुक्ताश्च ॥१०॥ समनस्काऽमनस्काः ॥११॥ संसारिणस्त्रसस्थावराः ॥१२॥ पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः ॥१३॥ द्वीन्द्रियादयस्त्रसाः ॥१४॥ पञ्चेन्द्रियाणि ॥१५॥ द्विविधानि ॥१६॥ निर्वृत्युपकरणे द्रव्येन्द्रियम् ॥१७॥ लब्ध्युपयोगौ भावेन्द्रियम् ॥१८॥ स्पर्शनरसनाघ्राणचक्षुःश्रोत्राणि ॥१९॥ स्पर्शरसगन्धवर्णशब्दास्तदर्थाः ॥२०॥ श्रुतमनिन्द्रियस्य ॥२१॥ वनस्पत्यन्तानामेकम् ॥२२॥ कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि ।२३। संज्ञिनः समनस्काः ॥ २४ ॥ विग्रहगतौ कर्मयोगः ॥२५॥ अनुश्रेणि गतिः ॥२६॥ अविग्रहा जीवस्य ॥२७॥ विग्रहवती च संसारिणः प्राक् चतुर्भ्यः ॥२८॥ एकसमयाऽविग्रहा ॥२९॥ एकं द्वौ त्रीन्वानाहारकः ३० सम्मूर्च्छनगर्भोपपादा जन्म ३१ सचित्त

शीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः ॥ ३२ ॥ जरायुजाण्डजपोतानां गर्भः ॥३३॥ देवनारकाणामुपपादः ॥३४॥ शेषाणां सम्मूर्छनम् ॥३५॥ औदारिकवैक्रियिकाहारकतैजसकार्मणानि शरीराणि ॥ ३६ ॥ परं परं सूक्ष्मम् ॥३७॥ प्रदेशतोऽसंख्येयगुणं प्राक् तैजसात् ॥३८॥ अनन्तगुणे परे ॥३९॥ अप्रतीघाते ॥४०॥ अनादिसम्बन्धे च ॥४१॥ सर्वस्य ॥४२॥ तदादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥ ४३॥ निरुपभोगमन्त्यम् ॥४४॥ गर्भसम्मूर्च्छनजमाद्यम् ॥४५॥ औपपादिकं वैक्रियिकम् ॥४६॥ लब्धिप्रत्ययं च ॥४७॥ तैजसमपि ॥४८॥ शुभं विशुद्धमव्याघाति चाहारकं प्रमत्तसंयतस्यैव ॥ ४९ ॥ नारकसम्मूर्च्छिनो नपुंसकानि ॥५०॥ न देवाः ॥ ५१ ॥ शेषास्त्रिवेदाः ॥ ५२ ॥ औपपादिकचरमोत्तमदेहाऽसंख्येयवर्षायुषोऽनपवर्त्यायुषः ॥ ५३ ॥

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे द्वितीयोऽध्यायः ॥२॥

रत्नशर्करावालुकापङ्कधूमतमोमहातमःप्रभाः भूमयो घनाम्बुवाताकाशप्रतिष्ठाः सप्ताधोऽधः ॥ १ ॥ तासु त्रिंशत्पंचविंशतिपंचदशदशत्रिपंचोनैकनरकशतसहस्राणि पंच चैव यथाक्रमम् ॥ २ ॥ नारका नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः ॥ ३ ॥ परस्परोदीरितदुःखाः ॥ ४ ॥ संक्लिष्टासुरोदीरितदुःखाश्च प्राक्चतुर्थ्याः ॥ ५ ॥ तेष्वेक

त्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमा सत्त्वानां परा स्थितिः ॥ ६ ॥ जम्बूद्वीपलवणोदादयः शुभनामानो द्वीपसमुद्राः ॥ ७ ॥ द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः ॥ ८ ॥ तन्मध्ये मेरुनाभिर्वृत्तो योजनशत सहस्रविष्कम्भो जम्बूद्वीपः ॥९॥ भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः क्षेत्राणि ॥१०॥ तद्विभाजिनः पूर्वापरायता हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणो वर्षधरपर्वताः ॥ ११ ॥ हेमार्जुनतपनीयवैडूर्यरजतहेममयाः ॥१२॥ मणिविचित्रपार्श्वा उपरि मूले च तुल्यविस्ताराः ॥ १३ ॥ पद्ममहापद्मतिगिञ्छकेसरिमहापुण्डरीकपुण्डरीका ह्रदास्तेषामुपरि ॥ १४ ॥ प्रथमो योजनसहस्रायामस्तदर्द्धविष्कम्भो ह्रदः ॥१५॥ दशयोजनावगाहः ॥ १६ ॥ तन्मध्ये योजनं पुष्करम् ॥ १७ ॥ तद्द्विगुणद्विगुणा ह्रदा पुष्कराणि च ॥ १८ ॥ तन्निवासिन्यो देव्यः श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः पल्योपमस्थितयःससामानिकपरिषत्काः ॥ १९ ॥ गंगासिन्धुरोहिद्रोहितास्याहरिद्धरिकान्तासीतासीतोदानारीनरकान्तासुवर्णरूप्यकूलारक्तारक्तोदाः सरितस्तन्मध्यगाः ॥ २० ॥ द्वयोर्द्वयोः पूर्वाः पूर्वगाः ॥ २१ ॥ शेषास्त्वपरगाः ॥ २२ ॥ चतुर्दशनदीसहस्रपरिवृता गङ्गासिन्ध्वादयो नद्यः ॥ २३ ॥ भरतः षड्विंशतिपञ्चयोजनशतविस्तारः षट्चैकोनविंशतिभागा

योजनस्य ॥ २४ ॥ तद्द्विगुणद्विगुणविस्तारा वर्षधरवर्षा विदेहान्ताः ॥ २५ ॥ उत्तरा दक्षिणतुल्याः ॥ २६ ॥ भरतैरावतयोर्वृद्धिह्रासौ षट्समयाभ्यामुत्सर्पिण्यवसर्पिणी-भ्याम् ॥ २७ ॥ ताभ्यामपरा भूमयोऽवस्थिताः ॥२८॥ एकद्वित्रिपल्योपमस्थितयो हैमवतकहारिवर्षकदैवकुरवकाः ॥ २९ ॥ तथोत्तराः ॥ ३० ॥ विदेहेषु संख्येयकालाः ॥ ३१ ॥ भरतस्य विष्कम्भो जम्बूद्वीपस्य नवतिशतभागः ॥ ३२ ॥ द्विर्धातकीखण्डे ॥ ३३ ॥ पुष्करार्द्धे च ॥३४॥ प्राङ्मानुषोत्तरान्मनुष्याः ॥ ३५ ॥ आर्या म्लेच्छाश्च ॥ ३६ ॥ भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तर-कुरुभ्यः ॥ ३७ ॥ नृस्थिती परावरे त्रिपल्योपमान्तर्मुहूर्ते ॥ ३८ ॥ तिर्यग्योनिजानां च ॥ ३९ ॥

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे तृतीयोऽध्यायः ॥३॥

देवाश्चतुर्णिकायाः ॥ १ ॥ आदितस्त्रिषु पीतान्त-लेश्याः ॥ २ ॥ दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्न-पर्यन्ताः ॥ ३ ॥ इन्द्रसामानिकत्रायस्त्रिंशत्पारिषदात्मर-क्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्विषिकाश्चैकशः ॥४॥ त्रायस्त्रिंशल्लोकपालवर्ज्या व्यन्तरज्योतिष्काः ॥ ५ ॥ पूर्वयोर्द्वीन्द्राः ॥ ६ ॥ कायप्रवीचारा आ ऐशानात् ॥ ७ ॥ शेषाः स्पर्शरूपशब्दमनःप्रवीचाराः ॥ ८ ॥ परेऽप्रवीचाराः ॥ ९ ॥ भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितो-

दधिद्वीपदिक्कुमाराः ।१०। व्यन्तराः किन्नरकिम्पुरुषमहो-रगगन्धर्वयक्षराक्षसभूतपिशाचाः ।११। ज्योतिष्काः सूर्याचन्द्रमसौ ग्रहनक्षत्रप्रकीर्णकतारकाश्च १२ मेरु-प्रदक्षिणा नित्यगतयो नृलोके १३ तत्कृतः कालविभागः १४ बहिरवस्थिताः १५ वैमानिकाः १६ कल्पोपपन्नाः कल्पातीताश्च १७ उपर्युपरि १८ सौधर्म्मैशानसानत्कु-मारमाहेन्द्रब्रह्मब्रह्मोत्तरलान्तवकापिष्ठशुक्रमहाशुक्रशतारस-हस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विज-यवैजयन्तजयन्तापराजितेषु सर्वार्थसिद्धौ च १९ स्थिति-प्रभावसुखद्युतिलेश्याविशुद्धीन्द्रियावधिविषयतोऽधिकाः २० गतिशरीरपरिग्रहाभिमानतो हीनाः २१ पीतपद्मशुक्ल-लेश्याः द्वित्रिशेषेषु २२ प्राग्ग्रैवेयकेभ्यः कल्पाः २३ ब्रह्म-लोकालया लौकान्तिकाः २४ सारस्वतादित्यवन्ह्यरुणग-र्दतोयतुषिताव्याबाधारिष्टाश्च २५ विजयादिषु द्विचरमाः २६ औपपादिकमनुष्येभ्यः शेषास्तिर्यग्योनयः २७ स्थिति-रसुरनागसुपर्णद्वीपशेषाणां सागरोपमत्रिपल्योपमार्द्धहीन-मिताः २८ सौधर्मैशानयोः सागरोपमे अधिके २९ सानत्कुमारमाहेन्द्रयोः सप्त ३० त्रिसप्तनवैकादशत्रयोदश-पञ्चदशभिरधिकानि तु ३१ आरणाच्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च ३२ अपरा पल्योपममधिकम् ३३ परतः परतः पूर्वा पूर्वानन्तरा ३४

नारकाणां च द्वितीयादिषु ३५ दशवर्षसहस्राणि प्रथमायाम् ३६ भवनेषु च ३७ व्यन्तराणां च ३८ परा पल्योपममधिकं ३९ ज्योतिष्काणां च ४० तदष्टभागोऽपरा ४१ लौकान्तिकानामष्टौ सागरोपमाणि सर्वेषाम् ४२

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे चतुर्थोऽध्यायः

अजीवकाया धर्माधर्माकाशपुद्गलाः १ द्रव्याणि २ जीवाश्च ३ नित्यावस्थितान्यरूपाणि ४ रूपिणः पुद्गलाः ॥ ५ ॥ आ आकाशादेकद्रव्याणि ॥ ६ ॥ निष्क्रियाणि च ॥७॥ असंख्येयाः प्रदेशाः धर्माधर्मैकजीवानाम् । ८ ॥ आकाशस्यानन्ताः ॥ ९ ॥ संख्येयासंख्येयाश्च पुद्गलानाम् ॥ १० ॥ नाणोः ॥ ११ ॥ लोकाकाशेऽवगाहः ॥ १२ ॥ धर्माधर्मयोः कृत्स्ने ॥ १३ ॥ एकप्रदेशादिषु भाज्यः पुद्गलानाम् ॥१४॥ असङ्ख्येयभागादिषु जीवानाम् ॥ १५ ॥ प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् । १६॥ गतिस्थित्युपग्रहो धर्माधर्मयोरुपकारः ॥१७॥ आकाशस्यावगाहः ॥१८॥ शरीरवाङ्मनःप्राणापानाः पुद्गलानाम् ॥१९॥ सुखदुःखजीवितमरणोपग्रहाश्च ।२०। परस्परोपग्रहो जीवानाम् २१ वर्तनापरिणामक्रियापरत्वापरत्वे च कालस्य २२ स्पर्शरसगन्धवर्णवन्तः पुद्गलाः ॥ २३ ॥ शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायाऽऽतपोद्योतवन्तश्च ॥ २४ ॥ अणवः

स्कन्धाश्च ॥२५॥ भेदसङ्घातेभ्य उत्पद्यन्ते २६ भेदादणुः २७ भेदसंघाताभ्यां चाक्षुषः २८ सद् द्रव्यलक्षणम् २९ उत्पादव्ययध्रौव्ययुक्तं सत् ॥ ३० ॥ तद्भावाव्ययं नित्यम् ॥ ३१ ॥ अर्पितानर्पितसिद्धेः ॥ ३२ ॥ स्निग्धरूक्षत्वाद्बन्धः ॥ ३३ ॥ न जघन्यगुणानाम् ॥ ३४ ॥ गुणसाम्ये सदृशानाम् ॥ ३५ ॥ द्व्यधिकादिगुणानां तु ॥३६॥ बन्धेऽधिकौ च पारिणामिकौ च । ३७ । गुणपर्य्ययवद् द्रव्यम् ॥३८ ॥ कालश्च ॥ ३९ । सोऽनन्तसमयः ॥४०। द्रव्याश्रया निर्गुणा गुणाः ॥ ४१ ॥ तद्भावः परिणामः ॥ ४२ ॥

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे पंचमोऽध्यायः ॥ ५ ॥

कायवाङ्मनः कर्म्म योगः ॥ १ ॥ स आस्रवः ॥ २ ॥ शुभः पुण्यस्याशुभः पापस्य ॥ ३ ॥ सकषायाकषाययोः सांपरायिकेर्यापथयोः ॥ ४ ॥ इन्द्रियकषायाव्रतक्रियाः पञ्चचतुःपञ्चपञ्चविंशतिसंख्याः पूर्वस्य भेदाः ॥५॥ तीव्रमन्दज्ञाताज्ञातभावाधिकरणवीर्यविशेषेभ्यस्तद्विशेषः । ६ । अधिकरणं जीवाजीवाः ॥ ७ ॥ आद्यं संरम्भसमारम्भारम्भयोगकृतकारितानुमतकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः ॥ ८ ॥ निर्वर्तनानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः परम् ॥ ९ ॥ तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाता ज्ञानदर्शनावरणयोः ॥ १० ॥ दुःखशोक

तापाक्रन्दनवधपरिदेवनान्यात्मपरोभयस्थानान्यसद्वेद्यस्य ॥ ११॥ भूतव्रत्यनुकम्पादानसरागसंयमादियोगः क्षान्तिः शौचमिति सद्वेद्यस्य ॥ १२ । केवलिश्रुतसंघधर्म्मदेवावर्णवादो दर्शनमोहस्य ॥ १३ ॥ कषायोदयात्तीव्रपरिणामश्चारित्रमोहस्य ॥१४। बह्वारम्भपरिग्रहत्वं नारकस्यायुषः ॥ १५ ॥ माया तैर्यग्योनस्य ॥ १६ ॥ अल्पारम्भ परिग्रहत्वं मानुषस्य ॥ १७॥ स्वभावमार्दवं च । १८॥ निःशीलव्रतत्वं च सर्वेषाम् १९ सरागसंयमसंयमासंयमाकामनिर्ज्जराबालतपांसि दैवस्य २० सम्यक्त्वं च २१ योगवक्रताविसंवादनं चाशुभस्य नाम्नः २२ तद्विपरीतं शुभस्य २३ दर्शनविशुद्धिर्विनयसम्पन्नता शीलव्रतेष्वनतिचारोऽभीक्ष्णज्ञानोपयोगसंवेगौ शक्तितस्त्यागतपसी साधुसमाधिर्वैयावृत्त्यकरणमर्हदाचार्यबहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिर्मार्गप्रभावना प्रवचनवत्सलत्वमिति तीर्थकरत्वस्य २४ परात्मनिन्दाप्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य २५ तद्विपर्य्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य २६ विघ्नकरणमन्तरायस्य २७

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे षष्ठोऽध्यायः ॥६॥

हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् १ देशसर्वतोऽणुमहती २ तत्स्थैर्यार्थं भावनाः पञ्च पञ्च. ३ वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकितपानभोजनानि

पंच ४ क्रोधलोभभीरुत्वहास्यप्रत्याख्यानान्यनुवीचिभा-
षणं च पंच ५ शून्यागारविमोचितावासपरोपरोधाकरणभैक्ष्यशुद्धि सधर्म्माविसंवादाः पंच ६ स्त्रीरागकथाश्रवण तन्मनोहराङ्गनिरीक्षणपूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागाः पंच ७ मनोज्ञामनोज्ञेन्द्रियविषयरागद्वेष वर्ज्जनानि पञ्च ८ हिंसादिष्विहामुत्रापायावद्यदर्शनं ६ दुःखमेव वा १० मैत्रीप्रमोदकारुण्यमाध्यस्थानि च सत्त्वगुणाधिकक्लिश्यमानाविनयेषु ११ जगत्कायस्वभावौ वा संवेगवैराग्यार्थम् १२ प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा १३ असदभिधानमनृतं १४ अदत्तादानं स्तेयं१५ मैथुनमब्रह्म १६ मूर्च्छा परिग्रहः १७ निःशल्यो व्रती १८ अगार्यनगारश्च १६ अणुव्रतोऽगारी २० दिग्देशानर्थदण्ड विरतिसामायिकप्रोषधोपवासोपभोगपरिभोगपरिमाणातिथिसंविभागव्रतसम्पन्नश्च २१ मारणान्तिकीं सल्लेखनां जोषिता २२ शङ्काकाङ्क्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः सम्यग्दृष्टेरतिचाराः २३ व्रतशीलेषु पंच पंच यथाक्रमम् ।२४। बन्धवधच्छेदातिभारारोपणान्नपाननिरोधाः ॥२५॥ मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियान्यासापहारसाकारमन्त्रभेदाः ॥२६॥ स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमानोन्मानप्रतिरूपकव्यवहाराः ॥ २७ ॥ परविवाहकरणेत्वरिकापरिगृहीतापरिगृहीतागमनानङ्गक्री–

डाकामतीव्राभिनिवेशाः २८ क्षेत्रवास्तुहिरण्यसुवर्णधन-धान्यदासीदासकुप्यप्रमाणातिक्रमाः २९ ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यन्तराधानानि ३० आनयनप्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपाः ३१ कन्दर्पकौत्कुच्यमौखर्यासमीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि ३२ योगदुःप्रणिधानानादरस्मृत्यनुपस्थानानि ३३ अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानादरस्मृत्यनुपस्थानानि ३४ सचित्तसम्बन्धसम्मिश्राभिषवदुःपक्वाहाराः ३५ सचित्तनिक्षेपापिधानपरव्यपदेशमात्सर्यकालातिक्रमाः ३६ जीवितमरणाशंसामित्रानुरागसुखानुबन्धनिदानानि ३७ अनुग्रहार्थं स्वस्यातिसर्गो दानम् ३८ विधिद्रव्यदातृपात्रविशेषात्तद्विशेषः ३९

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे सप्तमोऽध्यायः ॥ ७ ॥

मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः १ सकषायत्वाज्जीवः कर्म्मणो योग्यान्पुद्गलानादत्ते स बन्धः २ प्रकृतिस्थित्यनुभागप्रदेशास्तद्विधयः ३ आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाः ४ पंचनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपंचभेदा यथाक्रमम् ५ मतिश्रुतावधिमनःपर्य्ययकेवलानां ६ चक्षुरचक्षुरवधिकेवलानां निद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानगृद्धयश्च ७ सदसद्वेद्ये ८ दर्शनचारित्रमोहनीयाकषायकषायवेदनी-

याख्यास्त्रिद्विनवषोडशभेदाः सम्यक्त्वमिथ्यात्वतदुभयान्य- कषायकषायौ हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुन्नपुंस- कवेदा अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनवि- कल्पाश्चैकशः क्रोधमानमायालोभाः ९ नारकतैर्यग्योन- मानुषदैवानि १० गतिजातिशरीरांगोपाङ्गनिर्माणबन्धन- सङ्घातसंस्थानसंहननस्पर्शरसगन्धवर्णानुपूर्व्यगुरुलघूपघात- परघातातपोद्योतोच्छ्वासविहायोगतयः प्रत्येकशरीरत्रससुभ- गसुस्वरशुभसूक्ष्मपर्याप्तिस्थिरादेययशःकीर्तिसेतराणि तीर्थ- करत्वं च ११ उच्चैर्नीचैश्च १२ दानलाभभोगोपभोगवी- र्याणाम् १३ आदितस्तिसृणामन्तरायस्य च त्रिंशत्साग- रोपमकोटीकोट्यः परा स्थितिः १४ सप्ततिर्मोहनीयस्य १५ विंशतिर्नामगोत्रयोः १६ त्रयस्त्रिंशत्सागरोपमाण्यायुषः १७ अपरा द्वादश मुहूर्ता वेदनीयस्य १८ नामगोत्रयोरष्टौ १९ शेषाणामन्तर्मुहूर्ता २० विपाकोऽनुभवः २१ स यथानाम २२ ततश्च निर्जरा २३ नामप्रत्ययाः सर्वतो योगविशेषात्सूक्ष्मैकक्षेत्रावगाहस्थिताः सर्वात्मप्रदेशेष्व- नन्तानन्तप्रदेशाः २४ सद्वेद्यशुभायुर्नामगोत्राणि पुण्यम् २५ अतोऽन्यत्पापम् २६

इति तत्त्वार्थाधिगमे मोक्षशास्त्रेऽष्टमोऽध्यायः ॥८॥

आस्रवनिरोधः संवरः १ स गुप्तिसमितिधर्मानुप्रेक्षाप- रीषहजयचारित्रैः २ तपसा निर्ज्जरा च ३ सम्यग्योग-

निग्रहो गुप्तिः ४ ईर्य्याभाषैषणादाननिक्षेपोत्सर्गाः समितयः ५ उत्तमक्षमामार्दवार्जवसत्यशौचसंयमतपस्त्यागाकिंचन्य-ब्रह्मचर्य्याणि धर्म्मः ६ अनित्याशरणसंसारैकत्वान्यत्वा-शुच्यास्रवसंवरनिर्ज्जरालोकबोधिदुर्ल्लभधर्म्मस्वाख्यात—त्वानुचिंतनमनुप्रेक्षाः ७ मार्गाच्यवननिर्ज्जरार्थं परिषो-ढव्याः परीषहाः ८ क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्या-रतिस्त्रीचर्यानिषद्याशय्याक्रोशवधयाच्ञालाभरोगतृणस्पर्श-मलसत्कारपुरस्कारप्रज्ञाज्ञानादर्शनानि ९ सूक्ष्मसाम्पराय-छद्मस्थवीतरागयोश्चतुर्दश १० एकादश जिने ॥११॥ बादरसाम्पराये सर्वे १२ ज्ञानावरणे प्रज्ञाज्ञाने ॥ १३ ॥ दर्शनमोहान्तराययोरदर्शनालाभौ । १४ । चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाच्ञासत्कारपुरस्काराः १५ वेदनीये शेषाः १६ एकादयो भाज्या युगपदेकस्मिन्नैको-नविंशतेः १७ सामायिकच्छेदोपस्थापनापरिहारविशुद्धि-सूक्ष्मसाम्परायथाख्यातमिति चारित्रम् १८ अनशनाव-मौदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकाय-क्लेशा बाह्यं तपः । १९ । प्रायश्चित्तविनयवैयावृत्त्य-स्वाध्यायव्युत्सर्गध्यानान्युत्तरम् । २० नवचतुर्दशपञ्च-द्विभेदा यथाक्रमं प्राग्ध्यानात् । २१ । आलोचनप्रतिक्र-मणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारोपस्थापनाः २२ ज्ञानदर्शनचारित्रोपचाराः । २३ । आचार्योपाध्यायतप-

स्विशैक्ष्यग्लानगणकुलसङ्घसाधुमनोज्ञानाम् । २४ । वाचनापृच्छनानुप्रेक्षाम्नायधर्मोपदेशाः । २५ । बाह्याभ्यन्तरोपध्योः ।२६। उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमान्तमुहूर्तात् । २७ । आर्त्तरौद्रधर्म्यशुक्लानि । २८ । परे मोक्षहेतू । २९ । आर्त्तममनोज्ञस्य सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः । ३० । विपरीतं मनोज्ञस्य । ३१ । वेदनायाश्च । ३२ । निदानं च ॥३३॥ तदविरतदेशविरतप्रमत्तसंयतानाम् । ३४ हिंसानृतस्तेयविषयसंरक्षणेभ्यो रौद्रमविरतदेशविरतयोः । ३५ । आज्ञापायविपाकसंस्थानविचयाय धर्म्यम् ३६ शुक्ले चाद्ये पूर्वविदः । ३७ । परे केवलिनः ३८ पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवर्तीनि ३९ त्र्येकयोगकाययोगायोगानाम् ४० एकाश्रये सवितर्कवीचारे पूर्वे ४१ अवीचारं द्वितीयम् ४२ वितर्कः श्रुतम् ४३ वीचारोऽर्थव्यञ्जनयोगसंक्रान्तिः ४४ सम्यग्दृष्टिश्रावकविरतानन्तवियोजकदर्शनमोहक्षपकोपशमकोपशान्तमोहक्षपकक्षीणमोहजिनाः क्रमशोऽसंख्येयगुणनिर्जराः ४५ पुलाकवकुशकुशीलनिर्ग्रन्थस्नातका निर्ग्रन्थाः ४६ संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपादस्थानविकल्पतः साध्याः ४७

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे नवमोऽध्यायः ॥ ९ ॥

मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम् १

बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्म्मविप्रमोक्षो मोक्षः २ औपशमिकादिभव्यत्वानां च३ अन्यत्र केवलसम्यक्त्वज्ञा-नदर्शनसिद्धत्वेभ्यः ४ तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात् ५ पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथागतिपरिणामाच्च ६ आविद्धकुलालचक्रवद्व्यपगतलेपालाबुवदेरण्डबीजवद-ग्निशिखावच्च ७ धर्मास्तिकायाभावात् ८ क्षेत्रकालगति-लिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनान्तरसंख्या-ल्पबहुत्वतः साध्याः ९

अक्षरमात्रपदस्वरहीनं व्यञ्जनसन्धिविवर्जितरेफम् ।
साधुभिरत्र मम क्षन्तव्यं को न विमुह्यति शास्त्रसमुद्रे ॥

दशाध्याये परिच्छिन्ने तत्त्वार्थे पठिते सति ।
फलं स्यादुपवासस्य भाषितं मुनिपुङ्गवैः ॥२॥
तत्त्वार्थसूत्रकर्तारं गृध्र–पिच्छोपलक्षितम् ।
वन्दे गणीन्द्रसंयातमुमास्वामिमुनीश्वरम् ॥३॥

॥ इति तत्त्वार्थसूत्रं समाप्तम् ॥

अथ सामायिक पाठः

सिद्धवस्तुवचो भक्त्या, सिद्धान् प्रणमतां सदा
सिद्धकार्याः शिवं प्राप्ताः, सिद्धिं ददतु नोऽव्ययाम् १
नमोस्तु धौतपापेभ्यः, सिद्धेभ्यः ऋषिसंसदि
सामायिकं प्रपद्येऽहं, भवभ्रमणसूदनम् २
साम्यं मे सर्वभूतेषु, वैरं मम न केनचित्

आशां सर्वां परित्यज्य, समाधिमहमाश्रये ३
रागद्वेषान्ममत्वाद्वा, हा मया ये विराधिताः ।
क्षमन्तु जन्तवस्ते मे, ते मां क्षमयन्तु सर्वदा ४
तेभ्यः क्षमाम्यहं पुनः कृतकारितसम्मतैः
रत्नत्रयभवं दोषं, गर्हे निन्दामि वर्जये ५
तैरश्चं मानवं दैव–मुपसर्गं सहेऽधुना
कायाहारकषायादीन्, संत्यजामि त्रिशुद्धितः ६
रागद्वेषं भयं शोकं, प्रहर्षौत्सुक्यदीनताः
व्युत्सृजामि त्रिधा सर्वमरतिं रतिमेव च ७
जीवने मरणे लाभेऽलाभे योगे विपर्यये
बन्धावरी सुखे दुःखे, सर्वदा समता मम ८
आत्मैव मे सदा ज्ञानं, दर्शने चरणे तथा
प्रत्याख्याने ममात्मैव, तथा संवरयोगयोः ९
एको मे शाश्वतश्चात्मा, ज्ञानदर्शनलक्षणः
शेषा बहिर्भवा भावाः सर्वे संयोगलक्षणाः १०
संयोगमूला जीवेन, प्राप्ता दुःखपरम्परा
तस्मात्संयोगसम्बन्धं, त्रिधा सर्वं त्यजाम्यहम् ११
एवं सामायिकात्सम्यक् सामायिकमखंडितम्
वर्ततं मुक्तिमानिन्या, वशीभूताय ते नमः ॥ १२ ॥

इति सामायिक पाठः

श्रीअमितगतिसूरिविरचिता

द्वात्रिंशतिका ।

(सामायिक पाठ)

सत्त्वेषु मैत्रीं गुणिषु प्रमोदं, क्लिष्टेषु जीवेषु कृपापरत्वम्, मध्यस्थभावं विपरीतवृत्तौ, सदा ममात्मा विदधातु देव ॥१॥ शरीरतः कर्तुमनन्तशक्तिं, विभिन्नमात्मानमपास्तदोषम् । जिनेन्द्र कोषादिव खडगयष्टिं, तव प्रसादेन ममास्तु शक्तिः ॥२॥ दुःखे सुखे वैरिणि बन्धुवर्गे योगे वियोगे भवने वने वा । निराकृताशेषममत्वबुद्धेः, समं मनो मेऽस्तु सदापि नाथ ॥३॥ मुनीश लीनाविव कीलिताविव, स्थिरौ निखाताविव बिंबिताविव । पादौ त्वदीयौ मम तिष्ठतां सदा, तमोधुनानौ हृदि दीपकाविव ४ एकेन्द्रियाद्या यदि देव देहिनः, प्रमादतः संचरता इतस्ततः । क्षताः विभिन्ना मिलिता निपीडिताः, तदस्तु मिथ्या दुरनुष्ठितं तदा ॥५॥ विमुक्तिमार्गप्रतिकूलवर्त्तिना मया कषायाक्षवशेन दुर्धिया । चारित्रशुद्धेर्यदकारि लोपनं तदस्तु मिथ्या मम दुष्कृतं प्रभो ।६। विनिन्दनालोचनगर्हणैरहं, मनोवचःकायकषायनिर्मितम् । निहन्मि पापं भवदुःखकारणं, भिषग्विषं मन्त्रगुणैरिवाखिलम् ॥ ७ ॥ अतिक्रमं यद्विमतेर्व्यतिक्रमं, जिनातिचारं सुचरित्रकर्म्मणः,

व्यधामनाचारमपि प्रमादतः, प्रतिक्रमं तस्य करोमि शुद्धये ॥ ८ ॥ क्षतिं मनःशुद्धिविधेरतिक्रमं, व्यतिक्रमं शीलवृते-र्विलंघनम् । प्रभोऽतिचारं विषयेषु वर्तनं, वदन्त्यनाचार-मिहातिसक्तताम् ॥ ९ ॥ यदर्थमात्रापदवाक्यहीनं मया प्रमादाद्यदि किञ्चनोक्तम् । तन्मे क्षमित्वा विदधातु देवी, सरस्वती केवलबोधलब्धिम् ॥ १० ॥ बोधिः समाधिः परिणामशुद्धिः स्वात्मोपलब्धिः शिवसौख्यसिद्धिः । चिन्तामणिं चिन्तितवस्तुदाने, त्वां वंद्यमानस्य ममास्तु देव ॥ ११ ॥ यः स्मर्यते सर्वमुनीन्द्रवृन्दैः यः स्तूयते सर्वनरामरेन्द्रैः । यो गीयते वेदपुराणशास्त्रैः, स देवदेवो हृदये ममास्ताम् ॥ १२ ॥ यो दर्शनज्ञानसुखस्वभावः, समस्तसंसारविकारबाह्यः, समाधिगम्यः परमात्मसंज्ञः, स देवदेवो हृदये ममास्ताम् ॥ १३ ॥ निषूदते यो भवदुःख-जालं, निरीक्षते यो जगदन्तरालं । योऽन्तर्गतो योगिनि-रीक्षणीयः, स देवदेवो हृदये ममास्ताम् ॥ १४ ॥ विमुक्तिमार्गप्रतिपादको यो, यो जन्ममृत्युव्यसनादतीतः । त्रिलोकलोकी विकलोऽकलङ्कः, स देवदेवो हृदये ममा-स्ताम् ॥ १५ ॥ क्रोडीकृताशेषशरीरवर्गा, रागादयो यस्य न सन्ति दोषाः । निरिन्द्रियो ज्ञानमयोऽनपायः, स देवदेवो हृदये ममास्ताम् ॥ १६ ॥ यो व्यापको विश्वजनीनवृत्तेः, सिद्धो विबुद्धो धुतकर्मबन्धः । ध्यातो

धुनीते सकलं विकारं, स देवदेवो हृदये ममास्ताम् ।१७
न स्पृश्यते कर्मकलंकदोषै,र्यो ध्वान्तसंघैरिव तिग्मरश्मिः,
निरञ्जनं नित्यमनेकमेकं, तं देवमाप्तं शरणं प्रपद्ये
। १८ । विभासते यत्र मरीचिमाली, न विद्यमाने भुव-
नावभासी । स्वात्मस्थितं बोधमयप्रकाशं तं देवमाप्तं
शरणं प्रपद्ये । १९ । विलोक्यमाने सति यत्र विश्वं,
विलोक्यते स्पष्टमिदं विविक्तम् । शुद्धं शिवं शान्तमना-
द्यनन्तं, तं देवमाप्तं शरणं प्रपद्ये । २० । येन क्षता
मन्मथमानमूर्च्छा, विषादनिद्राभयशोकचिन्ता ; क्षतोऽन-
लेनेव तरुप्रपंचः, तं देवमाप्तं शरणं प्रपद्ये । २१ । न
संस्तरोऽश्मा न तृणं न मेदिनी, विधानतो नो फलको
विनिर्म्मितः । यतो निरस्ताक्षकषायविद्विपः, सुधीभिरा-
त्मैव सुनिर्मलो मतः । २२ । न संस्तरो भद्र समाधिसाधनं
न लोकपूजा न च संघमेलनम् । यतस्ततोऽध्यात्मरतो
भवानिशं, विमुच्य सर्वामपि बाह्यवासनाम् । २३ । न
सन्ति बाह्या मम केचनार्थाः, भवामि तेषां न कदाच-
नाहम् । इत्थं विनिश्चित्य विमुच्य बाह्यं, स्वस्थः सदा त्वं
भव भद्र मुक्त्यै २४ आत्मानमात्मन्यवलोक्यमानः, त्वं
दर्शनज्ञानमयो विशुद्धः । एकाग्रचित्तः खलु यत्र तत्र,
स्थितोपि साधुर्लभते समाधिम् २५ एकः सदा शाश्वतिको
ममात्मा, विनिर्मलः साधिगमस्वभावः । बहिर्भवाः सन्त्य-

परं समस्ताः, न शाश्वताः कर्मभवा स्वकीयाः २६
यस्यास्ति नैक्यं वपुषापि सार्द्धं, तस्यास्ति किं पुत्रकलत्रमित्रैः। पृथक्कृते चर्मणि रोमकूपाः, कुतो हि तिष्ठन्ति शरीरमध्ये २७ संयोगतो दुःखमनेकभेदं, यतोऽश्नुते जन्मवने शरीरी। ततस्त्रिधासौ परिवर्जनीयो, यियासुना निर्वृतिमात्मनीनाम् २८ सर्वं निराकृत्य विकल्पजालं, संसारकान्तारनिपातहेतुम्। विविक्तमात्मानमवेक्ष्यमाणो, निलीयसे त्वं परमात्मतत्त्वे २९ स्वयं कृतं कर्म यदात्मना पुरा, फलं तदीयं लभते शुभाशुभम्। परेण दत्तं यदि लभ्यते स्फुटं, स्वयं कृतं कर्म निरर्थकं तदा ३० निजार्जितं कर्म विहाय देहिनो, न कोपि कस्यापि ददाति किञ्चन। विचारयन्नेवमनन्यमानसः, परो ददातीति विमुच्य शेमुषीम् ३१ यैः परमात्माऽमितगतिवन्द्यः, सर्वविविक्तो भृशमनवद्यः। शश्वदधीतो मनसि लभन्ते, मुक्तिनिकेतं विभववरं ते ३२

इति द्वात्रिंशता वृत्तैः परमात्मानमीक्षते।
योऽनन्यगतचेतस्को, यात्यसौ, पदमव्ययम् ३३

इत्यमितगतिसूरिविरचिता द्वात्रिंशतिका।

लघु—सामायिक पाठः ॥

सिद्धं सम्पूर्णभव्यार्थ—सिद्धेः कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञानचारित्र–प्रतिपादनम् ।१।
सुरेन्द्रमुकुटाश्लिष्ट—पादपद्मांशुकेसरं ।
प्रणमामि महावीरं लोकत्रितयमंगलम् ॥ २ ॥
सिद्धवस्तुवचोभक्त्या, सिद्धान् प्रणमतां सदा ।
सिद्धकार्याः शिवं प्राप्ताः सिद्धिं ददतु नोऽव्ययाम् ।३।
नमोस्तु धूतपापेभ्यः सिद्धेभ्यः ऋषिपरिषदि ।
सामायिकं प्रपद्येऽहं भवभ्रमणसूदनम् ॥ ४ ॥
समता सर्वभूतेषु संयमे शुभभावना ।
आर्त्तरौद्रपरित्यागः तद्धि सामायिकं मतम् । ५ ।
साम्यं मे सर्वभूतेषु, वैरं मम न केनचित् ।
आशाः सर्वाः परित्यज्य समाधिमहमाश्रये । ६ ।
रागद्वेषान्ममत्वाद्वा हा मया ये विराधिताः ।
क्षाम्यन्तु जन्तवस्ते मे, तेभ्यो मृष्याम्यहं पुनः । ७ ।
मनसा, वपुषा, वाचा कृतकारितसंमतैः ।
रत्नत्रयभवं दोषं गर्हे निंदामि वर्जये । ८ ।
तैरश्चं मानवं दैवं उपसर्गं सहेऽधुना ।
कायाहारकषायादि प्रत्याख्यामि त्रिशुद्धितः । ९ ।
रागं द्वेषं भयं शोकं प्रहर्षौत्सुक्यदीनतां ।
व्युत्सृजामि त्रिधा सर्वामरतिं रतिमेव च ॥ १० ॥

जीविते मरणे लाभेऽलाभे योगे विपर्यये ।
बंधावरौ सुखे दुःखे, सर्वदा समता मम ॥ ११ ॥
आत्मैव मे सदा ज्ञाने दर्शने चरणे तथा ।
प्रत्याख्याने ममात्मैव, तथा संवरयोगयोः । १२ ।
एको मे शाश्वतश्चात्मा ज्ञानदर्शनलक्षणः ।
शेषा बहिर्भवा भावाः सर्वे संयोगलक्षणाः । १३ ।
संयोगमूला जीवेन प्राप्ता दुःखपरम्परा ।
तस्मात् संयोगसंबंधं त्रिधा सर्वं त्यजाम्यहं । १४ ।
एवं सामायिकं सम्यक् सामायिकमखण्डितम् ।
वर्ततां मुक्तिमानिन्या वशीचूर्णायितं मम । १५ ।
शास्त्राभ्यासो जिनपतिनुतिः संगतिः सर्वदार्यैः,
सद्वृत्तानां गुणगणकथा दोषवादे च मौनम् ।
सर्वस्यापि प्रियहितवचो भावना चात्मतत्त्वे,
संपद्यन्तां मम भवभवे यावदेतेऽपवर्गः ॥ १६ ॥
तव पादौ मम हृदये मम हृदयं तव पदद्वये लीनम् ।
तिष्ठतु जिनेन्द्र तावद्यावन्निर्वाणसंप्राप्तिः । १७ ।
अक्खरपयत्थहीणं मत्ताहीणं च जं मये भणियं ।
तं खमउ णाण देव य मज्झवि दुक्खक्खयं दिंतु ।१८।
दुक्खक्खओ कम्मक्खओ समाहिमरणं च बोहिलाहो य ।
मम होउ जगतबंधव जिणवर तव चरणसरणेण १९

॥ इति सामायिक पाठ ॥

श्रीपार्श्व–नाथ–स्तोत्रम्

श्रीपार्श्वः पातु वो नित्यं, जिनः परमशंकरः ।
नाथः परमशक्तिश्च, शरण्यं सर्वकामदः ॥१॥
सार्वो विश्वंभरः, स्वामी, सर्वसिद्धिप्रदायकः ।
सर्वसत्त्वहितो योगी, श्रीकरः परमार्थदः ॥२॥
देवदेवः परमसिद्धश्चिदानंदमयः शिवः ।
परमात्मा परब्रह्म परमः परमेश्वरः ॥३॥
जगन्नाथः सुरज्येष्ठो, भूतेशः पुरुषोत्तमः ।
सुरेन्द्रो नित्यधर्मेशः, श्रीनिवासः शुभार्णवः ।
सर्वज्ञः सर्वदेवेशः, सर्वदः सर्वदासमः ।
सर्वात्मा सर्वदर्शी च, सर्वव्यापी जगद्गुरुः ॥५॥
तत्त्वमूर्तिः परो दिव्यः, परब्रह्मप्रकाशकः ।
परमेंदुः परंप्राप्यः परमामृतसिद्धिदः ॥६॥
अजस्सनातनः शंभुरीश्वरश्च सदाशिवः ।
विश्वेश्वरः, प्रमोदात्मा, क्षेत्राधीशः शुभप्रभः ॥७॥
साकारश्च निराकारः, सकलो निश्चलो मतः ।
निर्ममो निर्विकारश्च, निर्विकल्पो निरामयः ॥८॥
अजरश्चाऽरुजोऽनंत, एकानेकशिवात्मकः ।
अलक्षश्चाऽप्रमेयश्च, ध्यानलक्ष्यो निरञ्जनः ॥९॥
ओंकारः प्रकृतिर्व्यक्तो, व्यक्तरूपः श्रीमयः ।
ब्रह्मद्वयप्रकाशात्मा, निर्भयः परमाक्षरः ॥१०॥
दिव्यतेजोमयः शांतः, परमात्ममयोद्यतः ।

आद्यो ज्योतिः परेशानः, परमेष्ठी परं पुमान् ॥११॥
शुद्धस्फटिकसंकाशः, स्वयंभूः परमाकृतिः ।
व्योमाकारस्वरूपश्च, लोकालोकप्रकाशकः ॥१२॥
ज्ञानात्मा परमानंदः, प्राणारूढमवस्थितः ।
मनःसाध्यो मनोध्येयो, मनोदृश्यः परात्परः ॥१३॥
सर्वतीर्थमयो नित्यः, सर्वदेवमयः प्रभुः ।
भगवान् सर्वतत्त्वज्ञः, शिवः श्रीसौख्यदायकः ॥१४॥
इति श्रीपार्श्वनाथस्य, सर्वज्ञस्य सद्गुरोः ।
दिव्यमष्टोत्तरं नाम, शतमत्र प्रकीर्तितम् ॥१५॥
पवित्रं परमं ध्येयं, परमानंददायकम् ।
भुक्तिमुक्तिप्रदातारं, पठतां मंगलप्रदम् ॥१६॥
श्रीमत्परमकल्याणं, सिद्धिदं श्रेयसे स्तुमः ।
पार्श्वनाथो हि श्रीमान् सो, भगवान् परमः शिवः ॥१७॥
धरणेन्द्रफणच्छत्रालंकृतो वः श्रियं प्रभुः ।
दद्यात्पद्मावतीदेव्या, समधिष्ठितशासनः ॥ १८ ॥
ध्यायेत्कमलमध्यस्थं, श्रीपार्श्वं जगदीश्वरम् ।
ओं ह्रीं अर्हंसमायुक्तं, केवलज्ञानभास्करम् ॥१६॥
पद्मावत्यान्वितं वामे, धरणेन्द्रेण दक्षिणे ।
कमलाष्टदलस्थेन, मंत्रराजेन संयुतम् ॥२०॥
अष्टपत्रस्थितपंच,–नमस्कारैस्तथा त्रिभिः ।
ज्ञानाद्यैर्वेष्टितं नाथं, धर्मार्थकाममोक्षदम् ॥२१॥
सत्षोडशदलारूढ,–विद्यादेवीभिरावृतम् ।
चतुर्विंशतिपत्रस्थं,–जिनमातृसमावृतम् ॥२२॥

मायावेष्टत्रयाग्रस्थं, क्रौंकार सहितं प्रभुं ।
नवग्रहावृतं देवं, दिक्पालैर्दशभिर्वृतम् ॥२३॥
(ओं प्रं) चतुःकोणेषु मंत्राद्यैः, चतुर्वर्गान्वितैर्जिनम् ।
चतुरष्टादशद्वांति, द्विधा कं संज्ञकैर्युतम् ॥२४॥
दिक्षु क्षकारयुक्तेन, विदिक्षु लांकितेन च ।
चतुरस्रेण विज्ञांकं, क्षितित्वेन प्रतिष्ठितं ॥२५॥
श्रीपार्श्वनाथमित्येवं, य. समाराधयेज्जिनम् ।
सर्वपापविनिर्मुक्तं, लभ्यते श्रीः सुखप्रदम् ॥२६॥
जिनेशः पूजितो भक्त्या, संस्तुतः प्रणतोऽथवा ।
ध्यात्वा स्तुयेत्क्षणं चापि, सिद्धिस्तेषां महोदया ॥२७॥
श्रीपार्श्वमंत्रराजं तु, चिंतामणिगुणप्रदम् ।
शांतिपुष्टिकरं नित्यं, क्षुद्रोपद्रवनाशनम् ॥२८॥
ऋद्धिसिद्धिमहाबुद्धि,धृतिकीर्तिसुकांतिदम् ।
मृत्युंजयं शिवात्मानं, जगदानंदनं जिनम् ॥२९॥
सर्वकल्याणपूर्णोयं, जरामृत्युविवर्जितं ।
अणिमादिमहासिद्धिर्लक्षजाप्येन चाप्नुयात् ॥३०॥
प्राणायाममनोमंत्रयोगादमृतमात्मनि ।
स्वात्मानं शिवं ध्यात्वा, स्वस्मिन् सिद्धयंति जन्तवः ।३१।
हर्षदः कामदश्चेति, रिपुघ्नः सर्वसौख्यदः ।
पातु नः परमानंदः, तत्क्षणं संस्तुतो जिनः ॥ ३२॥
तत्त्वरूपमिदं स्तोत्रं, सर्वमांगल्यसिद्धिदम् ।
त्रिसंध्यं यः पठेन्नित्यं, नित्यां प्राप्नोति स श्रियम् ॥३३॥
इति श्रीपार्श्वनाथस्तवनम् ।

ॐ नमः सिद्धेभ्यः

यति-क्रिया-मंजरी

णमो अरहंताणं णमो सिद्धाणं णमो आइरियाणं
णमो उवज्झायाणं णमो लोए सव्व साहूणं ॥१॥

पंच परम गुरु देवान्-प्रणम्य शिरसा सरस्वतीं देवीम् ।
निश्रेयसि धातारं जिनोक्तधर्मं सदा वंदे ॥ २ ॥
वीरसागरनामानं गुरुं नत्वा सुभक्तितः ।
संगृह्यते शास्त्रमाश्रित्य यतीनां कृति-मंजरी ॥ ३ ॥

यति के मूलगुण व क्रियायें ।

वद समिदिंदिय रोधो लोचो आवासयमचेलमण्हाणं ।
खिदिसयणमदंतवणं ठिदिभोयणमेयभत्तं च ॥

अर्थ---पंच महाव्रत पंच समिति पंचेन्द्रियरोध लोच षट्
आवश्यक अचेलकत्व अस्नान क्षितिशयन अदंतधावन

स्थितिभोजन और एक भुक्ति, ये २८ मूलगुण साधु के होते हैं। तथा—

द्वादश तप बावीस परीषह ये ३४ उत्तर गुण कहलाते हैं यहां प्रकृत में षडावश्यक क्रिया के प्रयोग की विधि से ही प्रयोजन है।

श्री "अनगार धर्मामृत" के नवमे अध्याय में "नित्य नैमित्तिक क्रिया प्रयोग विधि" बतलाई गई है, इसमें उसी के अनुसार ही सामायिक आदि क्रियाओं के प्रयोग का स्पष्टीकरण किया गया है तथा प्रसंगानुसार अनगार धर्मामृत का आठवां अध्याय व मूलाचार, आचारसार चारित्रसार वेदनाखण्ड आदि शास्त्रों से भी उदाहरण लेकर विशेष रीति से खुलासा किया गया है।

आचारांग में शिष्य ने प्रश्न किया—

कहं चरे कहं चिट्ठे कहमासे कहं सये।
कहं भासे कहं भुञ्जे कहं पावं ण बंधइ ॥

अर्थ—कैसे आचरण करे, कैसे ठहरे, कैसे बैठे, कैसे सोये, कैसे वचन बोले व कैसे भोजन करे कि जिससे पापों से बंध को प्राप्त न होवे।

उत्तर में

जदं चरे जदं चिट्ठे जदमासे जदं सये।
जदं भासे जदं भुञ्जे एवं पावं ण बंधइ ॥

अर्थात् यत्नपूर्वक आचरण करे यत्नपूर्वक स्थित होवे, यत्न पूर्वक बैठे, यत्न पूर्वक सोवे, यत्न पूर्वक वचन बोले व यत्न पूर्वक भोजन करे तो इस प्रकार से पापों से नहीं बंधेगा।

आवश्यक क्रियाओं के नाम

सामायिकं चतुर्विंशतिस्तवो वंदना प्रतिक्रमणं।
प्रत्याख्यानं कायोत्सर्गश्चावश्यकस्य षड्भेदाः ॥

(अनगारधर्मामृते)

तेरह क्रियाओं के नाम

आवश्यकानि षट् पंचपरमेष्ठिनमस्क्रिया।
निसही चासही साधोः क्रियाः कृत्यास्त्रयोदश ॥

अनगार • ॥

अर्थ—सामायिक चतुर्विंशति स्तव, वंदना, प्रतिक्रमण, प्रत्याख्यान व कायोत्सर्ग ये छह आवश्यक क्रियायें हैं। ये ही ६ छह आवश्यक, पांच ५ परमेष्ठिनमस्कार १२ निः सही और १३ असही ये त्रयोदश क्रियायें साधु को नित्य ही करने योग्य हैं।

इनही तेरह क्रियाओं को करण भी कहते हैं। तथा पंच महाव्रत पंच समिति और तीन गुप्ति इन तेरह प्रकार के चारित्रको करण कहते हैं। यहां पर यतिक्रियामंजरी में

स्वाध्याय वंदना और नियम (प्रतिक्रमण विधि) की ही प्रधानता है ।

निःसही—असही का स्वरूप

वसत्यादौ विशेत् तत्स्थं भूतादिं निसही गिरा ।
आपृच्छ्य तस्मान्निर्गच्छेत्तं चापृच्छ्यासही गिरा ॥

अर्थात् साधु जन मठ चैत्यालयादि वसतिकाओं में प्रवेश करते समय वहां पर स्थित भूतादि देवताओंको निःसही शब्द के द्वारा पूछ कर प्रवेश करे व निकलते समय असही शब्द के द्वारा पूछ करके आशीर्वाद देकर निकले ।

आर्यिकाओं की समाचार विधि

इन सभी क्रियाओं के करने के अधिकारी केवल मुनि जन ही हैं अथवा अन्य किसी को भी अधिकार है, इत्यादि प्रश्न के होने पर—

मूलाचार में सामान्यतया समाचार विधि का प्रतिपादन करके आचार्य कहते हैं "यदि यतीनामयं न्यायः, आर्यिकाणां कः ? इत्यत आह" । मूलाचारमें अध्याय ४ गाथा १८७ पृ० १६१ में "एसो अज्झाणं पि अ समाचारो जहाविक्खओ पुव्वं । सव्वह्मि अहोरत्ते विभासिदव्वो जहा जोग्गं ॥

अर्थ—ऊपर जो भी समाचार कथन मुनियों के लिये है वही समाचार विधान आर्यिकाओं को भी अहर्निश करना चाहिये परन्तु वृक्ष मूलादि योगरहित पालन करना चाहिए।

तथैव—जहाजोग्गं—यथायोग्यं आत्मानुरूपो वृक्ष-मूलादिरहितः। सर्वस्मिन्नहोरात्रे एषोऽपि समाचारो यथायोग्यमार्यिकाणां आर्यिकाभिर्वा प्रकटयितव्यो विभावयितव्यो यथाख्यातः पूर्वस्मिन्निति"

यहां पर वृक्ष मूलादि शब्द से वृक्ष मूल आतापन अभ्रावकाशयोग व प्रतिमा योग का निषेध है। यहां पर कदाचित् कोई यह प्रश्न करे कि नग्नता और खडे होकर आहार लेने का निषेध होने से आर्यिकाओं के अट्ठाईस मूलगुणों के स्थान में छब्बीस ही तो रहे। परन्तु ऐसा प्रश्न तो आगम तथा युक्ति से ठीक नहीं मालुम पड़ता है। नग्न न रह कर वस्त्र (१ साड़ी मात्र) ग्रहण करना व बैठ कर आहार करना भी उनका मूलगुण ही है। तथाहि—

वस्त्रयुग्मं सुबीभत्सलिंगप्रच्छादनाय च।
आर्याणां संकल्पेन तृतीये मूलमिष्यते

(प्रायश्चित्त शास्त्र)

अतएव पर्यायजन्य असमर्थता के कारण आचार्यों का उनके लिये ऐसा ही आदेश है तथा व्रतोंकी प्रदानता

में २८ मूलगुण उन्हें दिये जाते हैं और मुनियों के ही संस्कारों का उनमें आरोपण किया जाता है।

अतः औपचारिक ही क्यों न हो अट्ठावीस मूलगुण आर्यिकाओं के होते हैं। तथा ये समाधिकाल में अपवाद रूप दिगम्बर अवस्थाको भी धारण कर सकती हैं व आचार्य की आज्ञानुसार गणिनी को शिक्षा दीक्षादि का अधिकार प्राप्त है।

उद्दिष्ट त्यागी श्रावक, क्षुल्लक, ऐलक व दशवीं प्रतिमाधारी श्रावक भी गुरुओं के चरण सानिध्य में रह-कर इन षडावश्यकों का पालन करे। तथाहि—

बन्दना त्रितये काले प्रतिक्रान्ते द्वयं तथा।
स्वाध्यायानां चतुष्कं च योगिभक्तिद्वयं पुनः॥
उत्कृष्टश्रावकेनामूः कर्तव्या यत्नतोऽन्वहं।
षडष्टौ द्वादश द्वे च क्रमशोऽमूषु भक्तयः॥

अर्थात्—त्रिकाल बन्दना में ६ कायोत्सर्ग, प्रातः काल, सायंकाल के दो प्रतिक्रमण में ८ कायोत्सर्ग ४ स्वाध्याय के १२ व योगिभक्ति के २ कायोत्सर्ग हैं विधिवत् इन्हें क्षुल्लकादि भी करें तथा—

दिणपडिम वीरचरिया तियाल योगेसु णत्थि अहियारो।
सिद्धान्त रहस्साणवि अज्झयणं देशविरदाणं (वसुनन्दि)

अर्थात्—दिन प्रतिमा, वीरचर्या, त्रिकाल योग (वृक्षमूल आतापन अभ्रावकाश) करने को, सिद्धान्त

शास्त्र रहस्य (प्रायश्चित्त) शास्त्र अध्ययन का अधिकार देश-विरत अर्थात् एकादश प्रतिमा तक धारण करने वाले श्रावकों को नहीं है ।

कायोत्सर्ग विधि

अट्ठसदं देवसियं कल्लद्धं पक्खियं च तिण्णिसया ।
उस्सासा कायव्वा णियमन्ते अप्पमत्तेण ।।१६०।।
चादुम्मासे चउरो सदाइं सम्वत्सरे य पंच सया ।
काओसग्गुसाआ पंचसु ठाणेसु णादव्वा ।।१६१।।
पाणिवह मुसावाए अदत्तमेहुणण परिग्गहे चेव ।
अट्ठसदं उस्सासा काओसग्गम्हि कादव्वा ।।१६२।।
भत्ते पाणे गामन्तरे य अरहन्त समण सेज्जासु ।
उच्चारे पस्सवणे पणवीसं होंति उस्सासा ।।१६३।।
उद्देसे णिद्देसे सज्झाए वंदणे य पडिकमणे ।
सत्तावीसुस्सासा काओसग्गम्हि कादव्वा ।।१६४।।

षडावश्यकाधिकार: ।।७।। पृष्ठ ४६५ मूलाचारे ।

अर्थ—दैवसिक प्रतिक्रमण में १०८ रात्रिक में ५४ पाक्षिक में ३००, चातुर्मासिक में ४०० सांवत्सरिक में ५०० स्वासोच्छ्वास प्रमाणों द्वारा कायोत्सर्ग वीर भक्ति के समय में करना चाहिए । तथा--

पञ्च महाव्रतों में किसी भी एक व्रतमें अतिचार के लगने पर १०८ उछ्वासों में ही दैवसिक प्रतिक्रमण विधि करना चाहिए ।

गोचरी करके आने पर गोचार प्रतिक्रमण में ग्रामांतर गमन में तथा जिन भगवान् की निषद्या भूमि अर्थात् जन्म तप ज्ञान निर्वाण स्थानों की वन्दना में तथा श्रमण निषद्या भूमि की वन्दना में व मलमूत्रादि बिसर्जनमें २५ उच्छ्वास प्रमाण कायोत्सर्ग करना चाहिये तथा—उद्देश–ग्रन्थादिके प्रारम्भ कालमें, निर्देश–समाप्ति काल में स्वाध्याय करने में देवगुरु वन्दना करने में सत्ताईस उच्छ्वास प्रमाण कायोत्सर्ग होता है।

विशेष—दैवसिकादि कायोत्सर्ग वीरभक्ति की प्रतिज्ञा करने पर अर्थात् वीरभक्ति पढ़ने से पहले करना चाहिये निषद्या वन्दना स्वाध्यायादि कायोत्सर्ग उन उन क्रियाओं की "कृत्यविज्ञापना" अनन्तर करना चाहिए तथा मल मूत्रादि विसर्जन में कोई २ ईर्यापथ शुद्धि प्रतिक्रमण कहते हैं परन्तु वास्तव में इनका प्रतिक्रमण दैवसिक रात्रिक प्रतिक्रमण में आये हुए उत्सर्ग समिति प्रतिक्रमण "उच्चार पस्सवण" इत्यादि में हो जाता है पृथक् करने का कोई विधान नहीं आया अतः कायोत्सर्ग मात्र करना चाहिए।

प्रतिदिन के कायोत्सर्ग की गणना

स्वाध्याये द्वादशेष्टा षड्वन्दनेऽष्टौ प्रतिक्रमे।
कायोत्सर्गा योगभक्तौ द्वौ चाहोरात्रगोचराः ॥७५॥

॥ अ० प्र० ८ ॥

एक एक वारके स्वाध्यायमें तीन तीन भक्ति सम्बन्धी तीन २ कायोत्सर्गों के होने से, चार वारके स्वाध्याय के १२ तथा त्रिकाल देव बन्दना (सामायिक) सम्बन्धी दो दो मिलकर छह हुये। दैवसिक रात्रिक प्रतिक्रमण सम्बन्धी आठ तथा रात्रि योग ग्रहण मे १ व निष्ठापन में एक मिलाकर २८ कायोत्सर्ग मुनियों को नित्य प्रति करने योग्य हैं।

भक्ति में कृतिकर्म में कायोत्सर्ग की विधि

दुओणदं जहाजादं बारसावत्तमेव च।
चदुस्सिरं तिसुद्धं च किदियम्मं पउंजदे ॥मूलाचारे॥

तथाहि–क्रियायामस्यां व्युत्सर्गभक्तेरस्याः करोम्यहं।
विज्ञाप्येति समुत्थाय गुरुस्तवनपूर्वकम् ॥
कृत्वा करसरोजातमुकुलालकृतं निजं।
भाललीलासरः कुर्यात्त्र्यावर्ता शिरसो नतिम् ॥
आद्यस्य दण्डकस्यादौ मंगलादेरयं क्रमः।
तदंगेऽप्यंगव्युत्सर्गः कार्योऽतस्तदनंतरम्।
कुर्यात्तथैव थोस्सामीत्याद्यार्याद्यन्तयोरपि।
इत्यस्मिन् द्वादशावर्ता शिरोनतिचतुष्टयं ॥
॥ आचारसारे ॥

अर्थ—इस क्रिया में इस भक्ति के कायोत्सर्ग को मैं करता हूं। इस प्रतिज्ञा को करके उठकर के "णमोकार

मन्त्र" को एक बार पढ़कर हस्त को मुकुलित करके तीन आवर्त और एक शिरोनति पूर्वक नमस्कार करे। चत्तारि दंडक पढ़कर पुनः तीन आवर्त एक शिरोनति करे। अनन्तर कायोत्सर्ग (नव बार महामन्त्र जप) करें पुनः नमस्कार करके तीन आवर्त व एक शिरोनति करके थोस्सामि स्तव दंडक पढ़े व पुनः तीन आवर्त एक शिरोनमन करें इस प्रकार से एक कायोत्सर्ग के कृति कर्म में द्वादश आवर्त और चार शिरोनति होतीं हैं।

मन्त्र जपनेकी विधिः

जिनेन्द्र मुद्रया गाथां ध्यायेत् प्रीतिविकस्वरे।
हृत्पंकजे प्रवेश्यांतर्निरुद्धय मनसानिलम् ॥२२॥
पृथग्द्वि द्वयेक गाथांश चिंतांते रेचयेच्छनैः।
नव कृत्वः प्रयोक्तवं दहत्यंहः सुधीमहत् ॥२३॥

॥ अनगा० ६ अ० ॥

अर्थ—प्रीति से विकास को प्राप्त हृदय कमल में मन के वायु को अन्दर लेजाकर तथा अन्दर ही रोक कर मन्त्र का ध्यान करे। पृथक् पृथक् गाथा के दो दो अंशों में एक एक से रेचन (वायु को बाहर) करे। यथा "णमो अरहन्ताणं" चिन्तवन करते हुए श्वास अन्दर ले जाकर रोके। "णमो सिद्धाणं" चिंतवन में उच्छ्वास

को बाहर निकाले। "णमो आइरियाणं" में अन्दर लेवे। "सव्वसाहूणं" पद के चिन्तवन से वायु को बाहर निकाले। इस प्रकार एक मन्त्रमें तीन स्वासोच्छ्वास के होने से नव बार मन्त्र के जपने से २७ स्वासोच्छ्वास होते है जो महान् पापों को नाश करने में समर्थ होते हैं।

इसी प्रकार १८ बार मन्त्र के जपने में ५४, ३६ बार में १०८, १२ कायोत्सर्ग में ३००, १६ कायोत्सर्ग में ४००, व २० कायोत्सर्ग में ५०० उच्छ्वास होते हैं।

यहां पर कायोत्सर्ग का लक्षण नवबार मन्त्र जप का है। तथा इतने इतने उच्छ्वास प्रमाण जप को भी कायोत्सर्ग कहते हैं।

मानसिक जप चिंतवन प्रति अशक्त जीवों के लिए कहते हैं—

वाचाप्युपांशु व्युत्सर्गे कार्यो जाप्यः स वाचिकः।
पुण्यं शतगुणं चैत्तः सहस्रगुणाम वहेत्॥२४॥

॥ अन० अ० ६॥

अर्थ—वचनके द्वारा जिसका स्पष्ट उच्चारण अन्य न सुन सकें अपने ही अन्तरंग में उच्चारण हो उसे उपांशु जप कहते है। यथा—"णमो अरहंताणं" पढ़कर रुक जावे, णमो सिद्धाणं पढ़कर रुके, णमो आइरियाणं व णमो उवज्झायाणं पढ़कर रुके अनन्तर "णमो लोए"

"सव्वसाहूणं" पढ़कर रुकने से इस वाचिक जाप्य में सौ गुणा फल होता है, व चिन्तवन स्वरूप मानसिक जाप्य में सहस्र गुणा फल प्राप्त होता है।

अपराजितमन्त्रो वै सर्वविघ्नविनाशनः।
मङ्गलेषु च सर्वेषु प्रथमं मङ्गलं मतः॥

तथा—अकलंक प्रतिष्ठादि शास्त्रों में भी भक्तियोंके करने का विधान इसी प्रकार से ही किया गया है।

विधि—अथ······१ क्रियायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावन्दनास्तव समेतं···२··· भक्ति कायोत्सर्गं करोम्यहं। इति विज्ञाप्य-भूमि स्पर्श-नात्मक नमस्कार करें।

णमो अरहंताणं, णमो सिद्धाणं, णमो आइरियाणं
णमो उवज्झायाणं णमो लोए सव्वसाहूणं॥
चत्तारि मङ्गलं अरहन्त मङ्गलं सिद्ध मङ्गलं
साहू मङ्गलं केवलि पण्णत्तो धम्मो मङ्गलं।
चत्तारि लोगुत्तमा अरहन्त लोगुत्तमा, सिद्ध लोगुत्तमा
साहू लोगुत्तमा, केवलि पण्णत्तो धम्मो लोगुत्तमा।

१ जिस क्रिया को करना हो उसका नाम लेना यथा "नंदीश्वर पर्व क्रियायां" इत्यादि। २—जिस भक्ति को करना हो उसका नाम लेवें यथा सिद्धभक्ति इत्यादि।

(यहां मन्त्र पढ़ते हुए मुकुलित अंजलि से तीन आवर्त और शिरोनति करें)

चत्तारि सरणं पव्वज्जामि अरहन्त सरणं पव्वजामि सिद्धसरणं पव्वजामि साहू सरणं पव्वजामि, केवलि पण्णत्तो धम्मो सरणं पव्वज्जामि। अड्ढाइज्ज दीव दो समुद्देसु पण्णारस कम्म भूमिसु जाव अरहंताणं भयवन्ताणं आदियराणं तित्थयराणं जिणाणं जिणोत्तमाणं केवलियाणं सिद्धाणं बुद्धाणं परिणिव्वुदाणं अन्तयडाणं पारयडाणं धम्माइरियाणं धम्म देसियाणं धम्मणायंगाणं धम्मवरचाउरंगचक्कवट्टीणं देवाहिदेवाणं णाणाणं दंसणाणं चरित्ताणं सदा करेमि किरियम्मं करेमि भंत्ते! सामायिय सव्व सावज्ज जोगं पच्चक्खामि जावज्जीव तिविहेण मणसा वचसा कायेण ण करेमि ण कारेमि कीरन्तं पि ण समणुमणामि। तस्स भन्ते! अइचारं पच्चक्खामि णिंदामि गरहामि अप्पाणं जाव अरहंताणं भयवन्ताणं पज्जुवासं करेमि ताव कालं पावकम्मं दुच्चरियं वोस्सरामि।

(इस प्रकार सामायिक दण्डक पढ़कर पुनः तीन आवर्त व एक शिरोनति करे पश्चात जिस मुद्रा से कायोत्सर्ग करे सत्तावीस उच्छ्वास में ६ जाप्य, अनन्तर प्रणाम (नमस्कार) करके पुनः खड़े होकर तीन आवर्त व एक शिरोनति करे। व मुक्ताशुक्ति मुद्रा के द्वारा चतुर्विंशति स्तव पढ़े।

स्तव—थोस्सामिहं जिणवरे तित्थयरे केवलि अणन्त जिणे।
णर पवर लोय महिये विहुयरयमले महप्पणो ॥१॥
लोयस्सुज्जोययरे धम्मं तित्थंकरे जिणे वन्दे।

अरहंते कित्तिस्से चउवीसं चेव केवलिणो ॥२॥
उसहमजियं च वंदे संभवमभिणंदणं च सुमइं च।
पउमप्पहं सुपासं जिणं च चंदप्पहं वन्दे ॥ ३ ॥
सुविहिं च पुप्फयंतं सीयल सेयं च वासुपुज्जं च।
विमलमणंतं भयवं धम्मं संतिं च वंदामि ॥ ४ ॥
कुन्थुं च जिणवरिंदं अरं च मल्लिं च सुव्वयं च णमिं।
वंदामि रिट्ठणेमिं तह पासं वड्ढमाणं च ॥ ५ ॥
एवं मए अभित्थुआ विहूयरयमला पहीणजरमरणा।
चउवीसं पि जिणवरा तित्थयरा मे पसीयंतु ॥ ६ ॥
कित्तिय वंदिय महिया एदे लोगोत्तमा जिणा सिद्धा।
आरोग्गणाणलाहं दिंतु समाहिं च मे बोहिं ॥ ७ ॥
चंदेहिं णिम्मलयरा आइच्चेहिं अहियपयासंता।
सायरमिव गंभीरा सिद्धा सिद्धिं मम दिसंतु ॥ ८ ॥

अनन्तर तीन आवर्त व एक शिरोनति करें। इस तरह एक कायोत्सर्ग में दो प्रणाम बारह आवर्त चार शिरोनमन होते हैं।

पुनः जिस भक्ति हेतुक कायोत्सर्ग किया है उस भक्ति का पाठ करें।

पूर्वोक्त प्रमाण आवर्त व शिरोमन समान होते हुए भी कहीं कहीं दण्डक व स्तव...... में लघुता पाई जाती है—तद्यथा

णमो अरहंताणं, णमो सिद्धाणं, णमो आइरियाणं।
णमो उवज्झायाणं णमो लोए सव्व साहूणं ॥

चत्तारि मंगलं–अरहन्त मंगलं, सिद्ध मंगलं, साहू मंगलं, केवलि पण्णत्तो धम्मो मंगलं, चत्तारि लोगुत्तमा, अरहंत लोगुत्तमा, सिद्ध लोगुत्तमा, साहू लोगुत्तमा, केवलि पण्णत्तो धम्मो लोगुत्तमा, चत्तारि सरणं पव्वज्जामि, अरहन्त सरणं पव्वज्जामि सिद्ध सरणं पव्वज्जामि, साहू सरणं पव्वजामि, केवलि पण्णत्तो धम्मो सरणं पव्वज्जामि जाव अरहंताणं भयवंताणं पज्जुवासं करेमि। तावकालं पावकम्मं दुच्चरियं वोस्सरामि ॥

सत्तावीस उच्छ्वास में ९ जाप्य

थोस्सामि हं जिणवरे तित्थयरे केवलि अणन्तजिणे।
णरपवरलोयमहिये विहुयरयमले महप्पण्णे ॥
लोयस्सुज्जोययरे धम्मं तीर्थंकरे जिणे वन्दे।
अरहन्त कित्तिस्से चउवीसं चेव केवलिणो ॥

किसी भी क्रिया की कृत्यविज्ञापना में कायोत्सर्ग के साथ जो दण्डक व स्तव का विधान आता है वहां पर उपरोक्त यही विधि की जाती है समय कम अथवा कारण वश लघु पाठ भी हो सकता है।

(अर्ध रात्रि के दो घड़ी अनन्तर से सूर्योदय से दो घड़ी पहले तक विरात्रि कहलाती है.) ।

नित्य क्रिया प्रयोग

अथ वैरात्रिक स्वाध्याय प्रतिष्ठापन क्रियायां श्रुत भक्ति कायोत्सर्गं करोमि (दंडकं पठित्वा जाप्य स्तव)।

अर्हद्वक्त्रप्रसूतं गणधररचितं द्वादशांगं विशालं।
चित्रं बह्वर्थयुक्तं मुनिगणवृषभैर्धारितं बुद्धिमद्भिः।
मोक्षाग्रद्वारभूतं व्रतचरणफलं ज्ञेयभावप्रदीपं,
भक्त्या नित्यं प्रवन्दे श्रुतमहमखिलं सर्वलोकैकसारम्।१।
जिनेन्द्रवक्त्रप्रतिनिर्गतं वचो यतीन्द्रभूतिप्रमुखैर्गणाधिपैः
श्रुतं धृतं तैश्च पुनः प्रकाशितं द्विषट्प्रकारं प्रणमाम्यहं श्रुतं।
कोटीशतं द्वादश चैव कोट्यो लक्षाण्यशीतिस्त्र्यधिकानि चैव
पंचाशदष्टौ च सहस्रसंख्यमेतच्छ्रुतं पंचपदं नमामि ॥
अरहंतभासियत्थं गणहरदेवेहिं गंथियं सम्मं।
पणमामि भक्तिजुत्तो सुदणाणं महोवयं सिरसा ॥४॥

अंचलिका

इच्छामि भन्ते! सुदभक्ति काओसग्गो कओ तस्मालोचेउं अंगोवंगपइण्णय पाहुडय परियम्मसुत्त पढमाणियोग पुव्वगय चूलिया चेव सुतत्थ थुय धम्म कहाइयं सुदं णिच्चकालं अंचेमि पूजेमि वन्दामि णमंस्सामि दुक्खक्खओ कम्मक्खओ बोहिलाओ सुगइगमणं समाहिमरणं जिणगुण सम्पत्ति होउ मज्झं।

गुरवः पांतु नो नित्यं ज्ञानदर्शननायकाः ।
चारित्रार्णवगम्भीराः मोक्षमार्गोपदेशकाः ॥७॥

इच्छामि भन्ते आइरियभत्तिकाओसग्गो कओ तस्सालोचेउं सम्मणाणसम्मदंसण सम्मचारित्तजुत्ताणं पंचविहाचाराणं आइरीयाणं आयारादि सुदणाणोवदेसयाणं उवज्झायाणं तिरयणगुणपालणरयाणं सव्वसाहूणं णिच्चकालं अंचेमि पूजेमि वन्दामि णमस्सामि दुक्खक्खओ कम्मक्खओ वोहिलाओ सुगई गमणं समाहिमरणं जिणगुण संपत्ति होउ मज्झं ।

स्वाध्याय प्रारम्भः

त्रैकाल्यंद्रव्यषट्कं नवपदसहितं जीवषट्कायलेश्याः ।
पंचान्ये चास्तिकाया व्रतसमितिगतिज्ञानचारित्रभेदाः
इत्येतन्मोक्षमूलं त्रिभुवनमहितैः प्रोक्तमर्हद्भिरीशैः ।
प्रत्येति श्रद्धधाति स्पृशति च मतिमान् यः स वै शुद्धदृष्टिः
सिद्धे जयप्पसिद्धे चउविह आराहणाफलं पत्ते,
वंदित्ता अरहंते वोच्छं आराहणा कमसो ।
उज्जोवणमुज्जवणं णिव्वहणं साहणं च णित्थरणं
दंसणणाणचरित्तं तवाणमाराहणा भणिया ॥

(कोई भी शास्त्र का स्वाध्याय करे) स्वाध्याय के अनन्तर अथ वैरात्रिक स्वाध्याय निष्ठापनक्रियायां

पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावन्दनास्तवन समेतं श्रीश्रुतभक्ति कायोत्सर्गं करोम्यहं ।

दण्डकं पठित्वा

नोट—अर्हद्वक्त्र प्रसूतं गणधररचितमित्यादि ।

इच्छामि भंते सुदभत्ति काओसग्गो कओ इत्यादि च ।

पूर्वाण्ह स्वाध्यायहेतु दिक्शुद्धिविधिः

पश्चात् बाहर निकल कर शुद्ध प्रासुक भूमि में स्थित होकर "पौर्वाण्हिक" स्वाध्याय के हेतु दिक् शुद्धि करे । अर्थात्:—

निष्ठाप्य पश्चिमश्यामास्वाध्यायं शुद्धिभूस्थितः ।
व्युत्सर्गेणेन्द्रकीनाशप्रचेतोधनिनां दिशः ॥७३॥
नवार्या पाठकालेन प्रत्येकं शोधयेदयं ।
पूर्वाण्ह वाचनाहेतोः कालशुद्धिविधिस्त्वयम् ॥७४॥

आचारसारे अध्याय ४

अर्थः—"वैरात्रिक स्वाध्याय" का निष्ठापन कर शुद्ध भूमि में स्थित होकर कायोत्सर्ग से नव नव बार णमोकार मन्त्र पढ़ कर पूर्वाण्ह वाचना के लिये पूर्व, दक्षिण, पश्चिम व उत्तर दिशाओं की शुद्धि करे अर्थात् क्रम से चारों दिशाओं में नव नव बार महामन्त्र का उच्चारण करे ।

रात्रि प्रतिक्रमण व योग निष्ठापन की प्रयोग विधि

श्लोक :—भक्त्या सिद्धप्रतिक्रांति वीरद्विद्वाद-शार्हताम् । प्रतिक्रामेन्मलं योगं योगिभक्त्या भजेत्त्यजेत् ।

अर्थ---सिद्धभक्ति प्रतिक्रमणभक्ति, वीरभक्ति और चतुर्विंशति भक्ति के द्वारा रात्रि जन्य दोषों का प्रतिक्रमण करे ।

"रात्री भवा रात्रिकी पश्चिमरात्रावनुष्ठेया"

अर्थात् रात्रि सम्बन्धी दोषों की विशुद्धि के लिये जो प्रतिक्रमण है वह रात्रिक प्रतिक्रमण कहलाता है और पश्चिम रात्रि में उसका अनुष्ठान करना चाहिये । और योगभक्ति के द्वारा रात्रियोग ग्रहण व मोचन करे "अद्य रात्रावत्र वसत्यां स्थातव्यमिति नियमविशेषं योगं" आज रात्रि में मैं इसी वसतिका में रहूंगा इस नियमविशेष को योग कहते हैं ।

॥ रात्रिक (दैवसिक) प्रतिक्रमणम्

जीवे प्रमादजनिताः प्रचुराः प्रदोषा, यस्मात् प्रतिक्रमणतः प्रलयं प्रयांति । तस्मात्तदर्थममलं मुनिबोधनार्थं,
वक्ष्ये विचित्रभवकर्मविशोधनार्थं ॥ १ ॥
पापिष्ठेन दुरात्मना जडधिया मायाविना लोभिना ।

ज्ञानादेव मतीन्द्रियेन भवता दुष्कर्म पतिनिर्मितम् ॥
त्रैलोक्याधिपते जिनेन्द्र भवतः श्रीपादमूलेऽधुना ।
निन्दापूर्वमहं जहामि सततं वर्वतिषुः सत्पथे ॥ २ ॥
खम्मामि सव्व जीवाणं सव्वे जीवा खमंतु मे ।
मित्ती मे सव्वभूदेसु वेरं मज्झं ण केण वि ॥ ३ ॥
रायबंध पदोसं च हरिसं दीणभावयं ।
उस्सुगत्तं भयं सोगं रदिमरदिं च वोस्सरे ॥ ४ ॥
हा दुट्ठ कयं हा दुट्ठचिंतियं भासियं च हा दुट्ठं ।
अंतो अंतो डज्झमि पच्छुत्तावेण वेदंतो ॥ ५ ॥
दव्वे खेत्ते काले भावे य कदावराहसोहणयं ।
णिंदण गरहण जुत्तो मण वच कायेण पडिकमणम् ॥६॥
एइंदिया, बेइंदिया, ते इंदिया चउरिंदिया पंचिंदिया,
पुढविकाइया आउकाइया तेउकाइया वाउकाइया वणप्फ-
दिकाइया तसकाइया एदेसिं उद्दावणं परिदावणं विराहणं
उवघादो कदो वा कारिदो वा कीरंतो वा समणु
मणिणदो तस्स मिच्छा मे दुक्कडं ।
वदसमिदिंदिय रोधो लोचो आवासयमचेलमण्हाणं ।
खिदिसयणमदंतवणं ठिदिभोयणमेयभत्तं च ॥ १ ॥
एदे खलु मूलगुणा समणाणं जिणवरेहिं पण्णत्ता ।
एत्थ पमादकदादो अइचारादो णियत्तो हं ॥ २ ॥
छेदोवट्ठावणं होदु मज्झं ।

पंचमहाव्रत-पंचसमिति पंचेन्द्रियरोध लोच-षडावश्यक क्रियादयोऽष्टाविंशति-मूलगुणाः, उत्तमक्षमामार्दवार्जवशौच-सत्यसंयमतपस्त्यागाकिंचन्यब्रह्मचर्याणि दशलाक्षणिको धर्म अष्टादशशीलसहस्राणि, चतुरशीतिलक्षगुणाः, त्रयोदशविधं चारित्रं, द्वादशविधं तपश्चेति सकलं सम्पूर्णं अर्हत्सिद्धाचार्योपाध्यायसर्वसाधुसाक्षिकं सम्यक्त्वपूर्वकं दृढव्रतं सुव्रत समारूढं ते मे भवतु।

अथ सर्वातिचारशुद्ध्यर्थं रात्रिकप्रतिक्रमणक्रियायां कृतदोषनिराकरणार्थं पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावन्दनास्तवसमेतं आलोचनासिद्धभक्तिकायोत्सर्गं करोम्यहम्——

(अपराह्न में दिवस सम्बन्धी प्रतिक्रमण में 'दैवसिक' शब्द का प्रयोग करें)

इति प्रतिज्ञाप्य

णमो अरहंताणमित्यादि सामायिकदंडकं पठित्वा कायोत्सर्गं कुर्यात्।

थोस्सामीत्यादि (चतुर्विंशतिस्तवं पठेत्)

श्रीमते वर्धमानाय नमो नमितविद्विषे।
यज्ज्ञानान्तर्गतं भूत्वा त्रैलोक्यं गोष्पदायते॥ १॥

तवसिद्धे णयसिद्धे संजमसिद्धे चरित्तसिद्धे य।
णाणम्मि दंसणम्मि य सिद्धे सिरसा णमंसामि॥ २॥

इच्छामि भंते ! सिद्धभत्तिकाओसग्गो कओ तस्सालो-
चेउं, सम्मणाणसम्मदंसणसम्मचरित्तजुत्ताणं, अट्ठविह-
कम्ममुक्काणं, अट्ठगुणसंपण्णाणं, उड्ढलोयमत्थयम्मि
पयिट्ठियाणं, तवसिद्धाणं, णयसिद्धाणं, संजमसिद्धाणं,
चरित्तसिद्धाणं, अतीदाणागदवट्टमाणकालत्तयसिद्धाणं,
सव्वसिद्धाणं, णिच्चकालं, अंचेमि, पूजेमि, वंदामि, णमं-
सामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइगमणं,
समाहिमरणं जिणगुण सम्पत्ती होउ मज्झं।

आलोचना—

इच्छामि भंते ! चरित्तायारो तेरसविहो परिविहाविदो,
पंचमहव्वदाणि पंचसमिदीओ तिगुत्तीओ चेदि। तत्थ
पढमे महव्वदे पाणिघादादो वेरमणं से पुढविकाइया
जीवा असंखेज्जासंखेज्जा, आउकाइया जीवा असंखेज्जा—
संखेज्जा, तेउकाइया जीवा असंखेज्जासंखेज्जा, वाउकाइया
जीवा असंखेज्जासंखेज्जा, वणप्फदिकाइया जीवा अणन्ता-
णंता हरिआ वीआ अंकुरा छिण्णा भिण्णा, तेसिं उद्दावणं
परिदावणं विराहणं उवघादो कदो वा कारिदो वा
कीरंतो वा समणुमणिदो तस्स मिच्छा मे दुक्कडं ॥१॥
वेइंदिया जीवा असंखेज्जासंखेज्जा कुक्खिकिमि संखखुल्लुय
वराडय-अक्ख रिट्ठवाल संबुक्क-सिप्पि-पुलविकाइया
तेसिं उद्दावणं परिदावणं विराहणं उवघादो कदो वा

कारिदो वा कीरंतो वा समणुमणिदो तस्स मिच्छा मे दुक्कडं ॥ २ ॥

तेइंदिया जीवा असंखेज्जासंखेज्जा कुंथु-द्देहिय-विछियगोमिंद-गोजुव-मक्कुण-पिपीलियाइया, तेसिं उद्दावणं परिदावणं विराहणं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमणिदो तस्स मिच्छा मे दुक्कडं ॥ ३ ॥

चउरिंदिया जीवा असंखेज्जासंखेज्जा दंसमसयमक्खि-पयंगकीड-भमर-महुयर-गोमच्छियाइया, तेसिं उद्दावणं परिदावणं विराहणं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमणिदो तस्स मिच्छा मे दुक्कडं ॥४॥

पंचिंदिया जीवा असंखेज्जासंखेज्जा अंडाइया पोदाइया जराइया रसाइया संसेदिमा सम्मुच्छिमा उब्भे-दिमा उववादिमा अवि चउरासीदिजोणिपमुहसदसहस्सेसु, एदेसिं उद्दावणं परिदावणं विराहणं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमणिदो तस्स मिच्छा मे दुक्कडं ॥ ५ ॥

प्रतिक्रमणपीठिकादण्डकः

इच्छामि भन्ते ! (देवसियम्मि) राईयम्मि आलोचेउं, पंचमहव्वदाणि तत्थ पढमं महव्वदं पाणादिवादादो वेर-

मणं, तिदियं महव्वदं अदत्तादाणादो वेरमणं, तिदियं महव्वदं अदत्तादाणादो वेरमणं, चउत्थं महव्वदं मेहुणादो वेरमणं, पंचमं महव्वदं परिग्गहादो वेरमणं, छट्ठं अणुव्वदं राईभोयणादो वेरमणं, इरियासमिदीए भासासमिदीए, एसणासमिदीए, आदाणणिक्खेवणसमिदीए, उच्चारपस्सवण-खेलसिंहाणवियडिपइट्ठावणियासमिदीए, मणगुत्तीए वचि-गुत्तीए कायगुत्तीए, णाणेसु दंसणेसु चरित्तेसु, बावीसाए परीसहेसु, पणवीसाए भावणासु, पणवीसाए किरियासु, अट्-ठारसीलसहस्सेसु चउरासीदिगुण सयसहस्सेसु, बारसण्हं संजमाणं, बारसण्हं तवाणं, बारसण्हं अङ्गाणं चोदसण्हं पुव्वाणं, दसण्हं मुंडाणं दसण्हं समणधम्माणं, दसण्हं धम्मज्झाणाणं णवण्हं बंभचेरगुत्तीणं, णवण्हं णोक-सायाणं, सोलसण्हं कसायाणं, अट्ठण्हं कम्माणं अट्ठण्हं पवयणमाउयाणं, अट्ठण्हं सुद्धीणं, सत्तण्हं भयाणं, सत्तविहं संसाराणं, छण्हं जीवणिकायाणं, छण्हं आवासयाणं, पंचण्हं इंदियाणं पंचण्हं पञ्चमहव्वयाणं पंचण्हं चरित्ताणं, चउण्हं सण्णाणं चउण्हं पच्चयाणं, चउण्हं उवसग्गाणं, मूलगुणाणं, उत्तरगुणाणं दिट्ठियाए पुट्ठियाए पदोसियाए परदावणियाए, से कोहेण वा माणेण वा माएण वा लोहेण वा रागेण वा दोसेण वा मोहेण वा हस्सेण वा भएण वा पदोसेण वा

पमादेण वा पिम्मेण वा पिवासेण वा लज्जेण वा गारवेण वा एदेसिं अच्चासणदाए, तिण्हं दंडाणं तिण्हं लेस्साणं तिण्हं गारवाणं, दोण्हं अट्टरुद्दसंकिलेसपरिणामाणं, तिण्हं अप्पसत्थसंकिलेस परिणामाणं, मिच्छणाण-मिच्छदंसण-मिच्छचरित्ताणं मिच्छत्तपाउग्गं असंयमपाउग्गं कसाय पाउग्गं, जोगपाउग्गं, अपाउग्गसेवणदाए, पाउग्गगरह-णदाए, इत्थं मे जो कोई (देवसिओ) राईओ अदिक्कमो वदिक्कमो अइचारो अणाचारो आभोगो अणाभोगो। तस्स भन्ते! पडिक्कमामि, मए पडिक्कंतं तस्स मे सम्मत्त-मरणं समाहिमरणं पंडिय मरणं, वीरियमरणं दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिण-गुणसम्पत्ति होउ मज्झं ॥ २ ॥

वदसमिदिंदियरोधो लोचो आवासयमचेलमण्हाणं ।
खिदिसयणमदन्तवणं ठिदिभोयणमेयभत्तं च ॥ १ ॥
एदे खलु मूलगुणा समणाणं जिणवरेहिं पण्णत्ता ।
एत्थ पमादकदादो आइचारादो णियत्तोहं ॥२॥

छेदोवट्ठावणं होदु मज्झं ।

(इति प्रतिक्रमणपीठिकादंडकः)

अथ सर्वातिचारविशुद्धयर्थं रात्रिक (दैवसिक) प्रतिक्र-मणक्रियायां कृतदोषनिराकरणार्थं पूर्वाचार्यानुक्रमेण सक-

लकर्मक्षयार्थं भावपूजावन्दनास्तवसमेतं श्रीप्रतिक्रमणभक्ति-कायोत्सर्गं करोम्यहम्---

णमो अरहन्ताणं (इत्यादि दंडकं पठित्वा कायोत्सर्गं कुर्यात् । अनन्तरं थोस्सामीत्यादि पठेत्) ।

(निषिद्धिका दंडकाः)

णमो अरहंताणं णमो सिद्धाणं णमो आइरियाणं
णमो उवज्झायाणं णमो लोए सव्व साहूणं ॥ ३ ॥

णमो जिणाणं ३, णमोनिस्सिहीए ३, णमोत्थु दे ३, अरहंत ! सिद्ध ! बुद्ध णीरय ! णिम्मल ! सममण ! सुभमण ! सुसमत्थ ! समजोग ! समभाव ! सल्लघट्टाण सल्लघत्ताण ! णिब्भय ! णीराय ! णिद्दोस ! णिम्मोह ! णिम्मम ! णिस्संग ! निस्सल्ल ! माण-माय मोस-मूरण ! तवप्पहावण ! गुणरयण सीलसायर अणंत ! अप्पमेय ! महदिमहावीरवड्ढमाणबुद्धरिसिणो चेदि णमोत्थु ए णमोत्थु ए णमोत्थु ए ।

मम मंगलं अरहंता य सिद्धा य बुद्धा य जिणा य केवलिणो ओहिणाणिणो मणपज्जवणाणिणो चउदसपुव्वं-गामिणो सुदसमिदिसमिद्धा य तवो य वारहविहो तवस्सी, गुणा य गुणवन्तो य महरिसी तित्थं तित्थंकरा य, पवयणं पवयणी य, णाणं णाणी य, दंसणं दंसणी य, संजमो संजदा य, विणओ विणादा य, बंभचेरवासी बंभ-

चारीय, गुत्तीओ चेव गुत्तिमंतो य, मुत्तीओ चेव मुत्ति-मंतो य, समिदीओ चेव समिदिमन्तो य, सुसमयपरसमय-विदू, खंतिक्खवगा य, खंतिवंतो य, खीणमोहा य खीणवंतो य बोहियबुद्धा य बुद्धिमन्तो य, चेइयरुक्खा य चेइयाणि।

उड्ढमहतिरियलोए सिद्धायदणाणि णमंसामि, सिद्ध-णिसीहियाओ अट्ठावयपव्वए सम्मेदे उज्जंते चंपाए पावाए मज्झिमाए हत्थिवालियसहाए जाओ अण्णाओ काओवि णिसीहियाओ जीवलोयम्मि, ईसपब्भारतलग्ग-याणं सिद्धाणं बुद्धाणं कम्मचक्कमुक्काणं णीरयाणं णिम्मलाणं, गुरुआइरिय-उवज्झायाणं, पव्वत्तित्थेर-कुलयराणं, चउवण्णो य समणसंघो य भरहेरावएसु दससु पंचसु महाविदेहेसु। जे लोए संति साहवो संजदा तवसी एदे मम मंगलं पवित्तं। एदेहं मंगलं करेमि भावदो विसुद्धो सिरसा अहिवंदिऊण सिद्धे काऊण अंजलिं मत्थ-यम्मि, तिविहं, तियरणसुद्धो ॥६॥

(इति निषिधिका दण्डकाः)

पडिक्कमामि भन्ते ! राइयस्स (देवसियस्स) अइचारस्स अणाचारस्स मणदुच्चरियस्स वचिदुच्चरियस्स कायदु-च्चरियस्स णाणाइचारस्स दंसणाइचारस्स तवाइचारस्स वीरियाइचारस्स चारित्ताइचारस्स पंचण्हं महव्वयाणं पंचण्हं समिदीणं तिण्हं गुत्तीणं छण्हं आवासयाणं छण्हं

जीवणिकायाणं विराहणाए पील कदो वा कारिदो व कीरन्तो वा समणुमणिदो तस्स मिच्छा मे दुक्कडं ॥१॥

पडिक्कमामि भन्ते ! अइगमणे णिग्गमणे ठाणे गमणे चंकमणे उव्वत्तणे आउंटणे पसारणे आमासे परिमासे कुइदे कक्कराइदे चलिदे णिसण्णे सयणे उव्वट्टणे परियट्टणे एइंदियाणं बेइंदियाणं तेइंदियाणं चउरिंदियाणं पंचिन्दियाणं जीवाणं संघट्टणाए संघादणाए उद्दावणाए परिदावणाए विराहणाए एत्थ मे जो कोई देवसिओ (राइओ), अदिक्कमो वदिक्कमो अइचारो अणाचारो तस्स मिच्छा मे दुक्कडं ॥२॥

पडिक्कमामि भन्ते ! इरियावहियाए विराहणाए उड्ढमुहं चरंतेण वा अहोमुहं चरंतेण वा तिरियमुहं चरन्तेण वा दिसिमुहं चरन्तेण वा विदिसिमुहं चरन्तेण वा पाणचंकमणदाए बीयचंकमणदाए हरियचंकमणदाए उत्तिंगपणयदयमट्टियमक्कडय तन्तुसन्ताण चंकमणदाए पुढविकाइयसंघट्टणाए आउकाइयसंघट्टणाए तेउकाइयसंघट्टणाए वाउकाइयसंघट्टणाए वणप्फदिकाइयसंघट्टणाए तसकाइयसंघट्टणाए परिदावणाए विराहणाए इत्थ मे जो कोई इरियावहियाए अइचारो अणाचारो तस्स मिच्छा मे दुक्कडं ॥३॥

पडिक्कमामि भन्ते ! उच्चार-पस्सवण-खेल-सिंहाण वियडिपयट्ठावणियाए पइठ्ठावंतेण जो कोई पाणा वा भूदा वा जीवा वा सत्ता वा संघट्टिदा वा संघादिदा वा उद्दाविदा वा परिदाविदा वा इत्थ मे जो कोई राईओ देवसिओ अईचारो अणाचारो तस्स मिच्छा मे दुक्कडं ।४।

पडिक्कमामि भन्ते ! अणेसणाए पाणभोयणाए पणयभोयणाए बीयभोयणाए हरियभोयणाए आहा-कम्मेण वा पच्छाकम्मेण वा पुराकम्मेण वा उद्दिट्ठयडेण वा णिद्दिट्ठयडेण वा दयसंसिट्ठयडेण वा रससंसिट्ठयडेण वा परिसादणियाए पइट्ठावणियाए उद्देसियाए णिद्देसियाए कीदयडे मिस्से जादे ठविदे रइदे अणिसिट्ठे वलिपाहुडदे पाहुडदे घट्टिदे मुच्छिदे अइमत्तभोयणाए इत्थ मे जो कोई गोयरिस्स अइचारो अणाचारो तस्स मिच्छा मे दुक्कडं ५

पडिक्कमामि भन्ते ! सुमिणिंदियाए विराहणाए इत्थि-विप्परियासियाए दिट्ठिविप्परियासियाए मणविप्परियासि याए वचिविप्परियासियाए कायविप्परियासियाए भोयण विप्परियासियाए उच्चावयाए सुमिणदंसणविप्परियासियाए पुव्वरए पुव्वखेलिए णाणाचिंतासु विसोतियासु इत्थ मे जो कोई देवसिओ राईओ अइचारो अणाचारो तस्स मिच्छा मे दुक्कडं ॥६॥

पडिक्कमामि भन्ते ! इत्थीकहाए अत्थकहाए भत्त-कहाए रायकहाए चोरकहाए वेरकहाए जणवयकहाए देसकहाए भासकहाए अकहाए विकहाए णिट्ठुरकहाए परपेसुण्णकहाए कन्दप्पियाए कुक्कुच्चियाए डंबरियाए मोक्खरियाए अप्पपसंसणदाए परपरिवादणादाए परदुगंछणादाए परपीडाकराए सावज्जाणुमोयणियाए इत्थ मे जो कोई देवसिओ राईओ अइचारो अणाचारो तस्स मिच्छा मे दुक्कडं ॥७॥

पडिक्कमामि भन्ते ! अट्टज्झाणे रुद्दज्झाणे इहलोय सण्णाए परलोय सण्णाए आहारसण्णाए भयसण्णाए मेहुणसण्णाए परिग्गहसण्णाए कोहसल्लाए माणसल्लाए मायासल्लाए लोहसल्लाए पेम्मसल्लाए पिवाससल्लाए णियाणसल्लाए मिच्छादंसणसल्लाए कोहकसाए माण-कसाए मायकसाए लोहकसाये किण्ह लेस्स परिणामे णीलसलेस्सपरिणामे काउलेस्सपरिणामे आरंभपरिणामे परिग्गहपरिणामे पडिसयाहिलासपरिणामे मिच्छादंसणपरि-णामे असंजमपरिणामे पावजोगपरिणामे कायसुहाहिलासपरि-णामे सद्देसु रूवेसु गन्धेसु रसेसु फासेसुकाइयाहिकरणि-याए पदोसियाए परिदावणियाए पाणाइवाइयासु, इत्थ मे जो कोई देवसिओ राईओ अइचारो अणाचारो तस्स मिच्छा मे दुक्कडं ॥८॥

पडिक्कमामि भन्ते ! एक्के भावे अणाचारे, दोसु राय-दोसेसु, तीसु दंडेसु, तीसु गुत्तीसु, तीसु गारवेसु, चउसु कसाएसु, चउसु सण्णासु, पंचसु महव्वएसु, पंचसु समि-दीसु, छसु जीवणिकाएसु, छसु आवासएसु, सत्तसु भएसु, अट्ठसु मएसु, णवसु बंभचेरगुत्तीसु, दसविहेसु समणधम्मेसु, एयारस विहेसु उवासयपडिमासु, बारह विहेसु भिक्खुपडिमासु, तेरसविहेसु किरियाट्ठाणेसु, चउदस विहेसु भूदगामेसु, पण्णरसविहेसु पमायठाणेसु, सोलसविहेसु पवयणेसु, सत्तारसविहेसु असंजमेसु, अट्ठारसविहेसु असंपराएसु, उणवीसाए णाहज्झाणेसु, वीसाए अस-माहिट्ठाणेसु, एक्कवीसाए सबलेसु, बावीसाए परीसहेसु, तेवीसाए सुद्दयडज्झाणेसु, चउवीसाए अरहन्तेसु, पणवी-साए भावणासु, पणवीसाए किरियाट्ठाणेसु, छव्वीसाए पुढवीसु, सत्तावीसाए अणगारगुणेसु, अट्ठावीसाए आया-रकप्पेसु, एऊणतीसाए पावसुत्तपसंगेसु, तीसाए मोहणी-ठाणेसु, एक्कत्तीसाए कम्मविवाएसु, बत्तीसाए जिणोवएसेसु, तेत्तीसाए अच्चासणदाए, संखेवेण जीवाण अच्चासणदाए, अजीवाण अच्चासणदाए, णाणस्स अच्चासणदाए, दंसणस्स अच्चासणदाए, चरित्तस्स अच्चासणदाए, तवस्स अच्चासणदाए, वीरियस्स अच्चासणदाए, तं सव्वं पुव्वं दुच्चरियं

गरहामि, आगामेसीएसु पच्चुप्पण्णं इक्कं तं पडिक्कमामि, अणागयं पच्चक्खामि, अगरहियं गरहामि, अणिंदियं णिंदामि, अणालोचियं आलोचेमि, आराहणमब्भुट्ठेमि विराहणं पडिक्कमामि इत्थं मे जो कोई (देवसिओ) राईओ अइचारो अणाचारो तस्स मिच्छा मे दुक्कडं ॥९॥

इच्छामि भन्ते! इमं णिग्गंथं पवयणं अणुत्तरं केवलियं पडिपुण्णं णेगाइयं सामाइयं संसुद्धं सल्लघट्टाणं सल्लघत्ताणं सिद्धिमग्गं सेढिमग्गं खंतिमग्गं मुत्तिमग्गं पमुत्तिमग्गं मोक्खमग्गं पमोक्खमग्गं णिज्जाणमग्गं णिव्वाणमग्गं सव्वदुक्खपरिहाणिमग्गं सुचरियपरिणिव्वाणमग्गं अवितहं अविसंतिपवयणं उत्तमं तं सद्दहामि तं पत्तियामि तं रोचेमि तं फासेमि इदोत्तरं अण्णं णत्थि ण भूदं ण भविस्सदि णाणेण वा दंसणेण वा चरित्तेण वा सुत्तेण वा इदो जीवा सिज्झन्ति बुज्झन्ति मुच्चन्ति परिणिव्वायन्ति सव्वदुक्खाणमंतं करेन्ति पडिवियाणंति. समणोमि संजदोमि उवरदोमि उवसन्तोमि उवहि-णियडि-माण-माय-मोस-मिच्छणाण-मिच्छदंसण-मिच्छचरित्तं च पडिविरदोमि, सम्मणाण सम्मदंसण-सम्मचरित्तं च रोचेमि जं जिणवरेहिं पण्णत्तं, इत्थ मे जो कोई (देवसिओ) राईओ अइचारो अणाचारो तस्स मिच्छा मे दुक्कडं ॥१०॥

जाव अरहन्ताणं भयवंताणं पज्जुवासं करेमि ताव कायं पावकम्मं दुच्चरियं वोस्सरामि।

वदसमिदिंदियरोधो लोचो आवासयमचेलमण्हाणं।
खिदिसयणमदंतवणं ठिदिभोयणमेयभत्तं च॥१॥
एदे खलु मूलगुणा समणाणं जिणवरेहिं पण्णत्ता।
एत्थ पमादकदादो अइचारादो णियत्तो हं॥२॥
छेदोवट्ठावणं होदु मज्झं।

अथ सर्वातिचारविशुद्ध्यर्थं रात्रिक (दैवसिक) प्रतिक्रमणक्रियायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावन्दनास्तवसमेतं निष्ठितकरणवीरभक्तिकायोत्सर्गं करोम्यहं।

इति प्रतिज्ञाप्य

दिवसे १०८ रात्रि प्रतिक्रमणे ५४ उच्छ्वासेषु णमो अरहंताणं इत्यादि दंडकं पठित्वा कायोत्सर्गं कुर्यात् पश्चात् थोस्सामीत्यादि चतुर्विंशतिस्तवं पठेत्

णमो अरहंताणं इत्यादि दण्डक पाठ का उच्चारण कर ५४ उच्छ्वास में कायोत्सर्ग करें अर्थात् दो कायोत्सर्ग करें तथा दैवसिक प्रतिक्रमण में १०८ उच्छ्वासों में अर्थात् चार कायोत्सर्ग करें।

विशेष—यहां पर उच्छ्वास रूप से कायोत्सर्ग का प्रमाण लेने में दो अथवा चार कायोत्सर्ग होते हुए भी ५४ व १०८ उच्छ्वासों प्रमाण एक ही कायोत्सर्ग समझना चाहिये, क्योंकि वृहत्कायोत्सर्ग ३०० उच्छ्वास १२ कायोत्सर्ग में होता है इसलिये

ही दैवसिक रात्रिक प्रतिक्रमण में चार भक्ति में चार चार कायोत्सर्ग ही गणना में आते हैं।

वीरभक्ति

यः सर्वाणि चराचराणि विधिवद् द्रव्याणि तेषां गुणान्
पर्यायानपि भूतभाविभवतः सर्वान् सदा सर्वदा।
जानीते युगपत् प्रतिक्षणमतः सर्वज्ञ इत्युच्यते,
सर्वज्ञाय जिनेश्वराय महते वीराय तस्मै नमः ॥१॥
वीरः सर्वसुरासुरेन्द्रमहितो वीरं बुधाः संश्रिताः,
वीरेणाभिहतः स्वकर्मनिचयो वीराय भक्त्या नमः।
वीरात्तीर्थमिदं प्रवृत्तमतुलं वीरस्य वीरं तपो,
वीरे श्रीद्युतिकांतिकीर्तिधृतयो हे वीर! भद्रं त्वयि ।२।
ये वीरमादौ प्रणमंति नित्यं,
ध्यानस्थिताः संयमयोगयुक्ताः।
ते वीतशोका हि भवंति लोके,
संसारदुर्गं विषमं तरंति ॥ ३ ॥
व्रतसमुदयमूलः संयमस्कंधबंधो,
यमनियमपयोभिर्वर्धितः शीलशाखः।
समितिकलिकभारो गुप्तिगुप्तप्रवालो,
गुणकुसुमसुगंधिः सत्तपश्चित्रपत्रः ॥४॥
शिवसुखफलदायी यो दयाछाययोद्धः,
शुभजनपथिकानां खेदनोदे समर्थः।

दुरितरविजताप प्रापयत्वन्तमावं,
स भवविभवहान्यै नोऽस्तु चारित्रपूर्वः ॥ ५ ॥
चारित्रं सर्वजिनैश्चरितं प्रोक्तं च सर्वशिष्येभ्यः ।
प्रणमामि पंचभेदं पंचमचारित्रलाभाय ॥ ६ ॥
धर्मः सर्वसुखाकरो हितकरो धर्मं बुधाश्चिन्वते,
धर्मेणैव समाप्यते शिवसुखं धर्माय तस्मै नमः ।
धर्मान्नास्त्यपरः सुहृद्भवभृतां धर्मस्य मूलं दया,
धर्मे चित्तमहं दधे प्रतिदिनं हे धर्म ! मां पालय ।७।
धम्मो मंगलमुद्दिट्ठं अहिंसा संयमो तवो ।
देवा वि तस्स पणमंति जस्स धम्मे सया मणो ॥८॥

अंचलिका—

इच्छामि भंते ! पडिक्कमणादिचारमालोचेउं, स-
म्मणाणसम्मदंसण–सम्मचारित्त–तव-वीरियाचारेसु जम-
णियम–संजमसीलमूलुत्तरगुणेसु सव्वमईचारं सावज्जजोगं
पडिविरदोमि असंखेज्जलोगअज्झवसाठाणाणि अप्पसत्थ-
जोगसण्णाणिंदियकसायगारवकिरियासु मणवयणकायक-
रणदुप्पणिहाणाणि परिचिंतिदाणि किण्हणीलकाउलेस्सा-
ओ विकहापलिकुंचिएण उम्मगहस्सरदिअरदिसोयभयदु-
गुंछवेयणविज्जंभजंभाइआणि अट्टरुद्दसंकिलेसपरिणामाणि
परिणामदाणि अणिहुदकरचरणमणवयणकायकरणेण अक्खि-
त्तबहुलपरायणेण अपडिपुण्णेण वा सरक्खरावयपरिसंघायप-

ढिवणिए वा अच्छाकारिदं मिच्छा मेलिदं आमेलिदं वा मेलिदं वा अण्णहादिण्णं अण्णहापडिच्छिदं आवासएसु परिहीणदाए कदो वा कारिदो वा कीरंतो वा समणु-मणिदो तस्स मिच्छा मे दुक्कडं ।

वदसमिदिंदियरोधो लोचो आवासयमचेलमण्हाणं ।
खिदिमयणमदंतवणं ठिदिभोयणमेयभत्तं च ॥१॥
एदे खलु मूलगुणा समणाणं जिणवरेहिं पण्णत्ता ।
एत्थ पमादकदादो अइचारादो णियत्तो हं ॥ २ ॥
छेदोवट्ठावणं होउ मज्झं ।

अथ सर्वातिचारविशुद्ध्यर्थं रात्रिक (दैवसिक) प्रति-क्रमणक्रियायां कृतदोषनिराकरणार्थं पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावंदनास्तवसमेतं चतुर्विंशति-तीर्थंकरभक्तिकायोत्सर्गं करोम्यहम् ।

इति प्रतिज्ञाप्य

—❀—

णमो अरहंताणं इत्यादि (दंडकं पठित्वा कायोत्सर्गं कुर्यात्)
(थोस्सामीत्यादि चतुर्विंशतिस्तवं पठेत्)
चउवीसं तित्थयरे उसहाइवीरपच्छिमे वंदे ।
सव्वे सगणगणहरे सिद्धे सिरसा णमंसामि ॥१॥
ये लोकेऽष्टसहस्रलक्षणधरा ज्ञेयार्णवान्तर्गता,
ये सम्यग्भवजालहेतुमथनाश्चन्द्रार्कतेजोधिकाः ।

ये साध्विन्द्रसुराप्सरोगणशतैर्गीतप्रणुत्यार्चिता—
स्तान् देवान् वृषभादिवीरचरमान् भक्त्या नमस्याम्यहम् ।२
नाभेयं देवपूज्यं जिनवरमजितं सर्वलोकप्रदीपं,
सर्वज्ञं संभवाख्यं मुनिगणवृषभं नंदनं देवदेवं ।
कर्मारिघ्नं सुबुद्धिं वरकमलनिभं पद्मपुष्पाभिगंधं
क्षांतं दान्तं सुपार्श्वं सकलशशिनिभं चंद्रनामानमीडे ।३।
विख्यातं पुष्पदन्तं भवभयमथनं शीतलं लोकनाथं,
श्रेयांसं शीलकोशं प्रवरनरगुरुं वासुपूज्यं सुपूज्यं ।
मुक्तं दांतेन्द्रियाश्वं विमलमृषिपतिं सिंहसैन्यं मुनीन्द्रं
धर्मं सद्धर्मकेतुं शमदमनिलयं स्तौमि शान्तिं शरण्यम् ।।४।।
कुन्थुं सिद्धालयस्थं श्रमणपतिमरं त्यक्तभोगेषु चक्रं,
मल्लिं विख्यातगोत्रं खचरगणनुतं सुव्रतं सौख्यराशिम्
देवेन्द्रार्च्यं नमीशं हरिकुलतिलकं नेमिचंद्रं भवांतं
पार्श्वं नागेन्द्रवंद्यं शरणमहमितो वर्धमानं च भक्त्या ।५।

अंचलिका—

इच्छामि भंते चउवीसतित्थयरभत्तिकाउस्सग्गो कओ तस्सालोचेउं पंचमहाकल्लाणसंपण्णाणं अट्ठमहापाडिहेर-सहियाणं चउतीसातिसयविसेससंजुत्ताणं बत्तीसदेविंदमणि-मउडमत्थयमहियाणं बलदेववासुदेवचक्कहररिसिमुणिजइअ-णगारोवगूढाणं थुइसहस्सणिलयाणं उसहाइवीरपच्छिम-मंगलमहापुरिसाणं णिच्चकालं अंचेमि पूजेमि वंदामि

णमंसामि दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुणसंपत्ती होउ मज्झं।

वदसमिदिंदियरोधो लोचो आवासयमचेलमण्हाणं।
खिदिसयणमदंतवणं ठिदिभोयणमेयभत्तं च ॥१॥
एदे खलु मूलगुणा समणाणं जिणवरेहिं पण्णत्ता।
एत्थ पमादकदादो अइचारादो णियत्तोहं ॥२॥

छेदोवट्ठावणं होउ मज्झम्।

अथ सर्वातिचारशुद्ध्यर्थं रात्रिक (दैवसिक) प्रतिक्रमणक्रियायां श्रीसिद्धभक्तिप्रतिक्रमणभक्ति—निष्ठित करण वीर भक्ति—चतुर्विंशतितीर्थंकरभक्तीः कृत्वा तद्धीनाधिकदोषविशुद्ध्यर्थं आत्मपवित्रीकरणार्थं समाधिभक्तिकायोत्सर्गं करोम्यहम्।

(इति विज्ञाप्य)

णमो अरहंताणं इत्यादि दण्डकं पठित्वा कायोत्सर्गं कुर्यात्। थोस्सामीत्यादि स्तवं पठेत्

अथेष्टप्रार्थनेत्यादि पूर्वोक्तां समाधिभक्तिं पठेत्।

इति रात्रिक दैवसिक प्रतिक्रमणं वा समाप्तम्।

—*—

नोट :—अपराह्न कालके दिवस सम्बन्धी प्रतिक्रमण में "रात्रिक" राइयम्मि "राइओ" शब्द को न बोल कर (दैवसिक) आदि शब्दों का ही प्रयोग करना चाहिए।

तलवायुवृष्टिभिः । गगनतलं विलोक्य जलदैः स्थगितं सहसा तपोधनाः, पुनरपि तरुतलेषु विषमासु निशासु विशंकमासते ॥५॥ जलधाराशरताडिता न चलन्ति चरित्रतः सदा नृसिंहाः । संसारदुःखभीरवः परीषहाराति-घातिनः प्रवीराः ॥६॥ अविरतबहलतुहिनकणवारिभिर्-घ्रिपपत्रपातनै-रनवरतमुक्तसीत्काररवैः परुषैरथानिलैः शोषितगात्रयष्टयः । इह श्रमणा धृतिकम्बलावृताः, शिशिरनिशाम् तुषारविषमां गमयन्ति चतुःपथे स्थिताः ॥७॥ इति योगत्रयधारिणः सकलतपः शालिनः प्रवृद्धपुण्यकायाः । परमानन्दसुखैषिणः समाधिमग्र्यं दिशन्तु नो भदन्ताः ॥८॥ गिम्हे गिरिसिहरत्था वरिसाकाले रुक्खमूलरयणीसु । सिसिरे बाहिरसयणा ते साहू वंदिमो णिच्चं ॥९॥ गिरिकन्दरदुर्गेषु ये वसन्ति दिगम्बराः । पाणिपात्रपुटाहारास्ते यान्ति परमां गतिम् ॥२॥ इच्छामि भन्ते योग-भत्तिकाउस्सग्गो कओ तस्स लोचेउं अड्ढाइज्जदीवदोस-मुद्देसु पण्णारसकम्मभूमीसु आदावणरुक्खमूलअब्भोवास-ठाणमोणवीरासणेक्कपासकुक्कुडासणचउत्थपक्खखवणादि-योगजुत्ताणं सव्वसाहूणं वंदामि, णमंसामि, दुक्खक्खओ कम्मक्खओ, बोहिलाहो, सुगइगमणं, समाहिमरणं जिण-गुणसम्पत्ति होउ मज्झं ॥

इति योगभक्तिः

इस प्रकार साध्यनुष्ठान समाप्त करें। देव वन्दना के लिए श्रीजिन मंदिर को जावे वहां उचित स्थान में अपने हस्तपाद को धोकर "निसही निसही निसही" तीन बार उच्चारणकर चैत्यालय के शिखर का अवलोकन कर तीन बार प्रणाम करे अनन्तर "दृष्टंजिनेन्द्र भवनं" इत्यादि दर्शन स्तोत्र को वंदना मुद्रा को जोडकर पढते हुए चैत्यालय की तीन प्रदक्षिणा देवे प्रदक्षिणा मे प्रत्येक दिशा में तीन प्रदक्षिणा से प्रत्येक दिशा मे तीन तीन आवर्त और एक एक शिरोनति करते जावें।

अथ देववंदना प्रयोग

ॐ जय जय जय निःसही निःसही निःसही।

(चैत्यालयकी प्रदक्षिणा करते समय प्रत्येक दिशामें तीन तीन आवर्त और एक शिरोनति करे) दृष्टं जिनेन्द्र-भवनं भवतापहारि, भव्यात्मनां विभव संभवभूरिहेतु

दुग्धाब्धिफेनधवलोज्वलकूटकोटि-
नद्धध्वजप्रकरराजिविराजमानम् ॥१॥

दृष्टं जिनेन्द्रभवनं भुवनैकलक्ष्मी
धामर्द्धिवर्द्धितमहामुनिसेव्यमानम् ॥

विद्याधरामरवधूजनपुष्पदिव्य,
पुष्पांजलिप्रकरशोभितभूमिभागम् ॥२॥

दृष्टं जिनेन्द्रभवनं भवनादिवास,
विख्यातनाकगणिकागणगीयमानम्।

नानामणिप्रचयभासुररश्मिजाल-

दृष्टं जिनेन्द्रभवनं निखिलविकार
कुर्योज्ज्वलामणीमयूरकभूमि ।
नित्यं कुर्वंतिलकश्रियमादधानं
सन्मंगलं सकलचन्द्रमुनीन्द्रवंद्यं ॥९॥
दृष्टं मयाद्य मणिकांचनचित्रतुंग,
सिंहासनादिजिनविम्बविभूतियुक्तं ॥
चैत्यालयं यदतुलं परिकीर्तितं मे,
सन्मंगलं 'सकलचन्द्र' मुनीन्द्र वंद्यं ॥१०॥

पुनः पैर धोकर मन्दिर में प्रवेश करके दर्शन स्तोत्र पढकर खड़े होकर पैरों में चार अंगुल का अन्तर रख कर और दोनों हाथों को मुकुलित कर "ईर्यापथिक" दोष विशुद्धि पाठ पढ़ें।

ईर्यापथविशुद्धिः—

पडिक्कमामि भंते ! इरियावहियाए विराहणाए अणागुत्ते अइगमणे, णिग्गमणे, ठाणे गमणे, चंकमणे, पाणुग्गमणे बीजुग्गमणे, हरिदुग्गमणे, उच्चार-पस्सवण-खेल-सिंहाण-वियडि पइट्ठावणियाए, जे जीवा एइंदिया वा बेइंदिया वा, तेइंदिया वा चउरिंदिया वा पंचिंदिया वा, णोल्लिदा वा, पेल्लिदा वा, संघट्टिदा वा संघादिदा वा, परिदाविदा वा, किरिच्छिदा वा, लेस्सिदा वा, छिंदिदा वा, भिंदिदा वा, ठाणदो वा ठाणचंकमणदो वा तस्स उत्तरगुणं तस्स पायच्छित्तकरणं, तस्स

विमोहिकरणं, जाव अरहंताणं भयवंताणं णमोकारं उज्जु-
वासं करोमि ताव कायं पावकम्मं दुच्चरियं वोस्सरामि ।

(इस प्रतिक्रमण को पढ़कर "णमो अरहंताणम्" इत्यादि गाथा का सत्ताईस उच्छ्वासों में नौ बार जाप्य देवे अनन्तर पर्यंकासन से बैठकर आलोचना पाठ पढ़ें)

आलोचना—

ईर्यापथे प्रचलताद्य मया प्रमादा—
देकेन्द्रियप्रमुखजीवनिकायबाधा ।
निर्वर्तिता यदि भवेदयुगान्तरेक्षा
मिथ्या तदस्तु दुरितं गुरुभक्तितो मे ॥१॥

इच्छामि भंते ! आलोचेउं इरियावहियस्स पुव्वुत्तर दक्खिण पच्छिम चउदिस विदिसासु विहरमाणेण जुगंतर दिट्ठिणा भव्वेण दट्ठव्वा । पमाददोषेण डवडवचरियाए पाणभूदजीवसत्ताणं उवघादो कदो वा कारिदो वा कीरंतं समणुमण्णिदो वा तस्स मिच्छा मे दुक्कडं ।

अनन्तर उठकर गुरु को अथवा देव को पंचांग नमस्कार करे पुनः गुरु के समक्ष अथवा गुरु दूर हो तो देव के समक्ष बैठकर कृत्य विज्ञापन करें कि :—

नमोऽस्तु भगवन् ! देववन्दनां करिष्यामि ।

अनन्तर पर्यंकासन से बैठकर नीचे लिखा मुख्य मङ्गल पढ़ें ।

सिद्धं सम्पूर्णभव्यार्थसिद्धेः कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञानचारित्रप्रतिपादनम् ॥ १ ॥

सुरेन्द्रमुकुटाश्लिष्टपादपद्मांशुकेशरम् ।
प्रणमामि महावीरं लोकत्रितयमंगलम् ॥ २ ॥

अनन्तर बैठे बैठे नीचे लिखा पाठ पढ़कर सामायिक स्वीकार करें।

खम्मामि सव्वजीवाणं सव्वे जीवा खमंतु मे ।
मित्ती मे सव्वभूदेसु वेरं मज्झ ण केणवि ॥१॥
रायबंधं पदोसं च हरिसं दीणभावयं ।
उस्सुगत्तं भयं सोगं रदिमरदिं च वोस्सरे ॥२॥
हा दुट्ठकयं हा दुट्ठचिंतियं भासियं च हा दुट्ठं ।
अंतो अंतो डज्झमि पच्छुत्तावेण वेदंतो ॥३॥
दव्वे खेत्ते काले भावे यकदावराहसोहणयं ।
णिंदण गरहणजुत्तो मण-वच-कायेण-पडिक्कमणं ॥४॥
समता सर्वभूतेषु संयमः शुभभावना ।
आर्तरौद्रपरित्यागस्तद्धि सामायिकं मतं ॥५॥

अथ कृत्य विज्ञापना

भगवन्नमोऽस्तु प्रसीदंतु प्रभुपादाः वंदिष्येऽहं । एषोऽहं सर्वसावद्ययोगाद्विरतोऽस्मि ।

अनन्तर क्रिया-विज्ञापना

अथ पौर्वाह्णिक देववन्दनायां पूर्वाचार्यानुक्रमेण

सकलकर्मक्षयार्थं भावपूजा वन्दना स्तव समेतं चैत्यभक्ति कायोत्सर्गं करोम्यहम् ।

इस तरह कृत्य विज्ञापन कर खड़े होकर भूमि स्पर्शनात्मक पंचांग नमस्कार करें। पश्चात् जिन प्रतिमा के सन्मुख चार अङ्गुल प्रमाण दोनों पैरों में अन्तर रखकर खड़े होवें व तीन आवर्त और एक शिरोनति करें पश्चात् मुक्ताशुक्ति मुद्रा जोड़कर सामायिक दंडक पढ़ें और पुनः तीन आवर्त व एक शिरोनति करे पश्चात जिन मुद्रा से कायोत्सर्ग करे।

पुनः पूर्वोक्त विधि से खड़े होकर तीन आवर्त एक शिरोनति कर चतुर्विंशति स्तव पढ़ें। अनन्तर जिनचैत्य की तीन प्रदक्षिणा देते हुए प्रति दिशा में तीन तीन आवर्त व एक एक शिरोनति करते हुए चैत्य वन्दना पढ़ें।

चैत्यभक्ति

श्रीगौतमादिपदमद्भुतपुण्यबन्ध—
मुद्योतिताखिलममौघमघप्रणाशम् ।
वक्ष्ये जिनेश्वरमहं प्रणिपत्य तथ्यं
निर्वाणकारणमशेषजगद्धितार्थम् ॥

जयति भगवान् हेमाम्भोजप्रचारविजृम्भिता—
वमरमुकुटच्छायोद्गीर्णप्रभापरिचुम्बितौ ।
कलुषहृदया मानोद्भ्रान्ताः परस्परवैरिणो
विगतकलुषाः पादौ यस्य प्रपद्य विशश्वसुः ॥ १ ॥

तदनु जयति श्रेयान् धर्मः प्रवृद्धमहोदयः
कुगति-विपथ-क्लेशाद्योऽसौ विपाशयति प्रजाः।
परिणतनयस्याङ्गीभावाद्विविक्तविकल्पितं
भवतु भवतस्त्रातृ त्रेधा जिनेन्द्रवचोऽमृतम् ॥ २॥
तदनु जयताज्जैनी वित्तिः प्रभङ्गतरङ्गिणी
प्रभवविगमध्रौव्यद्रव्यस्वभावविभाविनी।
निरुपमसुखस्येदं द्वारं विघट्य निरर्गलं
विगतरजसं मोक्षं देयान्निरत्ययमव्ययम् ॥ ३ ॥
अर्हत्सिद्धाचार्योपाध्यायेभ्यस्तथा च साधुभ्यः।
सर्वजगद्वन्द्येभ्यो नमोऽस्तु सर्वत्र सर्वेभ्यः ॥ ४ ॥
मोहादिसर्वदोषारिघातकेभ्यः सदा हतरजोभ्यः
विरहितरहस्कृतेभ्यः पूजार्हेभ्यो नमोऽर्हद्भ्यः ॥ ५ ॥
क्षान्त्यार्जवादिगुणगणसुसाधनं सकललोकहितहेतुं।
शुभधामनि धातारं वन्दे धर्मं जिनेन्द्रोक्तम् ॥ ६ ॥
मिथ्याज्ञानतमोवृतलोकैकज्योतिरमितगमयोगि।
सांगोपांगमजेयं जैनं वचनं सदा वन्दे ॥ ७ ॥
भवनविमानज्योतिर्व्यंतरनरलोकविश्वचैत्यानि।
त्रिजगदभिवन्दितानां वंदे त्रेधा जिनेन्द्राणां ॥ ८ ॥
भुवनत्रयेऽपि भुवनत्रयाधिपाभ्यर्च्यतीर्थकर्तॄणाम्।
वन्दे भवाग्निशान्त्यै विभवानामालयालीस्ताः ॥ ९ ॥
इति पंच महापुरुषाः प्रणुता जिनधर्म-वचन-चैत्यानि।

अताम्रनयनोत्पलं सकलकोपवह्नेर्जयात्
कटाक्षशरमोक्षहीनमविकारतोद्रेकतः ।
विषादमदहानितः प्रहसितायमानं सदा
मुखं कथयतीव ते हृदयशुद्धिमात्यन्तिकीम् ॥२१॥

निराभरणभासुरं विगतरागवेगोदया-
न्निरंबरमनोहरं प्रकृतिरूपनिर्दोषतः ।
निरायुधसुनिर्भयं विगतहिंस्यहिंसाक्रमात्
निरामिषसुतृप्तिमद्विविधवेदनानां क्षयात् ॥२२॥

मितस्थितनखांगजं गतरजोमलस्पर्शनं
नवांबुरुहचन्दनप्रतिमदिव्यगन्धोदयम् ।
रवीन्दुकुलिशादिदिव्यबहुलक्षणालंकृतं
दिवाकरसहस्रभासुरमपीक्षणानां प्रियम् ॥ २३ ॥

हितार्थपरिपंथिभिः प्रबलरागमोहादिभिः
कलंकितमना जनो यदभिवीक्ष्य शोशुद्ध्यते ।
सदाभिमुखमेव यज्जगति पश्यतां सर्वतः
शरद्विमलचन्द्रमंडलमिवोत्थितं दृश्यते ॥ २४ ॥

तदेतदमरेश्वरप्रचलमौलिमालामणि-
स्फुरत्किरणचुम्बनीयचरणारविन्दद्वयम् ।
पुनातु भगवज्जिनेन्द्र ! तव रूपमन्धीकृतं
जगत् सकलमन्यतीर्थगुरुरूपदोषोदयैः ॥ २५ ॥

अनन्तर चैत्यके सम्मुख बैठकर नीचे लिखा आलोचना पाठ पढ़े

आलोचना या अंचलिका—

इच्छामि भन्ते चेइयभत्ति काउस्सग्गो कओ तस्सालोचेउं, अहलोयतिरियलोयउड्ढलोयम्मि किट्टिमाकिट्टिमाणि जाणि जिण चेइयाणि ताणि सव्वाणि तिसु वि लोएसु भवणवासियवाणविंतर-जोइसियकप्पवासियत्ति चउविहा देवा सपरिवारा दिव्वेण गन्धेण, दिव्वेण पुप्फेण, दिव्वेण धूवेण, दिव्वेण चुण्णेण, दिव्वेण वासेण, दिव्वेण ण्हाणेण, णिच्चकालं अंचंति, पुज्जंति, वन्दंति, णमंसंति। अहमवि इह संतो तत्थ, संताइ णिच्चकालं अंचेमि, पूजेमि, वन्दामि, णमंसामि दुक्खक्खओ कम्मक्खओ बोहिलाहो, सुगइगमणं समाहिमरणं, जिणगुणसम्पत्ति होउ मज्झं।

अनन्तर उठकर पंचांग नमस्कार करें। पश्चात् भगवान के सन्मुख पहिले की तरह खड़े होकर मुक्ता शुक्ति मुद्रासे हाथ जोड़कर तीन आवर्त अनन्तर बैठे २ ही नीचे लिखी कृत्यविज्ञापना करे।

अथ पौर्वाह्णिक देव वन्दनायां पूर्वाचार्यानुक्रमेण सकल कर्मक्षयार्थं भावपूजावन्दनास्तवसमेतं पंच गुरु भक्ति कायोत्सर्गं करोम्यहं।

और एक शिरोनति कर पूर्वोक्त सामायिक दंडक पढ़ें। अंत में तीन आवर्त और एक शिरोनति कर सत्ताईस उच्छ्वास प्रमाण कायोत्सर्ग करें। कायोत्सर्ग पूर्ण होने पर पुनः पंचांग नमस्कार कर तीन आवर्त और एक शिरोनति करें। पश्चात् थोस्सामि इत्यादि चतुर्विंशति स्तव पढ़कर अंत में तीन आवर्त और एक शिरोनति करें। अनन्तर भगवान के सन्मुख पूर्वोक्तरीति से खड़े होकर नीचे लिखी पंच महा गुरुभक्ति पढ़े।

मणुयणाइंदसुरधरियछत्तत्तया,
पंचकल्लाणसुक्खावली पत्तया।
दंसणं णाण झाणं अणंतं बलं,
ते जिणा दिंतु अम्हं वरं मंगलं ॥१॥

जेहिं झाणग्गिवाणेहिं अइथड्ढयं,
जम्मजरमरणणयरत्तयं दड्ढयं।
जेहिं पत्तं सिवं सासयं ठाणयं,
ते महा दिंतु सिद्धा वरं णाणयं ॥२॥

पंचहाचारपंचग्गिसंसाहया,
बारसंगाइ सुयजलहि अवगाहया।
मोक्खलच्छी महंती महंते सया,
सूरिणो दिंतु मोक्खं गया संगया ॥३॥

घोरसंसार भीमाडवीकाणणे,
तिक्खवियरालणहपावपंचाणणे।
णट्ठमग्गाण जीवाण पहदेसया,
वंदिमो ते उवज्झाय अम्हे सया ॥४॥

उग्गतवचरणकरणेहिं खीणं गया,
धम्मवरझाणसुक्केक्कझाणं गया।
णिब्भरं तवसिरीए समालिंगया,
साहवो ते महामोक्खपहमग्गया ॥५॥

एण चीसेण जो पंचगुरु वंदए,
गुरुयसंसारघणवेल्लि सो छिंदए ।
लहइ सो सिद्धसुक्खाइं वरमाणणं,
कुणइ कम्मिंधणं पुंजपज्जालणं ॥६॥
अरिहा सिद्धाइरिया, उवज्झाया साहु पंचपरमेट्ठी ।
एयाण णमुक्कारो भवे भवे मम सुहं दिंतु ॥७॥

आलोचना या अंचलिका

अनन्तर नीचे लिखा आलोचना पाठ पढ़ें ।

इच्छामि भन्ते पंचगुरुभत्ति काओसग्गो कओ तस्सा-लोचेओ अट्ठमहापाडिहेरजुत्ताणं अरहन्ताणं, अट्ठगुण-संपण्णाणं उड्ढलोयम्मिपइट्ठियाणं सिद्धाणं, अट्ठपवय-णमाउसंजुत्ताणं आइरियाणं, आयारादिसुदणाणोवदे-सयाणं, उवज्झायाणं तिरयणपालणरयाणं सव्वसाहूणं, णिच्चकालं अच्चेमि पूजेमि वंदेमि णमंसामि दुःक्ख-क्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुणसम्पत्ति होउ मज्झं ।

पश्चात् पूर्वोक्त देव वंदना के पाठमें न्यूनता हुई हो अथवा अधिकता हुई हो तो इसकी विशुद्धि के लिए समाधिभक्ति पढ़ने का आगम में नियम है । तद्यथा—प्रथम बैठकर क्रियाविज्ञापन करें

अथ पौर्वाह्णिक देव वंदनायां पूर्वाचार्यानुक्रमेण सकल-कर्मक्षयार्थं भावपूजावंदनास्तवसमेतं श्री चैत्यपंच

गुरुभक्ती विधाय तद्धीनाधिकत्वादिदोषविशुद्धयर्थं आत्मपवित्रीकरणार्थं समाधिभक्तिकायोत्सर्गं करोमि।

अनंतर उठकर पंचांग नमस्कार कर तीन आवर्त और एक शिरोनतिपूर्वक णमो अरहंताणं इत्यादि सामायिक दंडक पढ़ें। दंडक के अन्त में तीन आवर्त और शिरोनति करके सत्ताईस उच्छ्वास प्रमाण कायोत्सर्ग करें अनन्तर भूमिस्पर्शनात्मक पंचांग नमस्कार कर तीन आवर्त और एक शिरोनति पूर्वक थोस्सामि इत्यादि दंडक पढ़े अन्तमें पुनः तीन आवर्त और एक शिरोनति कर नीचे लिखी समाधि-भक्ति पढ़ें। यथा—

समाधि भक्ति

स्वात्माभिमुखसंवित्तिलक्षणं श्रुतचक्षुषा।
पश्यन् पश्यामि ! देव ! त्वां केवलज्ञानचक्षुषा॥
अथेष्टप्रार्थना—प्रथमं करणं चरणं द्रव्यं नमः
शास्त्राभ्यासो जिनपतिनुतिः संगतिः सर्वदार्यैः,
सद्वृत्तानां गुणगणकथा दोषवादे च मौनम्।
सर्वस्यापि प्रियहितवचो भावना चात्मतत्त्वे।
सम्पद्यन्तां मम भवभवे यावदेतेऽपवर्गः॥ १॥
तव पादौ मम हृदये मम हृदयं तव पदद्वये लीनं।
तिष्ठतु जिनेन्द्र ! तावद्यावन्निर्वाणसम्प्राप्तिः॥२
अक्खरपयत्थहीणं मत्ताहीणं च जं मए भणियं।
तं खमउ णाणदेवय ! मज्झवि दुक्खक्खयं दिन्तु।

अनन्तर बैठकर नीचे लिखा आलोचना पाठ पढ़ें।

इच्छामि भंते ! समाहिमत्तिकाउस्सग्गो कओ तस्सालोचेउं, रयणत्तयसरूवपरमप्पज्झाणलक्खणसमाहिभत्तीये णिच्चकालं, अंचेमि, पूजेमि वंदामि णमंसामि दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुणसंपत्ति होउ मज्झं।

अनन्तर यथावकाश आत्मध्यान करें

अथ देव वन्दना विधिः

पडिक्कमामि भन्ते ! इरियावहियाए विराहणाए अणागुत्ते अइगमणे णिग्गमणे ठाणे गमणे चंकमणे पाणुग्गमणे विजुग्गमणे हरिदुग्गमणे उच्चारपस्सवणा खेलसिंहाणय वियडिपइट्ठा णोयाए जे जीवा एइन्दिया वा बेइन्दिया वा तेइन्दिया वा चउरिन्दिया वा पंचिंदिया वा णोल्लिदा वा पेल्लिदा वा संघट्टिदा वा संघादिदा वा उद्दाविदा वा परिदाविदा वा किरिंच्छिदा वा लेस्सिदा वा छिंदिदा वा भिंदिदा वा ठाणदो वा ठाणचंकमणदो वा तस्स उत्तरगुणं तस्स पायच्छित्त करणं तस्य विसोहि करणं जावं अरहन्ताणं भयवन्ताणं पुज्जवासं करेमि ताव कामं पाव दुच्चरियं वोस्सरामि।

ॐ णमो अरहन्ताणं णमो सिद्धाणं णमो आइरियाणं
णमो उवज्झायाणं णमो लोए सव्व साहूणं॥

(६ जाप्य २७ उच्छ्वास)

ईर्यापथे प्रचलताद्य मया प्रमादा-
देकेन्द्रिय प्रमुख जीव निकाय बाधा ।।
निर्वर्तिता यदि भवेदयुगांतरेक्षा ।
मिथ्या तदस्तु दुरितं गुरुभक्तितो मे ।।१४।।

इच्छामि भंते ! इरियावहियस्स आलोचेउं पुव्वुत्तर दक्खिण पच्छिम चउदिसु विदिसासु विहरमाणेण जुगुन्तर दिट्ठिणा भव्वेण दट्ठव्वा डवडवचरियाए पमाद दोसेण पाणभूद जीव सत्ताणं उवघादो कदो वा कारिदो वा कीरन्तो वा समणुमण्णिदो तस्स मिच्छा मे दुक्कडं ।

न स्नेहाच्छरणं प्रयान्ति भगवन । पादद्वयं ते प्रजाः ।
हेतुस्तत्र विचित्रदुःखनिचयः संसारघोरार्णवः ।।
अत्यन्तस्फुरदुग्ररश्मिनिकरव्याकीर्णभूमंडलो ।
ग्रैष्मः कारयतीन्दुपादसलिलच्छायानुरागं रविः ।।१।।
क्रुद्धाशीविषदष्टदुर्जयविषज्वालावलीविक्रमो ।
विद्याभैषजमन्त्रतोयहवनैर्याति प्रशान्तिं यथा ।।
तद्वत्ते चरणारुणांबुजयुगस्तोत्रोन्मुखानां नृणाम् ।
विघ्नाः कायविनायकाश्च सहसाशाम्यन्त्यहो विस्मयः
संतप्तोत्तमकांचनक्षितिधरश्रीस्पर्द्धिगौरद्युते ।
पुंसां त्वच्चरणप्रणामकरणात्पीडाः प्रयांति क्षयं ।।
उद्यद्भास्करविस्फुरत्करशतव्याघातनिष्कासिता ।

नानादीर्हिविलोचनद्युतिहृता शीघ्रं यथा शर्वरी ॥३॥
त्रैलोक्येश्वरभंगलब्धविजयादत्यन्तरौद्रात्मकान् ।
नानाजन्मशतान्तरेषु पुरतो जीवस्य संसारिणः ॥
को वा प्रस्खलतीह केन विधिना कालोग्रदावानला-
न्न स्याच्चेत्तव पादपद्मयुगलस्तुत्यापगावारणम् ॥४॥
लोकालोकनिरन्तरप्रविततज्ञानैकमूर्ते ! विभो !
नानारत्नपिनद्धदंडरुचिरश्वेतातपत्रत्रय ॥
त्वत्पादद्वयपूतगीतिरवतः शीघ्रं द्रवन्त्यामयाः ।
दर्पाध्मातमृगेन्द्रभीमनिनदाद्वन्या यथा कुञ्जराः ।५।
दिव्यस्त्रीनयनाभिरामविपुलश्रीमेरुचूडामणे ।
भास्वद्बालदिवाकरद्युतिहरप्राणीष्टभामंडल ॥
अव्यावाधमचिन्त्यसारमतुलं त्यक्तोपमं शाश्वतं ।
सौख्यं त्वच्चरणारविंदयुगलस्तुत्यैव संप्राप्यते ॥६॥
यावन्नोदयते प्रभापरिकरः श्रीभास्करो भासयं-
स्तावद्धारयतीह पङ्कजवनं निद्रातिभारश्रमम् ॥
यावत्त्वच्चरणद्वयस्य भगवन्न स्यात्प्रसादोदय-
स्तावज्जीवनिकाय एष वहति प्रायेण पापं महत् ।७।
शान्तिं शान्तिजिनेन्द्र शान्तमनसस्त्वत्पादपद्माश्रयात्
संप्राप्ताः पृथिवीतलेषु बहवः शांत्यर्थिनः प्राणिनः ।

कारुण्यान्मम भाक्तिकस्य च विभो दृष्टिं प्रसन्नां कुरु
त्वत्पादद्वयदैवतस्य गदतः शान्त्यष्टकं भक्तितः ।८।

नमः श्रीवर्द्धमानाय निर्धूत कलिलात्मने ।
सालोकानां त्रिलोकानां यद्विद्या दर्पणायते ॥१॥

जिनेन्द्रमुन्मूलित कर्मबन्धं प्रणम्य सन्मार्गकृतस्वरूपम् ।
अनन्तबोधादिभवं गुणौघं क्रियाकलापं प्रकटं प्रवक्ष्ये ॥

खम्मामि सव्वजीवाणं सव्वे जीवा खमन्तु मे ।
मित्ती मे सव्वभूदेसु वेरं मज्झं ण केण वि ॥३॥

रागबंधपदोसं च हरिसं दीणभावयं ।
उस्सगुत्त भयं सोगं रदिमरदिं च वोस्सरे ॥४॥

हा ! दुट्ठकयं हा ! दुट्ठचिंत्तियं भासियं च हा ! दुट्ठं ।
अन्तो अन्तो डज्झम्मि पच्छुत्तावेण वेदंतो ॥५॥

दव्वे खेत्ते काले भावे य कदावराहसोहणयं ।
णिंदण गरहण जुत्तो मण वचि काएण पडिकमणं ॥६॥

अथ कृत्यविज्ञापना

भगवन्नमोऽस्तु ते, एषोऽहं देव वन्दनां कुर्याम् ।

(इति सामायिकस्वीकारः)

समता सर्वभूतेषु संयमे शुभभावना ।
आर्तरौद्रपरित्याग स्तद्धि सामायिकं मतं ॥१॥

सिद्धं सम्पूर्णं भव्यार्थं सिद्धेः कारणमुत्तमम् ।
प्रशस्त दर्शन ज्ञान चारित्र प्रतिपादनम् ॥२॥

सुरेन्द्रमुकुटाश्लिष्टं पादपद्मांशु केसरम् ।
प्रणमामि महावीरं लोकत्रितयमंगलं ॥३॥

आदौ मध्येऽवसाने च मङ्गलं भाषितं बुधैः ।
तज्जिनेन्द्र गुणस्तोत्रं तदविघ्न प्रसिद्धये ॥४॥

विघ्नाः प्रणश्यन्ति भयं न जातु न क्षुद्रदेवा परिलंघयंति ।
अर्थान्यथेष्टांश्च सदा लभंते जिनोत्तमानां परिकीर्तनेन ।५।

सिद्धेभ्यो निष्ठितार्थेभ्यो वरिष्ठेभ्यः कृतादरः ।
अभिप्रेतार्थसिद्ध्यर्थं नमस्कुर्वे पुनः पुनः ॥६॥

आई मङ्गल करणे सिस्सा लहु पारया हवंतित्ति ।
मज्झे अव्वोच्छित्ती विज्जा विज्जा फलं चरिमे ॥७॥

दुअणदं जहाजादं बारसा वत्त मेव च
चदुस्सिरंतिसुद्धिं च किरियम्मं पउंजदे ॥८॥

किरियम्मंपि करंतो ण होति किरियम्मि णिज्जरा भागी ।
बत्तीसाणण्णदरं साहुठाणं विराहिंतो ॥९॥

तिविहं तियरण सुद्धं मयरहियं दुविहं ठाण पुणरुत्तं ।
विणयेण कम्मविसुद्धं किरियम्मं होदि कादव्वं ॥१०॥

योग्य कालासन स्थान मुद्रावर्त शिरोनतिः ।
विनयेन यथाजातः कृति कर्मामलं भजेत् ॥११॥

स्नपनार्चा श्रुतिजपान् साम्यार्थं प्रतिमार्पिते ।
युज्यां यथाम्नायमाद्याद्दत्तं संकल्पितेऽर्हति ॥१२॥
एकत्वेन चरन्निजात्मनि मनोवाक्कायकर्मच्युते ।
कश्चिद्विक्रियते न जातु यतिवद्यद्वामपि श्रावकः १३
येनार्हच्छ्रुतलिङ्गवानुपरिमग्रैवेयकं नोयते ।
भव्योऽद्भुत वैभवेऽत्र न सजेत्सामायिके कः सुधी ।१४।

अथ कृत्यविज्ञापन।

भगवन्नमोऽस्तु प्रसीदन्तु प्रभुपादा वन्दिष्येऽहं एषोऽहं सर्वसावद्य योगाद्विरतोऽस्मि ।

अथ पौर्वाह्णिक देव वन्दनायां ····· चैत्यभक्ति कायोत्सर्गं करोम्यहं ।

णमो अरहंताणं णमो सिद्धाणं णमो आइरियाणं ।
णमो उवज्झायाणं णमो लोए सव्वसाहूणं ॥

चत्तारि मंगलं अरहन्त मंगलं ·····तावकायं पाव कम्मं दुच्चरियवोस्सरामि ।६ जाप्यं ॥ थोस्सामि इमित्यादि ॥

चैत्यभक्ति

श्रीगौतमादिपदमद्भुतपुण्यबन्ध-
मुद्योतिताखिलममो मिवचणासत् ।

वक्ष्ये जिनेश्वरमहं प्रणिपत्य तथ्यं
निर्वाणकारणमशेषजगद्धितार्थम् ॥
जयति भगवान् हेमाम्भोजप्रचारविजृम्भिता-
वमरमुकुटच्छायोद्गीर्णप्रभापरिचुम्बितौ ।
कलुषहृदया मानोद्भ्रान्ताः परस्परवैरिणो
विगतकलुषाः पादौ यस्य प्रपद्य विशश्वसुः ॥१॥
तदनु जयति श्रेयान् धर्मः प्रवृद्धमहोदयः
कुगति-विपथ-क्लेशाद्योऽसौ विपाशयति प्रजाः ।
परिणतनयस्याङ्गीभावाद्विविक्तविकल्पितं
भवतु भवतस्त्रातृ त्रेधा जिनेन्द्रवचोऽमृतम् ॥ २ ॥
तदनु जयताज्जैनी वित्तिः प्रभंगतरंगिणी
प्रभवविगमध्रौव्यद्रव्यस्वभावविभाविनी ।
निरुपमसुखस्येदं द्वारं विघट्य निरर्गलं
विगतरजसं मोक्षं देयान्निरत्ययमव्ययम् ॥ ३ ॥
अर्हत्सिद्धाचार्योपाध्यायेभ्यस्तथा च साधुभ्यः ।
सर्वजगद्वंद्येभ्यो नमोऽस्तु सर्वत्र सर्वेभ्यः ॥ ४ ॥
मोहादिसर्वदोषारिघातकेभ्यः सदा हतरजोभ्यः ।
विरहितरहस्कृतेभ्यः पूजार्हेभ्यो नमोऽर्हद्भ्यः ॥ ५ ॥
क्षान्त्यार्जवादिगुणगणसुसाधनं सकललोकहितहेतुं ।
शुभधामनि धातारं वन्दे धर्मं जिनेन्द्रोक्तम् ॥ ६ ॥
मिथ्याज्ञानतमोवृतलोकैकज्योतिरमितगमयोगि ।

सांगोपांगमजेयं जैनं वचनं सदा वन्दे ॥ ७ ॥
भवनविमानज्योतिर्व्यंतरनरलोकविश्वचैत्यानि ।
त्रिजगदभिवन्दितानां वंदे त्रेधा जिनेन्द्राणां ॥ ८॥
भुवनत्रयेऽपि भुवनत्रयाधिपाभ्यर्च्यतीर्थंकर्तृणाम् ।
वन्दे भवाग्निशान्त्यै विभवानामालयालीस्ताः ॥९॥
इति पंच महापुरुषाः प्रणुता जिनधर्म-वचन-चैत्यानि ।
चैत्यालयाश्च विमलां दिशन्तु बोधिं बुधजनेष्टां ॥ १० ॥
अकृतानि कृतानि चाप्रमेयद्युतिमन्ति द्युतिमत्सु मन्दिरेषु
मनुजामरपूजितानि वंदे प्रतिबिम्बानि जगत्त्रये जिनानाम्
द्युतिमंडलभासुराङ्गयष्टीः प्रतिमा अप्रतिमा जिनोत्तमानाम्
भुवनेषु विभूतये प्रवृत्ता वपुषा प्राञ्जलिरस्मि वन्दमानः
विगतायुधविक्रियाविभूषाःप्रकृतिस्थाःकृतिनांजिनेश्वराणाम्
प्रतिमाः प्रतिमागृहेषु कान्त्याप्रतिमा कल्मषशान्तयेऽभिवन्दे
कथयन्ति कषायमुक्तिलक्ष्मीं परया शान्ततया भवान्तकानाम्
प्रणमाम्यभिरूपमूर्तिमन्ति प्रतिरूपाणि विशुद्धये जिनानाम्
यदिदं मम सिद्धभक्तिनीतं सुकृतं दुष्कृतवर्त्मरोधि तेन ।
पटुना जिनधर्म एव भक्तिर्भवताज्जन्मनि जन्मनि स्थिरा मे
अर्हतां सर्वभावानां दर्शनज्ञानसम्पदाम् ।
कीर्तयिष्यामि चैत्यानि यथाबुद्धि विशुद्धये ॥ १६ ॥
श्रीमद्भावनवासस्थाः स्वयंभासुरमूर्तयः ।
वन्दिता नो विधेयासुः प्रतिमाः परमां गतिम् ॥ १७ ॥

यावन्ति सन्ति लोकेऽस्मिन्नकृतानि कृतानि च ।
तानि सर्वाणि चैत्यानि वन्दे भूयांसि भूतये ॥ १८ ॥
ये व्यन्तरविमानेषु स्थेयांसः प्रतिमागृहाः ।
ते च संख्यामतिक्रान्ताः सन्तु नो दोषविच्छिदे ॥ १९ ॥
ज्योतिषामथ लोकस्य भूतयेऽद्भुतसम्पदः ।
गृहाः स्वयंभुवः सन्ति विमानेषु नमामि तान् ॥ २० ॥
वन्दे सुरकिरीटाग्रमणिच्छायाभिषेचनम् ।
याः क्रमेणैव सेवन्ते तदर्चाः सिद्धिलब्धये ॥ २१ ॥
इति स्तुतिपथातीतश्रीभृतामर्हतां मम ।
चैत्यानामस्तु संकीर्तिः सर्वास्रवनिरोधिनी ॥ २२ ॥

अर्हन्महानदस्य त्रिभुवनभव्यजनतीर्थयात्रिकदुरित-
प्रक्षालनैककारण मतिलौकिककुहकतीर्थमुत्तमतीर्थम् ॥२३॥

लोकालोकसुतत्त्वप्रत्यवबोधनसमर्थदिव्यज्ञान-
प्रत्यहवहत्प्रवाहं व्रतशीलामलविशालकूलद्वितयम् ॥२४॥

शुक्लध्यानस्तिमितस्थितराजद्राजहंसराजितमसकृत् ।
स्वाध्यायमन्द्रघोषं नानागुणसमितिगुप्ति-सिकतासुभगम् २५

क्षान्त्यावर्तसहस्रं सर्वदया-विकचकुसुमविलसल्लतिकम्
दुःसहपरीषहाख्यद्रुततरंगत्तरंगभंगुरनिकरम् ॥२६॥

व्यपगतकषायफेनं रागद्वेषादिदोष-शैवलरहितम् ।
अत्यस्तमोह-कर्दममतिदूरनिरस्तमरणमकरप्रकरम् ॥२७॥

ऋषिवृषभस्तुतिमन्द्रोद्रे-कितनिर्घोष-विविधनिहगध्वानम्
विविधतपोनिधिपुलिनं सास्रव संवर निजरा निःस्रवणं
गणधरचक्रधरेन्द्रप्रभृतिमहाभव्यपुंडरीकैः पुरुषैः ।
बहुभिः स्नातं भक्त्या कलिकलुषमलापकर्षणार्थममेयम् २९
अवातीर्णवतः स्नातुं ममापि दुस्तरसमस्तदुरितं दूरं ।
व्यवहरतु परमपावनमनन्यजय्यस्वभावभावगभीरं ॥३०॥

अताम्रनयनोत्पलं सकलकोपवह्नेर्जयात
कटाक्षशरमोक्षहीनमविकारतोद्रेकत ।
विषादमदहानितः प्रहसितायमानं सदा
मुखं कथयतीव ते हृदयशुद्धिमात्यन्तिकीम् ॥३१॥

निरावरणभासुरं विगतरागवेगोदया
न्निरंबरमनोहरं प्रकृतिरूपनिर्दोषतः ।
निरायुधसुनिर्भयं विगतहिंस्यहिंसाक्रमात्
निरामिषसुतृप्तिमद्विविधवेदनानां क्षयात ॥३२॥

मितस्थितनखांगजं गतरजोमलस्पर्शनं
नवांबुरुहचन्दनप्रतिमदिव्यगन्धोदयम् ।
रवीन्दुकुलिशादिदिव्यबहुलक्षणालंकृतं
दिवाकरसहस्रभासुरमपीक्षणानां प्रियम् ॥ ३३ ॥

हितार्थपरिपंथिभिः प्रबलरागमोहादिभिः
कलंकितमना जनो यदभिवीक्ष्य शोशुद्ध्यते ।

सदाभिमुखमेव यज्जगति पश्यतां सर्वतः
शरद्विमलचन्द्रमंडलमिवोत्थितं दृश्यते ॥ ३४ ॥

तदेतदमरेश्वरप्रचलमौलिमालामणि–
स्फुरत्किरणचुम्बनीयचरणारविन्दद्वयम् ।
पुनातु भगवज्जिनेन्द्र ! तव रूपमन्धीकृतं
जगत् सकलमन्यतीर्थगुरुरूपदोषोदयैः ॥ ३५ ॥

चन्द्रप्रभं चन्द्रमरीचिगौरं, चन्द्रं द्वितीयं जगतीव कान्तम्
वन्देऽभिवन्द्यं महतामृषीन्द्रं जिनं जितस्वान्तकषायबन्धम्
यस्याङ्गलक्ष्मीपरिवेषभिन्नं तमस्तमोरेरिव रश्मिभिन्नम् ।
ननाश बाह्यं बहुमानसं च, ध्यानप्रदीपातिशयेन भिन्नम् ॥

स्वपक्षसौस्थित्यमदावलिप्ता वाक्सिंहनादैर्विमदा बभूवुः
प्रवादिनो यस्य मदार्द्रगंडा गजा यथा केशरिणोनिनादैः
यः सर्वलोके परमेष्ठितायाः पदं बभूवाद्भुतकर्मतेजाः ।
अनन्तधामाक्षरविश्वचक्षुः, समन्तदुःखक्षयशासनश्च ॥

स चन्द्रमा भव्यकुमुद्वतीनां, विपन्नदोषाभ्रकलङ्कलेपः ।
व्याकोशवाङ्न्यायमयूखमालः पूयात् पवित्रो भगवान्मनोमे
चत्ताणुट्ठाणे जणधणुदाणे पइपोसिउ तुहु खत्तधरु ।
तुह चरणविहाणे केवलणाणे तुहु परमप्पउ परमपरु ॥१॥

जय रिसह रिसीसरणमियपाय, जय अजिय जियंगमरोसराय
जय संभवसंभवकयविओय, जय अहिणंदण णंदियपओय ॥

जय सुमइ सुमइसम्मयपयास, जय पउमप्पह पउमाणिवास ।
जय जयहि सुपास सुपासगत्त, जय चन्दप्पह चन्दाहवत्त ॥
जय पुप्फयन्त दतंन्तरंग, जय सीयल सीयलवयणभंग ।
जय सेय सेयकिरणोहसुज्ज, जय वासुपुज्ज पुज्जाण पुज्ज ॥
जय विमल विमलगुणसेढिठाण, जय जयहि अणंताणंतणाण
जय धम्म धम्मतित्थयर संत, जय सांति सांति विहियायवत्त
जय कुन्थु कुन्थु पहुअंगि सदय, जय अर अर माहर विहियसमय
जय मल्लि मल्लि आदामगंध; जय मुणिसुव्वय सुव्वयणिबंध
जय णमि णमियामरणियरसामि, जयणेमि धम्मरहचक्कणेमि
जय पास पासछिंदणकिवाण, जय वड्ढमाण जसवड्ढमाण

इह जाणिय णामहिं दुरियविरामहिं,
परहिंवि णमिय सुरावलिहिं ।
अणहणहिं अणाइहिं समियकुवाइहिं,
पणविवि अरंहतावलिहिं ॥

वर्षेषु वर्षान्तरपर्वतेषु नन्दीश्वरे यानि च मंदरेषु ।
यावन्ति चैत्यायतनानि लोके सर्वाणि वन्दे जिनपुङ्गवानां
अवनितलगतानां कृत्रिमाकृत्रिमाणां,
वनभवनगतानां दिव्यवैमानिकानां ।
इह मनुजकृतानां देवराजार्चितानां ।
जिनवरनिलयानां भावतोऽहं स्मरामि ॥
जम्बूधातकिपुष्करार्द्धवसुधाक्षेत्रत्रये ये भवा–

श्चंद्राम्भोजशिखंडिकंठकनकप्रावृड्घनाभाजिनाः ।
सम्यग्ज्ञानचरित्रलक्षणधरा दग्धाष्टकर्मेन्धना ।
भूतानागतवर्तमानसमये तेभ्यो जिनेभ्यो नमः ॥
श्रीमन्मेरौ कुलाद्रौ रजतगिरिवरे शाल्मलौ जम्बुवृक्षे,
वक्षारे चैत्यवृक्षे रतिकररुचिके कुंडले मानुषांके ।
इष्वाकारेऽञ्जनाद्रौ दधिमुखशिखरे व्यंतरे स्वर्गलोके ।
ज्योतिर्लोकेऽभिवन्दे भुवनमहितले यानि चैत्यालयानि ॥
द्वौ कुन्देंदुतुषारहारधवलौ द्वाविंद्रनीलप्रभौ,
द्वौ बन्धूकसमप्रभौ जिनवृषौ द्वौ च प्रियंगुप्रभौ ॥
शेषाः षोडश जन्ममृत्युरहिताः संतप्तहेमप्रभा-
स्ते संज्ञानदिवाकराः सुरनुताः सिद्धिं प्रयच्छंतु नः ॥

अथ पौर्वाण्हिक देववंदनायां ...... पंचगुरुभक्ति कायोत्सर्गं करोम्यहं

णमो अरहंताणमित्यादि पठित्वा कायोत्सर्गं च कृत्वा थोस्सामि दंण्डकं पठेत् ।

आलोचना या अंचलिका-

इच्छामि भन्ते चेइयभत्ति काउस्सग्गो कओ तस्सालोचेउं, अहलोयतिरियलोयउड्ढलोयम्मि किट्टिमाकिट्टिमाणि जाणि जिण चेइयाणि ताणि सव्वाणि तिसु वि लोएसु भवणवासियवाणविंतर-जोइसियकप्पवासियत्ति चउविहा देवा सपरिवारा दिव्वेण गन्धेण, दिव्वेण पुप्फेण, दिव्वेण धूवेण, दिव्वेण चुण्णेण, दिव्वेण वासेण, दिव्वेण ण्हाणेण, णिच्चकालं

अंचंति, पुज्जंति वन्दंति, णमंसंति। अहमवि इह संतोतत्थ, संताइ णिच्चकालं अंचेमि, पूजेमि, वन्दामि, णमंसामि दुक्खक्खओ कम्मक्खओ बोहिलाहो, सुगइगमणं समाहिमरणं, जिणगुणसम्पत्ति होउ मज्झं।

अनन्तर उठकर पंचांग नमस्कार करें। पश्चात् भगवान के सम्मुख पहिले की तरह खड़े होकर मुक्ता शुक्ति मुद्रासे हाथ जोड़कर तीन आवर्त कर अनन्तर बैठे २ ही नीचे लिखी कृत्यविज्ञापना करे।

अथ पौर्वाह्णिक देव वन्दनायां पूर्वाचार्यानुक्रमेण सकल कर्मक्षयार्थं भावपूजावन्दनास्तवसमेतं पंच गुरु भक्तिकायोत्सर्गं करोम्यहं।

और एक शिरोनति कर पूर्वोक्त सामायिक दंडक पढें। अंत मे तीन आवर्त और एक शिरोनति कर सत्ताईस उच्छ्वास प्रमाण कायोत्सर्ग करें। कायोत्सर्ग पूर्ण होने पर पुनः पचाग नमस्कार कर तीन आवर्त और एक शिरोनति करें। पश्चात् थोस्सामि इत्यादि चतुर्विंशति स्तव पढ़कर अंत में तीन आवर्त और एक शिरोनति करें। अनन्तर भगवान के सन्मुख पूर्वोक्तरीति मे खड़े होकर नीचे लिखी पंच महा गुरुभक्ति पढ़े।

अथ पौर्वाह्णिक देववंदनायां···शांतिभक्ति कायोत्सर्गं करोम्यहं। णमो अरिहंताण मित्यादि कायोत्सर्ग विधि पूर्वक।

दोधकवृत्त

शांतिजिनं शशिनिर्मलवक्त्रं, शीलगुणव्रतसंयमपात्रं।
अष्टशतार्चितलक्षणगात्रं नौमि जिनोत्तममंबुजनेत्रं ॥१॥

पंचममीप्सितचक्रधराणां, पूजितमिंद्रनरेंद्रगणैश्च ।
शांतिकरं गणशांतिमभीप्सुः षोडशतीर्थंकरं प्रणमामि २
दिव्यतरुः सुरपुष्पसुवृष्टिर्दुन्दुभिरासनयोजनघोषौ ।
आतपवारणचामरयुग्मे यस्य विभाति च मंडलतेजः ॥३॥
तं जगदर्चितशांतिजिनेंद्रं शांतिकरं शिरसा प्रणमामि ।
सर्वगणाय तु यच्छतु शांतिं मह्यमरं पठते परमां च ।

वसंततिलका ।

येऽभ्यर्चिता मुकुटकुंडलहाररत्नैः ।
शक्रादिभिः सुरगणैः स्तुतपादपद्माः ॥
ते मे जिनाः प्रवरवंशजगत्प्रदीपा–
स्तीर्थंकराः सततशांतिकरा भवंतु ॥

इन्द्रवज्रा

संपूजकानां प्रतिपालकानां यतींद्रसामान्यतपोधनानां ।
देशस्य राष्ट्रस्य पुरस्य राज्ञः करोतु शांतिं भगवान् जिनेन्द्रः
अशोक वृक्ष सुरपुष्पवृष्टिर्दिव्यध्वनिश्चामर मासनं च ।
भामंडलं दुंदुभिरातपत्रं, सत्प्रातिहार्याणि जिनेश्वराणां ७

स्रग्धरावृत्तम् ।

क्षेमं सर्वप्रजानां प्रभवतु बलवान् धार्मिको भूमिपालः,
काले काले च सम्यग्वर्षतु मघवा व्याधयो यांतु नाशं
दुर्भिक्षं चौरमारी क्षणमपि जगतां मास्म भूज्जीवलोके,
जैनेंद्रं धर्मचक्रं प्रभवतु सततं सर्वसौख्यप्रदायि ।८।

प्रध्वस्तघातिकर्माणः केवलज्ञानभास्कराः।
कुर्वंतु जगतः शांतिं वृषभाद्या जिनेश्वराः ॥ ९ ॥

इच्छामि भन्ते ! संतिभत्ति काओ सग्गो कओतस्सा लोचेउं पंचमहा कल्लाणं संपण्णाणं अट्ठमहा पाडिहेर महियाणं चउतीसातिसय विसेससंजुत्ताणं बत्तीसदेविंद मणि मगमउडमत्थयमहियाणं बलदेव वासुदेवचक्क हररिसिमुणि जदिअणगारो वगूढाणं थुइसम सहस्स णिलयाणं उस-हाइवीर पच्छिम मंगलमहापुरिसाणं णिच्चकालं अंचेमि पूजेमि वन्दामि णमंस्सामि दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहि-मरणं जिणगुण सम्पत्ति होउ मज्झं।

अथपौर्वाह्निकदेववंदनायां चैत्य-पंचगुरु शांतिभक्तीः कृत्वा तद्धीनाधिकत्वादि दोष विशुद्ध्यर्थं आत्म पवित्री करणार्थं समाधिभक्ति कायोत्सर्गं करोम्यहं।

जैनमार्ग रुचिरन्य मार्ग निर्वेदता जिन गुण स्तुतौ मतिः
निष्कलंक विमलोक्ति भावना संभवंतु मम जन्म जन्मनि

अक्खर पयत्थ हीणं मत्ता हीणं च जंमए भणियं।
तंखमउ णाण देवय। मज्झवि दुक्खक्खयं दिंतु।३।

दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमण समाहि मरणं जिणगुण संपत्ति होउमज्झं

प्रथमं करणं चरणं द्रव्यं नमः ।

अभीष्टप्रार्थना ।

शास्त्राभ्यासो जिनपतिनुतिः संगतिः सर्वदार्यैः
सद्वृत्तानां गुणगणकथा दोषवादे च मौनं ॥
सर्वस्यापि प्रियहितवचो भावना चात्मतत्त्वे
सम्पद्यं तां मम भवभवे यावदेतेऽपवर्गः ॥ १ ॥

आर्य्यावृत्तम् ।

तव पादौ मम हृदये मम हृदयं तव पद द्वये लीनं ।
तिष्ठतु जिनेन्द्र तावद्यावन्निर्वाण संप्राप्तिः ॥ ३ ॥
अक्खर पयत्थ हीणं मत्ता हीणं च जंमए भणियं ।
तं खमउ णाण देवय देउ समाहिं च मे बोहिं ॥४॥
जं सक्कइ तं कीरइ जेसक्कइ तस्स करेइ सद्दहणं ।
सद्दहमाणो जीवो पावइ अजरामरं ठाणं ।
तव यरणं वय धरणं संजम सरणं चजीवदयाकरणं
अंते समाहिं मरणं चउगइ दुक्खं णिवारेइ ॥ ६ ।
दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइ गमणं ।
समाहि मरणं जिणगुण संपत्ति होउ मज्झं ।

नोट—इस देव वंदनाकी टीका श्रीप्रभाचन्द्राचार्य कृत मिलती है तथा बहुत से मूल २ ही क्रिया कलापों में भी यही विधि पाई जाती है इसमें कायोत्सर्ग मुद्रा आवर्त शिरोनति नमस्कार आदि की विधि पूर्ववत ही समझ लेना चाहिये ।

प्रथम देववंदना में जो पाठ क्रम है उसमें अनगार धर्मामृत के संकेत से ही मात्र दो भक्ति को ही लेकर प्रथम का सांख्यष्टक व चैत्यभक्ति के अंतर्गत चन्द्रप्रभुस्तुति व जयमाला, तथा लघुचैत्य भक्ति का पाठ छोड़ दिया गया है। परंतु इसही प्रभाचन्द्राचार्य कृत टीका बिल्कुल इस ही क्रम से होने से यह विधि प्राचीन व प्रामाणिक है यद्यपि सर्वत्र देववंदना में चैत्य पंचगुरु भक्ति का विधान है फिर भी इनके अन्तर्गत पाठ अधिक होने हुये भी प्रधानता इन दो भक्तियों की ही है।

पुनः गुरु वंदनाके कालका निर्णय

वंद्या दिनादौ गुर्वाद्या विधिवत् विहितक्रियैः।
मध्यान्हे स्तुति देवैश्च, सायंकृतप्रतिक्रमैः॥

अर्थ—प्रभात में सामायिकानंतर आचार्यादिकी वन्दना विधिवत् भक्ति पाठ करके करे व मध्यान्ह में देव वन्दना (सामायिक) के पश्चात् तथा अपराण्ह् में दैवसिक प्रतिक्रमण के वाद में विधिवत् वन्दना करे। तथा अन्य समय में भी नमोऽस्तु आदि पदों के द्वारा वन्दना प्रतिवन्दनादिक करे! यथा:—

सर्वत्रापि क्रियारंभे वंदना प्रति वंदने।
गुरु शिष्ययोः साधूनां तथा मार्गादि दर्शने॥

आचार्यादि वंदना विधिः

लघ्व्यां सिद्धगणि स्तुत्या, गणी वंद्यो गवासनात्।
सिद्धान्तोऽन्त श्रुतः स्तुत्या, तथान्यस्तन्नुतिं विना॥

अर्थः—लघु सिद्ध भक्ति और आचार्य भक्ति के द्वारा गवासन से बैठकर साधु और व्रतिक आचार्य की वंदना करें तथा सिद्धांतविद् आचार्य की वन्दना करते समय इन दोनों भक्तियों के बीच लघुश्रुतभक्तिभी करें और सामान्य की वन्दना लघु सिद्ध भक्ति पूर्वक तथा आचार्य पद रहित सामान्य मुनि यदि सिद्धांतविद् हैं तो सिद्धभक्ति व श्रुतभक्ति पूर्वक वंदना करें।

अथ आचार्य वंदना प्रायोग्य विधि

नमोऽस्तु श्री आचार्य वंदनायां श्री सिद्धभक्ति कायोत्सर्गं करोम्यहं

(णमोकारान् ९ जपित्वा)

लघु सिद्धभक्तिः

सम्मत्तणाण दंसण वीरिय सुहुमं तहेव अवगहणं।
अगुरुलहुमव्वाबाहं अट्ठगुणा होंति सिद्धाणं॥
तवसिद्धे णयसिद्धे संजमसिद्धे चरित्त सिद्धे य।
णाणम्हि दंसणम्हि य सिद्धे सिरसा णमंसामि॥

नमोऽस्तु आचार्य वंदनायां श्री श्रुतभक्ति कायोत्सर्गं करोम्यहं।

(णमोकार ९ जपित्वा)

लघुश्रुतभक्ति

कोटी शतं द्वादश चैव कोट्यो,
लक्षाण्यशीतिस्त्र्यधिकानि चैव ।
पंचाशदष्टौ सहस्र संख्य-
मेतच्छ्रुते पंच पदं नमामि ॥ १ ॥
अरहंत भासि यत्थं, गणहर देवेहिं गत्थियं सम्मं ।
पणमामि भत्ति जुत्तो, सुदणाण महोवहिं सिरसा ।२।
नमोऽस्तु आचार्य वन्दनायां श्री आचार्य भक्ति कायोत्सर्ग करोम्यहं ।

(णमोकार ६ गुणित्व)

लघु आचार्य भक्ति

श्रुत जलधि पारगेभ्यः स्वपरमत विभावना पटुमतिभ्यः
सुचरित तपोनिधिभ्यः नमो गुरुभ्यः गुण गुरुभ्यः । १ ।
छत्तीस गुण समग्गे पंचविहाचार करण संदरिसे ।
सिस्साणुग्गह कुसले, धम्माइरिये सदा वन्दे ॥ २ ॥
गुरु भत्ति संजमेण य तरंति संसार सायरं घोरं ।
छिण्णंति अट्ठ कम्मं जम्मण मरणं ण पावेंति ॥ ३ ॥
ये नित्यं व्रत मंत्र होम निरता, ध्यानाग्नि होत्राकुलाः ।
षट्कर्माभिरतास्तपोधन धनाः, साधुक्रियाः साधवः ।४।
शील प्रावरणा गुण प्रहरणाश्चंद्रार्क तेजोधिका: ।

मोक्षद्वार कपाट पाटन भटाः श्रीसंतु मां साधवः ॥ ५ ॥
गुरवः पांतु नो नित्य ज्ञान-दर्शन नायकाः ।
चारित्रार्णव गंभीरा मोक्ष मार्गोपदेशकाः ॥ ६॥

पौर्वाण्हिक स्वाध्याय विधिः

अथ पौर्वाण्हिक स्वाध्याय,प्रारंभ क्रियायां श्री श्रुतभक्ति कायोत्सर्गं करोम्यहं ।

(दंडक पठित्वा—पूर्ववत् अर्हद्वक्त्र सूतं इत्यादिकं पठित्वा आचार्यभक्ति कुर्यात् ।

तद्यथा—पौर्वाण्हिक स्वाध्याय प्रारंभ क्रियायां श्री आचार्य भक्ति कायोत्सर्गं करोम्यहं ।

(दण्डकं पठित्वा)

श्रुतजलधि इत्यादिकं पठेत् । पुनः स्वाध्याय करें । स्वाध्याय के बाद भी लघुश्रुतभकित पढ़कर निष्ठापन करें पुनः—

पूर्वाण्हेऽप्यपराण्हस्य, वाचनार्थं विशोधयेत् ।
एवमाशाचतस्रस्तु, सप्तार्यापाठकालतः ॥

(आचार सारे)

अर्थः—पूर्वाण्हस्वाध्याय के अनन्तर भी अपराण्हकाल के स्वाध्याय के लिये चारों दिशाओं में सात सात वार णमोकार मंत्र को पढ़कर दिक् शुद्धि करें ।

प्राभातिक कृत्यानंतर करने योग्य कार्य

प्रवृत्यैवं दिनादौ द्वे नाड्यौ यावद्यथाबलं ।
नाडीद्वयोन मध्यान्हं यावत्स्वाध्यायमावहेत् ॥ ३४ ॥

अर्थ—सूर्योदय के दो घड़ी बाद प्रारंभ किये गये स्वाध्याय कोअपनी शक्तिके अनुसार मध्यान्ह की दो घड़ी के पहिले पहिले तक करें ।

यदि उपवास है तो अस्वाध्याय काल में करने योग्य कार्य ।

ततो देवगुरुस्तुत्या ध्यानं वाराधनादि वा ।
शास्त्रंजपं वाऽस्वाध्याय कालेऽभ्यस्येदुपोषितः ॥ ३५ ॥

अर्थ—पूर्वाण्हिक स्वाध्याय के निष्ठापनानंतर देववंदना गुरुवंदना पूर्वोक्त विधि से अर्थात् पौर्वाण्हिक की माध्यान्हिक पाठका उच्चारण करे अनंतर बचे हुये समय में ध्यान करें अथवा आराधनादि शास्त्रों को पढ़ व जाप्य करें । और यदि उपवास नहीं है तो देव गुरु वंदना करके आहार को गमन करें । सोही कहते हैं—

प्राणयात्राचिकीर्षायां प्रत्याख्यानमुपोषितं ।
न वा निष्ठाप्य विधिवद् भुक्त्वा भूयः प्रतिष्ठपेत् ॥३६॥

अर्थ—प्राणयात्रा अर्थात् दशप्राणयुक्त शरीर से ही ज्ञान ध्यान की सिद्धि है । अतः उसकी रक्षा हेतु भोजन की इच्छा होने पर प्रत्याख्यान अथवा पूर्व दिन के

उपवास को निष्ठापन करके विधिवत् आहार करे और पुनः उपवास या प्रत्याख्यान को ग्रहण करे।

प्रत्याख्यान निष्ठापन व प्रतिष्ठा विधि।

हेयं लघ्व्या सिद्धभक्त्याशनादौ।

प्रत्याख्यानाद्याशुचादेयमन्ते।

सूरौ तादृक् योगिभक्त्याग्रथातत्।

१-मध्यान्ह देव वंदना अनंतर आहार के विषय में वर्तमान। मे समझ में नहीं आता है क्योंकि मध्यान्ह की दो घड़ी। अवशिष्ट रहने पर देववन्दना करने पर मध्यान्ह के उपरान्त ही आहार का काल इस नियम से बैठता है। ओर वर्तमान में आहारानंतर ही देव वन्दना होती है।

प्राह्यं वंद्यःसूरि भक्त्याप्रया तत ॥ २७ ॥

अर्थ—भोजन के पहले लघु सिद्धभक्ति पढ़कर प्रत्याख्यान अथवा उपवास का त्याग (निष्ठापन) करे और भोजन के बाद शीघ्र ही लघु सिद्धभक्ति पढ़कर उपवास अथवा प्रत्याख्यान ग्रहण करे—अन्ते प्रक्रमाद् भोजनस्यैव प्रान्ते। कथं आशु शीघ्र भोजनान्तरमेव। आचार्या सन्निधावेत द्विधेयं। सूरौ। आचार्य समीपे पुनर्ग्राह्यं प्रतिष्ठाप्यं साधुना किंतत्।- प्रत्याख्यानादि। कया। लघव्यासिद्धभक्त्या इत्यादि। अर्थात् भोजनान्तर स्वयमेव साधु वहीं पर लघुसिद्धभक्ति पूर्वक शीघ्र ही प्रत्या-

ख्यान ग्रहण कर लेवे। पश्चात् गुरुके पास आकर लघु योगभक्ति व सिद्धभक्ति पूर्वक प्रत्याख्यानादि ग्रहण करे पुनः लघु आचार्य भक्ति पढ़कर आचार्य की वन्दना करे।

प्रत्याख्यान निष्ठापन प्रतिष्ठापन विधि

अथ प्रत्याख्यान निष्ठापन क्रियायां सिद्धभक्ति कायोत्सर्गं करोम्यहं। ९ जाप्य—

(— नवधा भक्तिके पश्चात् भोजन के प्रारंभ करते समय।

तवसिद्धे णयसिद्धे संजमसिद्धे चरित्त सिद्धे य
णाणम्हि दंसणम्हि य सिद्धे सिरसा णमंसामि।१।

इच्छामि भंते। सिद्ध भक्ति काउसग्गो कओ तस्स लोचेउं सम्मणाण सम्मदंसण सम्म चरित्त जुत्ताणं अट्ठविह कम्म विप्प मुक्काणं अट्ठगुण संपण्णाणं उड्ढ लोयमत्थ-यम्मि पइट्ठियाणं तव सिद्धाणं णयसिद्धाणं संजम सिद्धाणं चरित्त सिद्धाणं अतीताणागद वट्टमाण कालत्तय सिद्धाणं सव्व सिद्धाणं सया णिच्च कालं अंचेमि पूजेमि वन्दामि णमंसामि दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइ-गमणं समाहि मरणं जिणगुण संपत्ति होउमज्झं।

भोजन के पश्चात्—

अथ प्रत्याख्यान प्रतिष्ठापन क्रियायां
सिद्ध भक्ति कायोत्सर्गंकरोम्यहं। ९ जाप्य।

नव सिद्धणयसिद्धे ...... इत्यादि। अनन्तर गुरुके पास आकरके—

अथ प्रत्याख्यान प्रतिष्ठापने क्रियायांसिद्धभक्ति कायोत्सर्ग करोम्यहं । ९ जाप्यं ।

तवसिद्धे णय सिद्धे ... इत्यादि सिद्ध भक्ति पढे । अथ प्रत्याख्यान प्रतिष्ठापन क्रियायां योगिभक्ति कायोत्सर्ग करोम्यहं । ९ जाप्यं ।

लघु योगि भक्ति—

प्रावृट्काले सविद्युत्प्रपतित सलिले वृक्ष मूलाधिवासा।
हेमंते रात्रिमध्ये प्रतिविगत भया काष्ठवत्त्यक्त देहाः ॥
ग्रीष्मे सूर्यांशु तप्ता गिरि शिखिरगताः स्थानकूटांतरस्था।
स्तेमे धर्म प्रदद्यु मुनिगण वृषभामोक्ष निःश्रेति भूतः ।१।
गिम्हे गिरि सिहरत्था वरिसा यालेरुक्खमूलरयणीसु ।
सिसिरे वाहिर सयणा ते साहू वंदिमो णिच्चं ॥ २ ॥
गिरि कंदर दुर्गेषु ये वसंति दिगंबराः ।
पाणि पात्र पुटादारास्ते यांति परमां गतिं ।३।

अंचलिका

इच्छामि भंते । योगि भत्ति काओसग्गो कओ तस्सा लोचेउं अड्ढाइज्जदीक्दो समुद्देसु पण्णारस कम्म भूमेसु आदावण—रुक्ख—मूल—अब्भवासठाण-मोण-वीरासणेक्क-वास—कुक्कुडासण-–चउत्थ—पक्ख—खमणादि जोग जुत्ताणं

णिच्चकालं अंचेमि पूजेमि वंदामि णमस्सामि दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुण संपत्ति होउ मज्झं ।।

इसी प्रकार यदि पूर्व दिन का उपवास हो तो "प्रत्याख्यान निष्ठापन की जगह उपवास निष्ठापन तथा प्रत्याख्यान प्रतिष्ठापन की जगह उपवास प्रतिष्ठापन का पाठ करना चाहिये ।

नंतर आचार्य के समक्ष प्रत्याख्यान अथवा उपवास ग्रहण कर लघु आचार्य भक्ति पूर्वक आचार्य की वंदना करें ।

नमोऽस्तु आचार्य वंदनायां आचार्य भक्ति कायोत्सर्गं करोम्यहं ६ जाप्य ।

श्रुतजलधि पारगेभ्य'''इत्यादि पाठ करें ।

प्रत्याख्यानादि ग्रहण के अनंतर करने योग्य कार्य

प्रतिक्रम्याथ गोचार दोषं नाडी द्वयाधिके ।
मध्यान्हे प्राण्हवद्वृत्ते स्वाध्यायं विधिवद् भजेत् ।। ३६ ।।

अर्थ—पश्चात् साधु आहार में हुये दोषों का प्रतिक्रमण करके मध्यान्ह काल की दो घड़ी के अनंतर पूर्वोक्त विधि से अर्थात् पौर्वाण्हिक के स्थान में आपराण्हिक स्वाध्याय का प्रयोग करके स्वाध्याय को प्रारंभ करे । इसमें जो

आहारके बाद दोषोंके प्रतिक्रमण करनेका अर्थात् गोचार प्रतिक्रमण का कथन है उसी का स्पष्टीकरण।

लघुप्रतिक्रमण सात माने हैं। यथा—

लुञ्चे रात्रौ दिने भुक्ते निषेधिका गमने पथि।
स्यात् प्रतिक्रमणालघ्वी तथा दोषेतु सप्तमी॥

(अनगारे)

अर्थ—केशलुञ्च प्रतिक्रमण रात्रिप्रतिक्रमण दिवस प्रतिक्रमण गोचार प्रतिक्रमण निषेधिका गमन प्रतिक्रमण ईर्यापथ प्रतिक्रमण दोष (स्वप्नादि अतीचार) प्रतिक्रमण इस प्रकार यह सात प्रतिक्रमण माने हैं। इन में से चार प्रतिक्रमण लघु होने से तीन प्रतिक्रमणों में अंतर्भूत हो जाते हैं। यथा निषिद्धिका गमन प्रतिक्रमणा लुञ्च-प्रतिक्रमणा गोचार प्रतिक्रमणा अतिचार दोष प्रतिक्रमण चेर्यापथिकादि प्रतिक्रमणासु अंतर्भवति लघुत्वात्।

तत्राद्या पंचातीचार प्रतिक्रमणानां अन्त्यारात्रि प्रतिक्रमणानां शेषे दैवसिक प्रतिक्रमणानां चांत-र्भवंति अर्थात् निषिद्धिका के लिये जो गमन उसमें होने वाले दोषोंका प्रतिक्रमण वह निषिद्धका प्रतिक्रमण है वह ईर्यापथ शुद्धि प्रतिक्रमण में गर्भित हो जाता है। तथा अतिचार प्रतिक्रमण (स्वप्नादि दोष प्रतिक्रमण) है वह रात्रिक प्रतिक्रमण में अंतर्भूत हो जाता है तथा

लोंच प्रतिक्रमण और गोचार प्रतिक्रमण अर्थात दो तीन अथवा चार माम से किये जाने वाले केशलोंच का प्रतिक्रमण और आहार में होने वाले दोषों का प्रतिक्रमण ये दोनों ही प्रतिक्रमण दैवसिक प्रतिक्रमण में अंतर्भूत होजाते हैं।

विशेषः—भक्ति की पुस्तकों में हिन्दी में जहां कौनसी भक्ति कहां करना यह कथन है वहां पर आहारको निकलते समय योगि भक्ति व सिद्धिभक्ति गुरु के पास करके जावे ऐसा भी कथन है। परंतु अनगार धर्मामृत चारित्र सार आचार सारमें तो केवल आहारके बादमें गुरुके पास प्रत्याख्यान के लिये ही दो भक्ति हैं। तथा दाताके घरमें नवधा भक्तिके अनंतर सिद्ध भक्तिपूर्वक प्रत्याख्यान निष्ठापन या आहारानन्तर शीघ्र ही सिद्धभक्ति पूर्वक प्रत्याख्यान प्रतिष्ठापन करे। नन्तर गुरु के पास आकर लघु सिद्ध भक्ति व लघु योगि भक्ति पूर्वक पुनः प्रत्याख्यान ग्रहण करे व आचार्यभक्ति पूर्वक आचार्य वन्दना करे।

उक्तंच आचारसारे

आलोचना समासीनो दातृ प्रक्षालित क्रमः।
ऊर्ध्वाधः पार्श्वदिक्कोण निक्षेपाद्यनिरीक्षणः॥ ११८॥
वर्गीपूर्ण प्रतिज्ञोऽय सिद्धभक्ति विधायतत्।

प्रत्याख्यानं विनिष्ठाप्य प्रेरितो भक्त दातृभिः ॥ ११६ ॥
समांगुल चतुष्कांत......
स्तः सिद्धयोगभक्ती द्वं प्रत्याख्यान तदंगता ।
सूरि भक्ति भवेत् सिद्ध भक्ति निष्ठापनेऽस्यतु ।७१।

चारित्रसारे च

सिद्ध योगि भक्तीकृत्वा प्रत्याख्यानंगृहीत्वा आचार्य भक्ति कृत्वा ऽऽचार्यानुवन्दतां । सिद्धभक्तिं कृत्वा प्रत्याख्यानं मोचयेत् ।

पुनः—

नाडी द्वयावशेषेऽन्हि तं निष्ठाप्य यथाक्रमं ।
कृत्वान्हिकं गृहीत्वा च योगं वंद्योपतेगणी ।४०।

अर्थः सूर्यास्तके होने में दो घड़ी अवशिष्ट रहने पर स्वाध्याय का निष्ठापन करे और

कृत्वैवं अपराण्हेऽपि पंचार्या पाठकालतः ।
दिक् शुद्धिं वाचनां पूर्वं रात्रौ कुर्यादिदं पुरा ॥

अर्थ—स्वाध्यायानन्तर अपराण्ह में भी चारों दिशाओं में पांच पांच बार णमोकार मंत्र को पढ़कर प्रादोषिक स्वाध्याय" के लिये दिक् शुद्धि करें । पुनः "दैवसिक प्रतिक्रमण" करके रात्रियोग को ग्रहण करे (आज रात्रि में मैं इसी वसतिका में रहूंगा इस नियम विशेष को योग कहते है) और पश्चात् पूर्वोक्त विधि से आचार्य वन्दना करे

ऊपर जो "रात्रिक प्रतिक्रमण" बताया है वही दैवसिक म भी करें। अन्तर नवल इतना ही है कि "रात्रिक राइयो शब्द के स्थान में "देवसिओ' शब्दों का प्रयोग करें तथा वीर भक्ति में १०८ उच्छ्वासों मे ४ कायोत्सर्ग करें और "रात्रियोग निष्ठापन' क्रिया में भी "रात्रियोग प्रतिष्ठापन" शब्दका प्रयोग कर उपर्युक्त योग भक्ति को करें।

पुन :—

स्तुत्वादेव मथारभ्य प्रदोषे सद्विनाडिके।
मुञ्चेत् निशीथे स्वाध्यायं प्रागेव घटिका द्वयात् ॥४१॥

अर्थ—आचार्य वन्दना के बाद पूर्वोक्त विधि से देववन्दना (सामायिक) करे, अन्तर केवल इतना ही है कि "पौर्वाह्णिक देववन्दनायां" के स्थान में "आपराह्णिक देववन्दनायां" का प्रयोग करे। पुनः सूर्यास्त से दो घडी के बीतने पर "प्रादोषिक" स्वाध्याय को करें। अर्थात् "वैरात्रिक स्वाध्याय प्रतिष्ठापन क्रियाया" के स्थान में "प्रादोषिक स्वाध्याय प्रतिष्ठान क्रियायां" का प्रयोग करे और अर्धरात्रि के दो घडी अवशिष्ट रहने पर स्वाध्याय का निष्ठापन कर देवे।

निद्रा जीतने का उपाय

ज्ञानचार्य घनानन्द सान्द्र संसार भीरुकः।
शोचमानो जितं चैनो जयेन्निद्रां जिताशनः ॥४२॥

अर्थ—ज्ञान, दर्शन और चारित्र तप की आराधना से उत्पन्न हुए आनन्द से संयुक्त संसार से भयभीत तथा पूर्व में अर्जित जो पाप उनका शोच करता हुआ साधु निद्रा को जीतने का प्रयत्न करे।

अब असमर्थ साधु को स्वाध्याय व देववन्दना को करने की विधि बतलाते हैं।

सप्रति लेखन मुकुलित वत्सोत्संगित करः सपर्यंकः।
कुर्यादेकाग्र मनाः स्वाध्यायं वन्दना पुन रशक्त्या ॥४३॥

अर्थ—पिच्छिका सहित अंजली जोड़कर जुड़ी हुई अंजली को वक्षस्थल के मध्य में करके पर्यंकासन व वीरासन अथवा सुखासन से बैठकर मनको एकाग्र करके स्वाध्याय व वन्दना को करें यदि खड़े होने की सामर्थ्य न होवे तो यह विधान है।

योग प्रतिक्रम विधिः प्रागुक्तो व्यावहारिकः।
कालक्रम नियमोऽत्र न स्वाध्यायादि वंद्यतः ॥४४॥

अर्थ—पूर्व में कहा गया जो काल क्रम नियम है उसका कदाचित् धर्म कार्यादि के व्यासंग से रात्रियोग और प्रतिक्रमण विधान में अतिक्रमण भी हो जावे, परन्तु स्वाध्याय व देववन्दना तथा भक्त (आहार) के

प्रत्याख्यान आदिकोंमें जो काल क्रम नियम है उसमें अतिक्रमण नहीं करना चाहिए।

इति नित्य क्रिया प्रयोग विधि:

अथ नैमित्तिक क्रिया प्रयोग विधि:

चतुर्दशी क्रिया प्रयोग

त्रिसमय वन्दनेभक्ति द्वयमध्ये श्रुतनुतिं चतुर्दश्यां।
प्राहुस्तद्भक्ति त्रयं मुखान्तयोः केपि सिद्ध शांति नुती ।४५।

॥ अर्थ—त्रिकाल वन्दना में चतुर्दशी के दिन "प्राकृत क्रियाकाण्ड, चारित्रसार" मत के अनुसार चैत्यभक्ति और पंच गुरुभक्ति के मध्य में श्रुतभक्ति भी करे तथा "संस्कृत क्रियाकाण्ड मत के अनुसार" आदि में सिद्धभक्ति चैत्यभक्ति श्रुतभक्ति पंचगुरुभक्ति व शान्तिभक्ति करे।

यहां संस्कृत क्रिया काण्ड मत से प्रयोग की विधि—सामायिक करते समय-प्रथम ईर्यापथशुद्धि से लेकर "भगवन् नमोऽस्तु ...... एषोऽहं सर्व सावद्य योगाद्विरतोऽस्मि" पर्यन्त क्रिया करके भक्ति करे।

अथ पौर्वाण्हिक देववन्दनायां चतुर्दशी क्रियायांपूर्वाचार्यानु क्रमेण सकल कर्म क्षयार्थं भावपूजा वन्दना स्तव दंडकं पठित्वा समेतं श्री सिद्धभक्ति कायोत्सर्गं करोम्यहं।

इति विज्ञाप्य णमो अरहन्ताणं मिति उच्चार्य सामायिक दण्डकं कायोत्सर्गं कुर्यात् पुनः थोस्सामिनि चतुर्विंशति स्तव को पढ़के सिद्ध भक्ति को पढें।

अथ श्रीसिद्धभक्तिः

सिद्धानुद्धूतकर्मप्रकृतिसमुदयान्साधितात्मस्वभावान् ॥
वन्दे सिद्धिप्रसिद्ध्यै तदनुपमगुणप्रग्रहाकृष्टितुष्टः ।
सिद्धिः स्वात्मोपलब्धिः प्रगुणगुणगणोच्छादिदोषापहारात्,
योग्योपादानयुक्त्या दृषद इह यथा हेमभावोपलब्धिः ॥१॥
नाभावः सिद्धिरिष्टा न निजगुणहतिस्तत्तपोभिर्न युक्तेः ।
अस्त्यात्मानादिबद्धः स्वकृतजफलभुक् तत्क्षयान्मोक्षभागी ।
ज्ञाता द्रष्टा स्वदेहप्रमितिरुपसमाहारविस्तारधर्मा ।
ध्रौव्योत्पत्तिव्ययात्मा स्वगुणयुत इतो नान्यथा साध्यसिद्धिः २
स त्वन्तर्बाह्यहेतुप्रभवविमलसद्दर्शनज्ञानचर्या–
संपद्धेतिप्रघातक्षतदुरिततया व्यञ्जिताचिन्त्यसारैः ॥
कैवल्यज्ञानदृष्टिप्रवरसुखमहावीर्यसम्यक्त्वलब्धिः
ज्योतिर्वातायनादिस्थिरपरमगुणैरद्भुतैर्भासमानः ॥३॥
जानन्पश्यन्समस्तं सममनुपरतं संप्रतृप्यन्वितन्वन् ।
धुन्वन्ध्वान्तं नितान्तं निचितमनुसमं प्रीणयन्नीशभावम् ॥
कुर्वन्सर्वप्रजानामपरमभिभवन् ज्योतिरात्मानमात्मा ।
आत्मन्येवात्मनासौ क्षणमुपजनयन्सत्स्वयंभूः प्रवृत्तः ॥४॥
छिन्दन्शेषानशेषान्निगलबलकलींस्तैरनन्तस्वभावैः ।
सूक्ष्मत्वाग्र्यावगाहागुरुलघुकगुणैः क्षायिकैः शोभमानः ।
अन्यैश्चान्यव्यपोहप्रवणविषयसंप्राप्तिलब्धिप्रभावै–
रूर्ध्वं व्रज्यास्वभावात्समयमुपगतो धाम्नि संतिष्ठतेऽग्र्ये ।५।

अन्याकाराप्ति हेतु र्न च भवति परो येन तेनाल्पहीनः ।
प्रागात्मोपात्तदेहप्रतिकृतिरुचिराकार एव ह्यमूर्तिः ।

क्षुत्तृष्णाश्वासकासज्वरमरणजरानिष्टयोगप्रमोह–
व्यापत्त्याद्युग्रदुःखप्रभवभवहतेः कोऽस्य सौख्यस्य माता ६

आत्मोपादानसिद्धं स्वयमतिशयवद्वीतबाधं विशालं ।
वृद्धिह्रासव्यपेतं विषयविरहितं निःप्रतिद्वन्द्वभावम् ॥

अन्यद्रव्यानपेक्षं निरुपममभितं शास्वतं सर्वकालं ।
उत्कृष्टानन्तसारं परमसुखमतस्तस्य सिद्धस्य जातम् ॥७॥

नार्थः क्षुत्तृड्विनाशाद्विविधरसयुतैरन्नपानैरशुच्या ।
नास्पृष्टेर्गन्धमाल्यैर्नहि मृदुशयनै ग्लानि निद्राद्यभावात् ।

आतङ्कार्तेरभावे तदुपशमनसद्भेषजानर्थतावद् ।
दीपानर्थक्यवद्वा व्यपगततिमिरे दृश्यमाने समस्ते ॥८॥

तादृक्सम्पत्समेता विविधनयतपःसंयमज्ञानदृष्टि–
चर्यासिद्धाः समन्तात्प्रविततयशसो विश्वदेवाधिदेवाः ।

भूता भव्या भवन्तः सकलजगति ये स्तूयमाना विशिष्टै ॥
स्तान्सर्वान्नौम्यनंतान्निजिगमिषुररं तत्स्वरूपं त्रिसन्ध्यम् ६

अंचलिका—

इच्छामि भन्ते सिद्धभत्ति काउस्सग्गो कओ तस्सा-
लोचेउं, सम्मणाणसम्मदंसणसम्मचारित्तजुत्ताणं अट्ठ-

विहकम्मविप्पमुक्काणं अट्ठ गुणसम्पण्णाणं उड्ढलोयम-
च्छयमि पयट्ठियाणं तवसिद्धाणं णयसिद्धाणं संजमसिद्धाणं
अतीताणागदवट्टमाणकालत्तयसिद्धाणं सव्वसिद्धाणं सया
णिच्चकालं अंचेमि वन्दामि पूजेमि णमंस्सामि दुक्खक्खओ
कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिण-
गुणसम्पत्ति होउ मज्झं ।

अथ पौर्वाह्निक देव वंदनायां चतुर्दशी क्रियायां चैत्य
भक्ति कायोत्सर्गं करोम्यहम् ।

(णमोकार मंत्र, चत्तारि दंडक, कायोत्सर्ग चतुर्विंशति
स्तव करके जयति भगवान् हेमाम्भोजेत्यादि चैत्य भक्ति
करे ।

अथ पौर्वाण्हिक देव वंदनायां चतुर्दशी क्रियायां पूर्वाचा-
र्यां ......श्रुतभक्ति कायोत्सर्ग करोम्यहं ।

(णमो अरहंताणमित्यादि उच्चार्य सामायिक दंडकं
विधाय कायोत्सर्गं कुर्यात् पुनः थोस्सामीति चतुर्विंशति
स्तवं पठेत् ।

श्रीश्रुतभक्तिः

स्तोष्ये संज्ञानि परोक्षप्रत्यक्षभेदभिन्नानि । लोकालो-
कविलोकनलोलितसल्लोचनानि सदा ॥ १ ॥ अभिमुखनिय
मितबोधनमाभिनिबोधिकमनिंद्रियेन्द्रियजम् । बह्वाद्यवग्र-
हादिककृतषट्त्रिंशत् त्रिशतभेदम् ॥ २ ॥ विविधर्द्धिबुद्धि-

कोष्ठस्फुटबीजपदानुसारिबुद्ध्यधिकं । संभिन्नश्रोतृतया सार्धं श्रुतभाजनं वन्दे ॥ ३ ॥ श्रुतमपि जिनवरविहितं गणधररचितं द्व्यनेकभेदस्थम् । अङ्गांगबाह्यभावितमनंतविषयं नमस्यामि ॥ ४ ॥ पर्यायाक्षरपदसंघातप्रतिपत्तिकानुयोगविधीन् । प्राभृतकप्राभृतकं प्राभृतकं वस्तुपूर्वं च ॥५॥ तेषां समासतोऽपि च विंशति भेदान्समश्नुवानं तत् । वन्दे द्वादशधोक्तं गंभीरवरशास्त्रपद्धत्या ॥ ६ ॥ आचारांग सूत्रकृतं स्थानं समवायनामधेयं च । व्याख्याप्रज्ञप्तिं च ज्ञातृकथोपासकाध्ययने ॥ ७ ॥ वंदेऽन्तकृद्दशमनुत्तरोपपादिकदशं दशावस्थम् । प्रश्नव्याकरणं हि विपाकसूत्रं च विनमामि ॥ ८ ॥ परिकर्म च सूत्रं च स्तौमि प्रथमानुयोगपूर्वगते । सार्द्धं चूलिकयापि च पंचविधं दृष्टिवादं च ॥९॥ पूर्वगतं तु चतुर्दशधोदितमुत्पादपूर्वमाद्यमहम् । आग्रायणीयमीडे पुरुवीर्यानुप्रवादं च ॥ १० ॥ संततमहमभिवंदे तथास्तिनास्तिप्रवादपूर्वं च । ज्ञानप्रवादसत्यप्रवादमात्मप्रवादं च ॥११ ॥ कर्मप्रवादमीडेऽथ प्रत्याख्याननामधेयं च । दशमं विद्याधारं पृथुविद्यानुप्रवादं ॥ १२ ॥ कल्याणनामधेयं प्राणावायं क्रियाविशालं च । अथ लोकबिंदुसारं वंदे लोकाग्रसारपदं ॥ १३ ॥ दश चतुर्दश चाष्टा वष्टादशद्वयोर्द्विषट्कं च । षोडशविंशतिं च त्रिंशतमपि पंच दश च तथा ॥ १४ ॥ वस्तूनि दश दशान्यस्यनुपूर्वं भाषि-

तानि पूर्वाणाम् । प्रतिवस्तु प्राभृतकानि विंशतिं विंशतिं नौमि ।। १५ ।।

पूर्वांतं ह्यपरांतं ध्रुवमध्रुव च्यवन लब्धि नामानि ।
अध्रुव संप्रणिधिचाप्यर्थं भौमावयाद्यं च ।।१६।।
सर्वार्थकल्पनीयं ज्ञानमतीतं त्वनागतं कालं ।
सिद्धिमुपाध्यंच तथा चतुर्दशवस्तूनि द्वितीयस्य ।।१७।।
पंचम वस्तु चतुर्थ प्राभृत कस्यानुयोग नामानि ।
कृति वेदने तथै व स्पर्शन कर्म प्रकृति मेव । १८
बंधननिबंधन प्रक्रमानुप क्रममथाभ्युदयमोक्षौ
संक्रम लेश्ये च तथा लेश्यायाः कर्म परिणामौ १६
सातमसातं दीर्घं ह्रस्वं भवधारणीय संज्ञं च
पुरु पुद्गलात्म नाम च निधत्तम निधत्तम भिनौमि २०
सनिकाचित मनिकाचित मथकर्म स्थितिक पश्चिम स्कंधौ
अल्पबहुत्वं च यजे तद्वाराणां चतुर्विंशम् २१
कोटीनां द्वादशशत मष्टा पंचाशतं सहस्राणां
लक्षत्र्यशीतिमेव च पंच च वंदे श्रुत पदानि २२
षोडशशतं चतुस्त्रिंशत्कोटीनां त्र्यशीति लक्षाणि
शत संख्याष्टा सप्ततिमष्टा शीतिंच पद वर्णान् २३
सामायिक चतुर्विंशति स्तवं वंदना प्रतिक्रमणम्
वैनयिकं कृति कर्म च पृथुदशवै कालिकंच तथा २४

वरमुत्तराध्ययनमपि कल्प व्यवहार मेवमभिवंदे
कल्पाकल्पं स्तौमि महा कल्पं पुण्डरीकं च २५
पारंपाद्या प्रणिपतितोस्म्यहं महा पुण्डरीकना मैव
निपुणान्य शीतिकंच प्रकीर्णकान्यंग बाह्यानि २६
पुद्गल मर्यादोक्तं प्रत्यक्षं सप्रभेदमवधिचं।
देशावधि परमावधि सर्वावधि भेदमभिवंदे २७
परमनसिस्थितमर्थं मनसा परिविद्य मन्त्र महितगुणम्
ऋजु विपुल मति विकल्पं स्तौमि मनः पर्यय ज्ञानम् २८
क्षायिकमनन्त भेदं त्रिकाल सर्वार्थ युगपदवभासं
सकल सुखधाम सततं वंदेहं केवल ज्ञानं २९
एवमभिष्टु वतोमे ज्ञानानि समस्त लोक चक्षूंषि
लघुभवताज्ज्ञानर्द्धि ज्ञानफलं सौख्यमच्यवनम् ३०
इच्छामि भंते। सुदभत्ति काओ सग्गो कओ तस्सा
लोचेउं अंगोवंग पइण्णए पाहुडय परियम्मसुत्त पढमाणि
आगे पुव्वगय चूलिया चवे सुत्तत्थय थुइ धम्म कहाइयं
णिच्चकालं अंचेमि पूजेमि वंदामि णमंस्सामि दुक्खक्खओ
कम्मक्खओ बोहिलाहो सुगइ गमणं समाहिमरणं जिणगुण
संपति होउ मज्झं

अथ पौर्वाह्णिक ... पंच गुरुभक्ति कायोत्सर्गं करो-
म्यहं।

(पूर्वोक्तं सामायिक दंडकं चतुर्विंशति स्तवं पंचगुरु भक्ति च कुर्यात्)

पंच गुरू भक्ति

श्रीमदमरेन्द्रमुकुट प्रघटित मणि किरण वारि धाराभिः
प्रक्षालितपद युगलान्प्रणमामि जिनेश्वरान् भक्त्या १
अष्ट गुणैः समुपेतान् प्रणष्ट दुष्टाष्ट कर्मरिपु समितीन्
सिद्धान्सनत मनंतांन्नमस्करोमीष्ट तुष्टि संसिद्ध्यै ।२।
साचारश्रुतजलधीन्प्रतीर्य शुद्धोरुचरणनिरतानाम् ।
आचार्याणां पदयुगकलानि दधे शिरसि मेऽहम् ।३।
मिथ्यावादिमदोग्रध्वान्तप्रध्वंसिवचनसंदर्भान् ।
उपदेशकान्प्रपद्ये मम दुरितारि प्रणाशाय । ४ ।
सम्यग्दर्शनदीपप्रकाशका मेयबोधसंभूताः ।
भूरिचरित्रपताकास्ते साधुगणास्तु मां पान्तु । ५ ।
जिन सिद्धसूरिदेशकसाधुवरानमलगुणगणोपेतान् ।
पंचनमस्कारपदैस्त्रिसंध्यमभिनौमि मोक्षलाभाय । ६ ।
एष पंचनमस्कारः सर्वपापप्रणाशनः ।
मङ्गलानां च सर्वेषां प्रथमं मंगलं भवेत् । ७ ।
अर्हत्सिद्धाचार्योपाध्यायाः सर्वसाधवः ।
कुर्वन्तु मंगलाः सर्वे निर्वाणपरमश्रियम् । ८ ।

सर्वान् जिनेन्द्रचन्द्रान्सिद्धानाचार्यपाठकान् साधून् ।
रत्नत्रयं च वंदे रत्नत्रयसिद्धये भक्त्या । ९ ।
पान्तु श्रीपादपद्मानि पञ्चानां परमेष्ठिनाम् ।
लालितानि सुराधीशचूडामणिमरीचिभिः । १० ।
प्रातिहार्यैर्जिनान् सिद्धान गुणैः सूरीन् स्वमातृभिः ।
पाठकान् विनयैः साधून् योगांगैरष्टभिः स्तुवे । ११ ।

अंचलिका

इच्छामि भंते । पंचमहा गुरुभत्ति काओ सग्गो कओ तस्स आलोचेउं अट्ठमहापाडिहेर संजुत्ताणं अरहंताणं अट्ठ गुणसंपण्णाणं उड्ढलोयमत्थयम्मि पइट्ठियाणं सिद्धाणं अट्ठपवयणमउ संजुत्ताणं आइरियाणं आयारादि सुदणाणो वदेसयाणं उवज्झायाणं तिरयण गुणपाल णरयाणं सव्वसाहूणं णिच्चकालं अंचेमि पूजेमि वंदामि णमंस्सामि दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुण संपत्ति होउमज्झं ।

अथ पौर्वाह्णिक ... शांतिभक्ति कायोत्सर्गं करोम्यहम्

(पूर्वोक्तं सामायिक दंडकं कायोत्सर्गं चतुर्विंशति स्तवं च कुर्यात्)

अथ शान्तिभक्ति

न स्नेहाच्छरणं प्रयान्ति भगवन्पादद्वयं ते प्रजाः ।
हेतुस्तत्र विचित्रदुःखनिचयः संसारघोरार्णवः ॥
अत्यन्तस्फुरदुग्ररश्मिनिकरव्याकीर्ण भूमंडलो ।
ग्रैष्मः कारयतीन्दुपादसलिलच्छायानुरागं रविः ॥१॥

क्रुद्धशीर्विषदष्टदुर्जयविषज्वालावलीविक्रमो ।
विद्याभेषजमन्त्रतोयहवनैर्याति प्रशांतिं यथा ॥
तद्वत्ते चरणारुणांबुजयुगस्तोत्रोन्मुखानां नृणाम् ।
विघ्नाः कायविनायकाश्च सहसा शाम्यन्त्यहो विस्मयः २

सन्तप्तोत्तमकांचनक्षितिधरश्रीस्पर्द्धिगौरद्युते ;
पुंसां त्वच्चरणप्रणामकरणात्पीडाः प्रयान्ति क्षयं ॥
उद्यद्भास्कारविस्फुरत्करशतव्याघातनिष्कासिताः ।
नानादेहिविलोचनद्युतिहरा शीघ्रं यथा शर्वरी ॥३॥

त्रैलोक्येश्वरभंगलब्धविजयादत्यंतरौद्रात्मकान् ।
नानाजन्मशतांतरेषु पुरतो जीवस्य संसारिणः ॥
को वा प्रस्खलतीह केन विधिना कालोग्रदावानलान् ।
स्याच्चेत्तव पादपद्मयुगलस्तुत्यापगावारणम् ।।४॥

लोकालोकनिरन्तरप्रविततज्ञानकमूर्ते विभो ।
नानारत्नपिनद्धदण्डरुचिरश्वेतातपत्रत्रयः ॥

त्वत्पादद्वयपूतगीतरवतः शीघ्रं द्रवन्त्यामयाः ।
दर्पाध्मातमृगेंद्रभीमनिनदाद्वन्या यथा कुंजराः ।।५।।
दिव्यस्त्रीनयनाभिरामविपुलश्रीमेरुचूडामणे ।
भास्वद्बालदिवाकरद्युतिहरप्राणीष्टभामण्डलं ।।
अव्याबाधमचिन्त्यसारमतुलं त्यक्तोपमं शाश्वतं ।
सौख्यं त्वच्चरणारविंदयुगलस्तुत्यैव संप्राप्यते ।।६।।
यावन्नोदयते प्रभापरिकरः श्रीभास्करो भासयं ।
स्तावद्धारयतीह पंकजवनं निद्रातिभारश्रमम् ।।
यावत्त्वच्चरणद्वयस्य भगवन्न स्यात्प्रसादोदयः ।
स्तावज्जीवनिकाय एष वहति प्रायेण पापं महत् ।।७।।
शांतिं शांतिजिनेन्द्रशांतमनसस्त्वत्पादपद्माश्रयात् ।
संप्राप्ताः पृथिवीतलेषु वहवः शान्त्यर्थिनः प्राणिनः ।।
कारुण्यान्मम भाक्तिकस्य च विभो दृष्टिं प्रसन्नां कुरु ।
त्वत्पादद्वयदैवतस्य गदतः शांत्यष्टकं भक्तितः ।।८।।
शांतिजिनं शशिनिर्मलवक्त्रं शीलगुणव्रतसंयमपात्रं ।
अष्टशतार्चितलक्षणगात्रं नौमि जिनोत्तममंबुजनेत्रम् ।।९।।
पंचममीप्सितचक्रधराणां पूजितमिन्द्रनरेन्द्रगणैश्च ।
शांति करं गणशांतिमभीप्सुः षोडशतीर्थंकरं प्रणमामि १०
दिव्यतरुसुरपुष्पसुवृष्टिर्दुन्दुभिरासनयोजनघोषौ ।।
आतपवारणचामरयुग्मे यस्य विभाति च मण्डलतेजः ११

तं जगदर्चितशान्तिजिनेंद्रशान्तिकरं शिरसा प्रणमामि ।
सर्वगणाय तु यच्छतु शान्ति मह्ममरं पठते परमां च ।१२।

येऽभ्यर्चिता मुकुटकुण्डलहाररत्नैः ।
शक्रादिभिः सुरगणैः स्तुतपादपद्माः ॥

ते मे जिनाः प्रवरवंशजगत्प्रदीपाः ।
तीर्थंकराः सततशांतिकरा भवन्तु ॥१३॥

संपूजकानां प्रतिपालकानां यतीन्द्रसामान्यतपोधनानाम् ।
देशस्य राष्ट्रस्य पुरस्य राज्ञः करोतु शांतिं भगवान् जिनेंद्रः

क्षेमं सर्वप्रजानां प्रभतु बलवान्धार्मिको भूमिपालः ।
काले काले च सम्यग्वर्षतु मघवा व्याधयो यान्तु नाशम् ॥

दुर्भिक्षं चौरमारिः क्षणमपि जगतां मास्म भूज्जीवलोके ।
जैनेन्द्रं धर्मचक्रं प्रभवतु सततं सर्वसौख्यप्रदायि ॥१५॥

सर्वस्वभावच्युतमप्रमाणं स्ववाग्विरुद्धं तव दृष्टितोऽन्यत्
न सर्वथा नित्यमुदेत्यपैति न च क्रिया कारकमत्र युक्तं ।
नैवासतो जन्म सतो न नाशो दीपस्तमःपुद्गलभावतोऽस्ति
विधिर्निषेधस्य कथंचिदिष्टौ विवक्षया मुख्यगुणव्यवस्था ।
इति प्रणीतिः सुमतेस्तवेयं मतिप्रवेकः स्तुवतोऽस्तु नाथ ५

इति सुमतिजिन स्तोत्रम् ।

पद्मप्रभः पद्मपलाशलेश्यः पद्मालयालिंगितचारुमूर्तिः ।
बभौ भवान्भव्यपयोरुहाणां पद्माकराणामिव पद्मबंधुः ॥१॥

बभार पद्मां च सरस्वतीं च भवान्पुरस्तात्प्रतिमुक्तिलक्ष्म्याः
सरस्वतीमेव समग्रशोभां सर्वज्ञलक्ष्मीं ज्वलितां विमुक्तः २

शरीररश्मिप्रसरः प्रभोस्ते बालार्करश्मिच्छविरालिलेप ।
नरामराकीर्णसभां प्रभावच्छैलस्य पद्माभमणेः स्वसानुम् ।
नभस्तलं पल्लवयन्निव त्वं सहस्रपत्राम्बुजगर्भचारैः ।
पादाम्बुजैः पातितमोहदर्पो भूमौ प्रजानां विजहर्थ भूत्यै ४
गुणाम्बुधेर्विप्रुषमप्यजस्रं नाखण्डलः स्तोतुमलं तवर्षेः ।
प्रागेव मादृक्किमुतातिभक्तिर्मां बालमालापयतीदमित्थं ५

इति पद्मप्रभजिनस्तोत्रम् ।

अथ वर्षायोगप्रतिष्ठापन क्रियायां चैत्यभक्ति कायोत्सर्गं करोम्यहं पूर्ववद् दंडकादि करके—"वर्षेषु वर्षान्तर" इत्यादि पढे ।

उत्तर दिक् चैत्य वंदना

यावंति जिनचैत्यानि विद्यन्ते भुवनत्रये ।
तावंति सततं भक्त्या त्रिःपरीत्य नमाम्यहं ।
स्वास्थ्यं यदात्यंतिकमेष पुंसां स्वार्थो न भोगः परिभंगु-
रात्मा ।
तृषोऽनुसंगान्न च तापशांतिरितीदमाख्यद् भगवान्
सुपार्श्वः ॥ १ ॥
अजंगमं जंगमनेययंत्रं यथा तथा जीवधृतं शरीरं ।
बीभत्सु पूति क्षयि तापकं च स्नेहो वृथात्रेति हितं त्वमाख्यः
अलंघ्यशक्तिर्भवितव्यतेयं हेतुद्वयाविष्कृतकार्यलिंगा ।
अनीश्वरो जंतुरहं क्रियार्त्तः संहत्य कार्येष्विति साध्व-
वादीः ॥ ३ ॥
बिभेति मृत्योर्न ततोऽस्ति मोक्षो नित्यं शिवं वांछति
नास्य लाभः ।
तथापि बालो भयकामवश्यो वृथा स्वयं तप्यत इत्यवादीः
सर्वस्य तत्त्वस्य भवान् प्रमाता मातेव बालस्य हिता-
नुशास्ता ।
गुणावलोकस्य जनस्य नेता मयापि भक्त्या परिणूयसेऽद्य

इति सुपार्श्व जिनस्तोत्रम् ।

चन्द्रप्रभं चन्द्रमरीचिगौरं चन्द्रं द्वितीयं जगतीव कांतं ।
वंदेऽभिवंद्यं महतामृषीन्द्रं जिनं जितस्वांतकषायबंधम् ॥

यस्यांग लक्ष्मी परिवेषभिन्नं तमस्तमोरेरिव रश्मि भिन्नं ।
ननाश बाह्यं बहु मानसं च ध्यान प्रदीपातिशयेन भिन्नं
स्वपक्ष सौस्थित्य मदावलिप्ता वाक्सिंह नादैर्विमदा-
बभूवुः ।
प्रवादिनो यस्यमदार्द्र गण्डा गजा यथा केशरिणो-
निनादैः ॥ ३॥
यः सर्व लोके परमेष्ठितायाः पदं बभूवाद्भुत कर्मतेजाः ।
अनंतधामाक्षर विश्वचक्षुः समन्त दुःख क्षयशासनश्च ॥४॥
सचन्द्रमा भव्य कुमुद्वतीनां विपन्न दोषाभ्रकलंक लेपः ।
व्याकोशवाङ् न्यायमयूख मालः पूयात्पवित्रो भगवा-
न्मनो मे ॥ ५ ॥

इति चन्द्रप्रभजिनस्तोत्रम्

अथ वर्षा योग प्रतिष्ठापन क्रियायां चैत्यभक्ति कायो-
त्सर्गं करोम्यहं ।

पूर्ववद् डकादि करके "वर्षेषु वर्षान्तर" इत्यादि भक्ति
को पढ़ें ।

इति चतुर्दिग्वंदना

अथ वर्षा योग प्रतिष्ठापनक्रियायां ..... पंचगुरुभक्ति-
कायोत्सर्गं करोम्यहं ।

पूर्ववद् डकादिक करके——श्रीमदमरेन्द्रमुकुट इत्यादि पंच
महा गुरुभक्ति को पढ़ें ।

अथ वर्षा योग प्रतिष्ठापन क्रियायां शांतिभक्तिका-योत्सर्गं करोम्यहं।

पूर्ववद् इकादि करके—न स्नेहाच्छरणं प्रयांति इत्यादि-शांतिभक्ति पुनः सर्व दोष शुद्धयर्थं समाधिभक्ति करनी चाहिये।

इसी प्रकार वर्षायोगनिष्ठापन में भी अन्तर केवल इतना है कि "वर्षा योग प्रतिष्ठापन के स्थान पर वर्षा योगनिष्ठापन पाठ का उच्चारण करें।

मासं वासोऽन्यदैकत्र योगक्षेत्रं शुचौ व्रजेत्।
मार्गेऽतीते त्यजे च्चार्थ वशादपि न लंघयेत् ॥६॥
नभश्चतुर्थीं तद्याने कृष्णां शुक्लोर्ज पंचमी।
यावन्न गच्छेत्तच्छेदे कथं चिच्छेदमाचरेत् ॥ ६६ ॥

अर्थ—चतुर्मास के अतिरिक्त मुनि गण किसी एक नग-रादि स्थानों में एक महीने तक ठहर सकते हैं। अषाढ़-के महीने में वह श्रमण संघ वर्षा योग को चलाजावे। और मगसिर का महीना बीतते ही उस वर्षा योग स्थान को छोड़ देवें। यदि अषाढ़ के महीने में वर्षा योग स्थान में न पहुंच सके तो कारणवश भी श्रावणवदी चतुर्थी का उलंघन न करें।

तथा कार्तिक शुक्ला पंचमी के पहले प्रयोजन वश भी उस स्थान को छोड़ कर स्थानांतर न करे यदि कदा

चित् दुर्निवार उपसर्ग आदि के कारण यथोक्त प्रयोग समय का उलंघन करे तो प्रायश्चित्त ग्रहण करे ।

तथा बारह योजन के अंतर्गत किसी साधुकी समाधि का प्रसंग हो तो जा भी सकते हैं ।

अथ वीरनिर्वाण क्रिया

योगान्तेऽर्कोदये सिद्ध निर्वाण गुरु शांतयः ।
प्रणुत्या वीर निर्वाणे कृत्यातो नित्यवंदना ॥७०॥

अर्थ—रात्रि के चतुर्थ प्रहरमें वर्षा योग निष्ठापन करके (रात्रि प्रतिक्रमण करके) सूर्योदय के समय सभी साधु मिलकर सिद्ध निर्वाण पंचगुरु-शांतिभक्ति पूर्वक निर्वाण क्रिया करे । नंतर साधु वर्ग तथा श्रावक जन भी "नित्य देव" वंदना करें ।

प्रयोगविधि:

अथ वीरनिर्वाण क्रियायां······सिद्धभक्ति कायोत्सर्गं करोम्यहं ।

णमो "अरहंताणं" इत्यादि दंडक कायोत्सर्ग व थोस्सामि स्तव पढे ।

सिद्धानुद्धूतकर्मप्रकृति इत्यादि सिद्धभक्ति को पढें ।

अथ वीर निर्वाण क्रियायां पूर्वाचार्यानुक्रमेण······ निर्वाणभक्तिकायोत्सर्गं करोम्यहं ।

पूर्ववत् दंडकादि करके—

वीर प्रभु की तीन प्रदक्षिणा करते हुये निर्वाणभक्ति पढ़ें।

निर्वाणभक्तिः

विबुधपतिखगपतिनरपतिधनदोरगभूतयक्षपतिमहितम्।
अतुलसुखविमलनिरुपमशिवमचलमनामयं हि संप्राप्तम्

कल्याणैः संस्तोष्ये पंचभिरनघं त्रिलोकपरमगुरुम्।
भव्यजनतुष्टिजननैर्दुरवापैः सन्मतिं भक्त्या ॥ २ ॥

आषाढसुसितषष्ठ्यां हस्तोत्तर मध्यमाश्रिते शशिनि।
आयातः स्वर्गसुखं भुक्त्वा पुष्पोत्तराधीशः ॥ ३ ॥

सिद्धार्थनृपतितनयो भारतवास्ये विदेह कुण्डपुरे।
देव्यां प्रियकारिण्यां सुस्वप्नान्संप्रदर्श्य विभुः ॥४॥

चैत्रसितपक्षफाल्गुनिशशांकयोगे दिने त्रयोदश्यां।
जज्ञे स्वोच्चस्थेषु ग्रहेषु सौम्येषु शुभलग्ने ॥५॥

हस्ताश्रिते शशांके चैत्र ज्योत्स्ने चतुर्दशी दिवसे।
पूर्वाण्हे रत्न घटै र्विबुधेन्द्राश्चक्रु रभिषेकम् ॥ ६ ॥

भुक्त्वा कुमारकाले त्रिंशद् वर्षाण्यनंतगुणराशिः।
अमरोपनीतभोगान्सहसाभिनिबोधितोऽन्येद्युः ॥ ७ ॥

नानाविधरूपचितां विचित्रकूटोच्छ्रितां मणिविभूषाम्।
चन्द्रप्रभाख्यशिबिकामारुह्य पुराद्विनिष्क्रान्तः ॥८॥

मार्गशिर कृष्ण दशमी हस्तोत्तर मध्यमाश्रिते सोमे ।
षष्ठेन त्वपराण्हे भक्तेन जिनःप्रवव्राज ॥ ९ ॥
ग्राम पुरखेट कर्वट मटंब घोषाकरा न्प्रविजहार ।
उग्रैस्तपोविधानैर्द्वादशवर्षाण्यमरपूज्यः ॥ १० ॥
ऋजुकूलायास्तीरे शाल द्रुम संश्रिते शिलापट्टे ।
अपराण्हे षष्ठेनास्थितस्य खलु जृंभिकाग्रामे ॥ ११ ॥
वैशाखसित दशम्यां हस्तोत्तरमध्यमाश्रिते चन्द्रे ।
क्षपकश्रेण्यारूढस्योत्पन्नं केवलज्ञान्नं ॥ १२ ॥
अथभगवान् संप्रापद्दिव्यं वैभार पर्वतं रम्यं ।
चातुर्वर्ण्यं सुसंघस्तत्राभूद्गौतम प्रभृति ॥ १३ ॥
छत्राशोकौ घोषं सिंहासनंन्दुन्दुभी कुसुमवृष्टिं ।
वरचामर भामंडल दिव्यान्यन्यानि चावापत् ॥ १४ ॥
दशविधमनगाराणामेकादशधोत्तरंतथा धर्मं ।
देशयमानो व्यवहरंस्त्रिंशद्वर्षाण्यथ जिनेन्द्रः ॥१५॥
पद्म वनदीर्घिकाकुल विविध द्रुमखण्ड मंडितेरम्ये ।
पावानगरोद्याने व्युत्सर्गेण स्थितः स मुनिः ॥१६॥
कार्तिककृष्णस्यान्ते स्वातावृक्षे निहत्य कर्मरजः ।
अवशेषं संप्रापद् व्यजरामर मक्षयं सौख्यं ॥ १७ ॥
परिनिर्वृत्तं जिनेन्द्रं ज्ञात्वाविबुधा ह्यथाशु चागम्य ।
देवतरु रक्त चन्दन कालागुरु सुरभि गोशीर्षैः ॥१८॥

अग्नीन्द्राज्जिनदेहं मुकुटानलसुरभिधूपवरमाल्यैः ।
अभ्यर्च्य गणधरानपि गता दिवं खं च वनभवने ॥१६॥

इत्येवं भगवति वर्धमानचन्द्रे यः स्तोत्रं पठति सुसंध्ययोर्द्वयोर्हि
सोऽनंतसुखं नृदेवलोके भुक्त्वांते शिवपदमक्षयं प्रयाति २०

यत्रार्हतां गणभृतां श्रुतपारगाणां
निर्वाणभूमिरिह भारतवर्षजानाम् ।
तामद्य शुद्धमनसा क्रियया वचोभिः
संस्तोतुमुद्यतमतिः परिणौमि भक्त्या ॥ २१ ॥

कैलाशशैलशिखरे परिनिर्वृतोऽसौ ।
शैल्येशि भावमुपपद्य वृषो महात्मा ।
चंपापुरे च वसुपूज्यसुतः सुधीमान् ।
सिद्धिं परामुपगतो गतरागबंधः ॥ २२ ॥

यत्प्रार्थ्यते शिवमयं विबुधेश्वराद्यैः ।
पाखंडिभिश्च परमार्थगवेषशीलैः ।
नष्टाष्टकर्मसमये यदरिष्टनेमिः ।
संप्राप्तवान् क्षितिधरे वृहदूर्जयंते ॥२३॥

पावापुरस्य वहिरुन्नतभूमिदेशे ।
पद्मोत्पलाकुलवतां सरसां हि मध्ये ।
श्रीवर्द्धमानजिनदेव इति प्रतीतो ।
निर्वाणमाप भगवान् प्रविधूतपाप्मा ॥२४॥

शेषास्तु ते जिनवरा जितमोहमल्ला
ज्ञानार्कभूरिकिरणैरवभास्य लोकान् ।
स्थानं परं निरवधारितसौख्यनिष्ठं
सम्मेदपर्वततले समवापुरीशाः ॥२५॥

आद्यश्चतुर्दशदिनैर्विनिवृत्तयोगः
षष्ठेन निष्ठितकृतिर्जिनवर्द्धमानः ।
शेषा विधूतघनकर्मनिबद्धपाशा
मासेन ते यतिवरास्त्वभवन्वियोगाः ॥ २६ ॥

माल्यानि वाक्स्तुतिमयैः कुसुमैः सुदृब्धा-
न्यादाय मानसकरैरभितः किरंतः ।
पर्येमि आदृतियुता भगवन् निषद्याः
संप्रार्थिता वयमिमे परमां गतिं ताः ॥ २७ ॥

शत्रुंजये नगवरे दमतारिपक्षाः
पंडोःसुताः परमनिर्वृतिमभ्युपेताः ।
तुंग्यां तु संगरहितो बलभद्रनामा
नद्यास्तटे जितरिपुश्च सुवर्णभद्रः ॥ २८ ॥

द्रोणीमति प्रबल कुंडल मेढ्के च
वैभार पर्वततले वरसिद्धकूटे ।
ऋष्यद्रिके च विपुलाद्रि बलाहके च
विंध्ये च पोदनपुरे वृषदीपके च ॥ २९ ॥

सह्याचले च हिमवत्यपि सुप्रतिष्ठे
दण्डात्मके गजपथे पृथुसारयष्टौ।
ये साधवो हतमलाः सुगतिं प्रयाताः
स्थानानि तानि जगति प्रथितान्यभूवन् ॥ ३० ॥
इक्षोर्विकाररसपृक्तगुणेन लोके
पिष्टोऽधिकां मधुरतामुपयाति यद्वत्।
तद्वच्च पुण्यपुरुषैरुषितानि नित्यं
स्थानानि तानि जगतामिह पावनानि ॥ ३१ ॥
इत्यर्हतां शमवतां च महामुनीनां
प्रोक्ता मयात्र परिनिर्वृतिभूमिदेशाः।
ते मे जिना जितभया मुनयश्च शांता
दिश्यासुराशु सुगतिं निरवद्यसौख्याम् ॥ ३२ ॥

अंचलिका

इच्छामि भंते ! परिणिव्वाणभत्तिकाओसग्गो कओ तस्सालोचेउं इमम्मि अवसप्पिणीए चउत्थ समयस्स पच्छिमे भाए आउट्ठमासहीणे वास चउक्कम्मि सेस कालम्मि पावाए णयरीए कत्तियमासस्स किण्हचउद्सिए रत्तीए सादीए णक्खत्ते पच्चूसे भयवदो महदिमहावीरो वड्ढमाणो सिद्धिं गदो तीसुवि लोएसु भवणवासिय वाणविंतर जोयसिय कप्पवासियत्ति चउव्विहा देवा सपरिवारा दिव्वेण गंधेण दिव्वेण पुप्फेण दिव्वेण

धूवेण दिव्वेण चुण्णेण दिव्वेण वासेण दिव्वेण ण्हाणेण णिच्चकालं अंचंति पुज्जंति वंदंति णमस्संति परिणिव्वाण महाकल्लाणपुज्जं करेंति, अहमवि इह संतो तत्थ संताइं णिच्चकालं अंचेमि पूजेमि वंदामि णमंस्सामि दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहि-मरणं जिणगुणसंपत्ति होउ मज्झं।

अथ वीर निर्वाण क्रियायां·········पंचगुरु भक्ति कायोत्सर्गं करोम्यहं।

पूर्ववद् दंडकादि करके "श्रीमदमरेन्द्र इत्यादि भक्ति" अथ वीरनिर्वाण क्रियायां शांतिभक्ति कायोत्सर्गं करोम्यहं। पूर्ववद् दंडकादि करके 'न स्नेहाच्छरणं इत्यादि शांतिभक्ति अथ वीरनिर्वाणक्रियायां सिद्ध-निर्वाण-पंचगुरु शांतिभक्तीः कृत्वा तद्धीनाधिकदोषशुद्ध्यर्थं समाधिभक्ति कायोत्सर्गं करोम्यहं।

पूर्ववद् दंडक कायोत्सर्गादि "शास्त्राभ्यासो जिन इत्यादि"

कल्याण पंचक क्रिया प्रयोगविधि

साधन्तसिद्ध शांतिस्तुति जिनगर्भ-जनुषोःस्तुयाद् वृत्तं।
निष्क्रमणे योग्यंतं विदि श्रुताद्यपि शिवे शिवान्तमपि ७१

अर्थ—जिनेन्द्र भगवानकी गर्भ जन्म कल्याणक क्रिया में सिद्ध चारित्र शांति भक्ति, तपः कल्याणक क्रियामें

सिद्ध चारित्र योगि शांतिभक्ति, केवलज्ञान कल्याणक क्रियामें सिद्ध श्रुत चारित्र योगि शांत भक्ति तथा निर्वाण क्षेत्रकी वंदनामें व निर्वाण कल्याण क्रियामें सिद्ध श्रुत चारित्र योगि निर्वाण शांतिभक्ति पूर्वक क्रिया करें।

जन्म कल्याण क्रिया विधि पूर्व में कहचुके हैं परन्तु यहां पांचों की विधिमें पुनः कह दिया है कि पांचों क्रियाओं का एक स्थान में ज्ञान सहज ही होवे।

प्रयोगविधि—अथ जिन गर्भकल्याणक क्रियायां तथा इसी प्रकार "जन्म कल्याणक क्रियायां" इत्यादि पांचों में समझलेना चाहिये। विशेष यही है कि निर्वाण भक्ति का पाठ करते हुये जिनेन्द्र भगवान की व निषद्यास्थान की तीन तीन प्रदक्षिणा देते जावें।

समाधि मरण के अनन्तर साधुके शरीर की व निषद्यास्थान की क्रिया

वपुषि ऋषेः स्तौतु ऋषीन् निषेधिकायां च सिद्धशांत्यन्तः सिद्धांतिनः श्रुतादीन् वृत्तादीनुत्तर व्रतिनः ॥ ७२ ॥

द्वियुजः श्रुतवृत्तादीन् गणिनोऽन्त गुरून् श्रुतादिकानपि तान् समयविदोऽपि यमादींस्तनु क्लेशो द्वयमुखानपि द्वियुजः ॥ ७३ ॥ युग्मम्।

अर्थ——सामान्य मुनिके मृतशरीर की और निषद्या भूमि की वंदनामें सिद्ध योगि शांतिभक्ति, २ उत्तर गुण धारी सामान्य मुनि की मृतशरीर वंदना व निषद्या क्रिया में सिद्ध चारित्र योगि शांति भक्ति, ३ सिद्धांतवेत्ता सामान्यमुनि की निषद्याभूमि व शरीर वंदनामें सिद्ध श्रुत योगि शांति भक्ति, ४ उत्तर व्रती और सिद्धान्तविद् भी हो उनमुनि की उपर्युक्त क्रियामें सिद्ध श्रुत चारित्र योगि शांति भक्ति, ५ आचार्य की निषद्या भूमि व मृतशरीर वंदना में सिद्ध योगि आचार्य शांति भक्ति, ६ अगर यह आचार्य कायक्लेशी हैं तो उपर्युक्त क्रियामें सिद्ध चारित्र योगि आचार्य शांति भक्ति, ७ यदि सिद्धांतविद् हों तो सिद्ध श्रुत योगि आचार्य शांतिभक्ति ८, तथा यदि सिद्धांत विद् व कायक्लेशी भी आचार्य होवें तो सिद्ध श्रुत चारित्र योगि आचार्य शांति भक्ति पूर्वक यथाविधि वंदना करें।

प्रयोग विधि

"अथ ऋषि शरीर वंदनायां पूर्वाचार्यानु" इत्यादि तथा निषद्या भूमि की वंदना में "ऋषि निषद्या वंदनायां" इत्यादि शब्दों का प्रयोग करना चाहिये।

चलाचल बिम्बप्रतिष्ठा व चतुर्थ स्थापनक्रिया प्रयोगविधी।

स्यात्सिद्धशांतिभक्ती स्थिरचलजिनबिम्बयोः प्रतिष्ठायाम्।
अभिषेक वंदना चलतुर्यस्नानेऽस्तु पाक्षिकी त्वपरे ॥७४॥

अर्थ—चलजिनविम्ब की और अचल जिन विम्ब की प्रतिष्ठा में सिद्ध भक्ति और शांति भक्ति होती है। तथा चल जिन विम्ब के चतुर्थदिवस के अवभृत स्नानमें अभिषेक वंदना अर्थात् सिद्ध चैत्य पंचगुरु शांति भक्ति व अचल जिनविम्ब के चतुर्थ स्नानमें सिद्ध चारित्र भक्ति वड़ी चारित्रालोचना और शांति भक्ति करना चाहिये। प्रयोग विधि में "चलजिनविम्बप्रतिष्ठा क्रियायां" इत्यादि।

आचार्यपदप्रतिष्ठापन क्रियाविधिः

सिद्धाचार्यस्तुती कृत्वा सुलग्ने गुर्वनुज्ञया।
लात्वाचार्यपदं शांतिं स्तुयात्साधुः स्फुरद्गुणः ॥७५॥

अर्थ—जिसके गुण संयमें स्फुरायमान हो रहें हैं ऐसा साधु शुभलग्नमें गुरु आज्ञा पूर्वक सिद्ध आचार्य भक्ति करके आचार्य पद को ग्रहण कर शांति भक्ति करे। प्रयोगविधि "पूर्ववद्" आचार्यपद प्रतिष्ठापन क्रियायामित्यादि भक्तिद्वयं पठित्वा अद्य प्रभृति भवता रहस्यशास्त्राध्ययनदीक्षादानादिक आचार्यकार्यमाचर्यमिति गणसमक्षं भाषमाणेन गुरुणा समर्प्यमाणं पिच्छिग्रहणलक्षणमाचार्यपदं गृण्हीयात्। पश्चाद् शांतिभक्तिं कुर्यात्।

प्रतिमायोगिमुनिक्रिया विधि

लघीयसोऽपि प्रतिमायोगिनः योगिनः क्रियाम्।
कुर्युः सर्वेऽपि सिद्धर्षिशांतिभक्तिभिरादरात् ॥ ८२ ॥

अर्थ—दीक्षामें अत्यन्त लघु भी प्रतिमायोग धारण करने वाले मुनि की सभी साधु मिलकर बड़े आदर से सिद्ध भक्ति योगि भक्ति व शांति भक्ति पूर्वक वंदना करें प्रयोग में प्रतिमायोगिमुनिवंदनायां इत्यादि।

दीक्षा ग्रहण क्रियाविधि

सिद्ध योगि बृहद्भक्ति पूर्वकं लिंगमर्प्यताम्।
लुञ्चाख्या नाग्न्य पिच्छात्म क्षम्यतां सिद्धभक्तितः ॥८३॥

अर्थ—बृहत्सिद्ध बृहद्योगि भक्ति पूर्वक लोचकरण नामकरण नग्नताप्रदान और पिच्छि प्रदान रूप लिंग अर्पण करें और सिद्धभक्ति पढ़कर क्रिया की समाप्ति करें। प्रयोगमें "दीक्षा दान क्रियायां" इत्यादि

दीक्षादानोत्तरं कर्तव्यं।

व्रतसमितीन्द्रियरोधाः पञ्च पृथक् क्षितिशयो रदाघर्षः।
स्थिति सकृदशने लुंचावश्यकषट्के विचेलताऽस्नानम् ८४
इत्यष्टाविंशति मूलगुणान् निक्षिप्य दीक्षिते।
संक्षेपेण सशीलान् गणी कुर्यात्प्रतिक्रमम् ॥ ८५ ॥

अर्थ—उस दीक्षित साधुमें पांच महाव्रत पंचसमिति पांच इन्द्रियरोध क्षितिशयन अदंतधावन स्थिति भोजन सकृद्भुक्ति लोच षडावश्यक, अचेलता और अस्नान इन अट्ठाइस मूलगुणोंको संक्षेप में चौरासी लाख गुण व

अठारह हजार शीलों के साथ साथ स्थापित करें। पुनः— आचार्य उसी दिन व्रतारोपण प्रतिक्रमण करे। यदि लग्न ठीक न हो तो कुछ दिनानंतर भी प्रतिक्रमण कर सकते हैं। पाक्षिक प्रतिक्रमणमें लक्षण में, बताया है कि- परे पुनर्व्रतारोपणादिविषयाश्चत्वारः प्रतिक्रमणाः स्युः किंविशिष्टाः ! बृहन्मध्यसूरिभक्तिद्वयोज्झिताः।

अर्थात् व्रतारोपणादि चार प्रतिक्रमणों में, बृहदाचार्य 'सिद्धगुणस्तुतिनिरता' से लेकर मध्याचार्यभक्ति 'देस कुल जाइसुद्धा' सहित छेदोवट्ठापणं होउ मज्झं पर्यंत दो भक्तियों को छोड कर शेष सब पाक्षिक प्रतिक्रमणविधि ही करे। अंतर केवल इतना ही है कि—प्रयोग विधि में—पाक्षिक प्रतिक्रमण क्रियायां के स्थान में व्रतारोपण प्रतिक्रमण क्रियायां इत्यादि का प्रयोग करें तथा वीरभक्ति में कायोत्सर्ग का भी १०८ प्रमाण उच्छ्वासों में ही ३६ जाप्य देवें।

तद्यथा-या व्रतारोपणी सार्वातीचारिक्यातिचारिकी।
औत्तमार्थी प्रतिक्रान्तिः सोच्छ्वासैराह्निकी समा॥
(अनगार)

अर्थ—व्रतारोपणी सार्वातिचारी आतिचारिकी औत्तमार्थी प्रतिक्रमणाओं में दैवसिक प्रमाण १०८ उच्छ्वासों में कायोत्सर्ग होता है।

विशेष—पाक्षिक प्रतिक्रमण प्रयोग विधि में मध्य मध्य में पक्खियम्मि आलोचेउं पक्खिओ चउमासिओ संवच्छरिओ आदि जो प्रयोग है वह मर्यादित काल की अपेक्षा से है परन्तु यहां पर पक्ष चारमास आदि कुछ दिन की मर्यादा न होकर चारों ही प्रतिक्रमण अपने सार्थक नाम से संबंधित हैं अतः जो प्रतिक्रमण हो उसके प्रयोग के मध्य मध्य में भी इन शब्दों के स्थानोंमें भी परिवर्तन कर देवें। अर्थात्—पक्खियम्मि आलोचेउं के स्थान······ पक्खिओ·········इत्यादि रूप से प्रयोग करना चाहिये।

महाव्रत दीक्षादानविधि में तत्पक्ष अथवा द्वितीयपक्ष में पाक्षिक प्रतिक्रमण पाठ करते हुए मध्य में "वदस-मिदि को बोलकर पुनः व्रतारोपण करें तभी सर्वसाधु-प्रतिवंदना करें" ऐसा जो विधान है वही व्रतारोपण प्रति-क्रमण है।

यद्यपि यहां पर स्पष्ट उल्लेख नहीं है कि उस में "व्रतारोपण प्रतिक्रमण क्रियायां" ऐसा प्रयोग करें पक्ष आदि की मर्यादा के दोषों की शुद्धि का हेतु न लेकर के मात्र व्रतारोपण का हेतु है अतएव ऐसा प्रयोग करना ही उचित मालूम पड़ता है विद्वानों को और भी विचार निर्णय कर लेना चाहिये।

दीक्षा के बाद अन्यकाल में लोच का विधान करते हैं।

लोचो द्वित्रिचतुर्मासैर्वरो मध्योऽधमः क्रमात्।
लघुप्राग्भक्तिभिः कार्यः सोपवासः प्रतिक्रमः ॥७६॥

अर्थ–दो महिने से उत्तम, तीन महिने से मध्यम व चार महिने से लोच करना जघन्य कहलाता है। उपवास और प्रतिक्रमण सहित लघु सिद्ध व लघु योगि भक्ति पूर्वक लोच करके पुनः लघु सिद्ध भक्ति पूर्वक निष्ठापन करना चाहिये। अर्थात्– जहां तक बने वहां तक चतुर्दशी प्रति क्रमण के दिन ही लोच करें यदि अन्य दिन में करें तो लुञ्च संबंधी प्रतिक्रमण को करना चाहिये। दैवसिक प्रतिक्रमण क्रिया ही लुञ्च प्रतिक्रमण में बताई है क्योंकि गोचार और लोच प्रतिक्रमण दैवसिक में ही गर्भित होते हैं एसा वचन है (अतः पृथक् रूप से लुञ्च प्रतिक्रमण करे ही ऐसे नियम की प्रतीति तो नहीं होती है)।

लोच प्रयोग विधि में–"लुञ्च प्रतिष्ठापन क्रियायां" इत्यादि रूप से दोनों भक्ति पढकर "स्वहस्तेन परहस्तेन वा लोचः कार्यः" लोच करके लघुसिद्ध भक्ति पूर्वक 'लुञ्च निष्ठापन क्रियायां' इति प्रयोग विधि से निष्ठापन करे।

बृहद्दीक्षाविधिः

पूर्वदिने भोजनसमये भाजनतिरस्कारविधिं विधाय आहारं गृहीत्वा चैत्यालये आगच्छेत् ततो बृहत्प्रत्याख्यान प्रतिष्ठापने सिद्ध, योगभक्ती पठित्वा गुरुपार्श्वे प्रत्याख्यानं सोपवासं गृहीत्वा आचार्य-शांति-समाधि भक्तीः पठित्वा गुरोः प्रणामं कुर्यात् ।

अर्थात्—दीक्षा के पहले दिन श्रावक पात्र का तिरस्कार कर अर्थात् पात्र रहित करपात्रमें आहार करके चैत्यालयमें आवे और गुरुके पासमें सिद्ध योगि भक्ति पढकर बृहत्प्रत्याख्यान का प्रतिष्ठापन करे अर्थात् 'अथ बृहत् प्रत्याख्यानप्रतिष्ठापनक्रियायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजा वंदना स्तवसमेतं सिद्ध भक्ति कायोत्सर्गं करोम्यहं । इति प्रतिज्ञाप्य

णमो अरंहताणमित्यादि दंडक पढकर कायोत्सर्ग करें व थोस्सामि दंडक पढे । "पुनः सिद्धानुद्धूत" इत्यादि अथवा "तवसिद्धे णयसिद्धे" इत्यादि सिद्ध भक्ति पढे ।

अथ बृहत्प्रत्याख्यानतिष्ठापनायां योगिभक्ति कायोत्सर्गं करोम्यहं ।

णमो अरहंताणं इत्यादि दंडक पढ कायोत्सर्ग स्तव को करे ।

"जाति जरोरुरोग" अथवा "प्रावृट्काले" इत्यादि योगि भक्ति पढ़े। इन दोनों भक्तियों को करके गुरुके पास में उपवास सहित प्रत्याख्यान को ग्रहण करके आचार्य शांति समाधि भक्ति पढ़कर गुरुको नमस्कार करें। तथा—

नमोऽस्तु आचार्य वंदनायां······आचार्य भक्ति कायोत्सर्गं करोम्यहं पूर्ववद्‌दंडकादि करके आचार्य भक्ति पढ़े।

नंतर नमोऽस्तु आचार्यवंदनायां·········शांति भक्ति कायोत्सर्गं करोम्यहं।

पूर्ववद्‌दंडकादि करके 'न स्नेहाच्छरणं प्रयांति भगवन्' इत्यादि शांति भक्ति को पढ़े। नंतर

नमोऽस्तु आचार्य वंदनायां आचार्य शांति भक्ती कृत्वा तद्धीनाधिक दोषशुद्ध्यर्थं समाधि भक्ति कायोत्सर्गं करोम्यहं।

पूर्ववद्‌दंडकादि करके समाधि भक्ति को पढ़कर गुरु को नमस्कार करे। यह दीक्षाके एकदिन पूर्व की विधि है।

अथ दीक्षादाने दीक्षादातृजनः शांतिक-गणधर वलय पूजादिकं यथाशक्ति कारयेत्। अथ दाता तं स्नानादिकं कारयित्वा यथायोग्यालंकारयुक्तं महामहोत्सवेन चैत्या-

लये समानयेत् । स देव शास्त्र गुरु पूजां विधाय वैराग्य भावनापरः सर्वैः सह क्षमां कृत्वा गुरोरग्रे तिष्ठेत् ।

ततो गुरोरग्रे संघस्याग्रे च दीक्षायै याञ्चां कृत्वा तदाज्ञया सौभाग्यवतीस्त्रीविहितस्वस्तिकस्योपरि श्वेत-वस्त्रं प्रच्छाद्य तत्र पूर्वदिशाभिमुखः पर्यंकासनं कृत्वा आसते, गुरुश्चोत्तराभिमुखो भूत्वा संघाष्टकं संघं च परिपृच्छय लोचं कुर्यात् । अथ तद्विधिः—बृहद्दीक्षायां लोचस्वीकारक्रियायां पूर्वाचार्यानुक्रमेण···········
सिद्धभक्ति कायोत्सर्गं करोम्यहं ।

णमो अरहंताणं इत्यादि दंडक कायोत्सर्ग व थोस्सा-मि करके सिद्ध भक्ति का पाठ करें ।

बृहद्दीक्षायां लोचस्वीकारक्रियायां·····योगिभक्ति कायोत्सर्गं करोम्यहं—

पूर्ववद्दंडकादि करके-योगिभक्ति का पाठकरे । नंतर-

ॐ नमोऽर्हते भगवते प्रक्षीणाशेषदोषकल्मषाय दिव्य-तेजोमूर्त्तये नमः श्रीशांतिनाथाय शान्तिकराय सर्वपाप प्रणाशनाय सर्वविघ्नविनाशनाय सर्वरोगापमृत्यु विना-शनाय सर्वपरकृतक्षुद्रोपद्रवविनाशनाय सर्व क्षाम डामर विनाशनाय ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा (अमुकस्य) सर्व शान्तिं कुरु कुरु स्वाहा ।

इस मंत्र से गंधोदकादि को ३ वार मंत्रित कर मस्तक पर क्षेपण करे। और तीन वार गंधोदक सिंचन कर बायें हाथ से मस्तक का स्पर्श करे पुनः दधि अक्षत गोमय दूर्वांकुरों को मस्तक पर "वर्धमान मंत्र" पढकर क्षेपण करे-

ॐ भयवदो वड्ढमाणस्स रिसहस्स चक्कं जलंतं गच्छइ आयासं पायालं लोयाणं भूयाणं जये वा विवादे वा थंभणे वा रणांगणे वा रायंगणे वा मोहणे वा सव्वजीव सत्ताणं अपराजिदो भवदु रक्ख रक्ख स्वाहा। वर्धमान मंत्रः। ततः पवित्र भस्म पात्रं गृहीत्वा-

ॐ णमो अरहंताणं रत्नत्रयपवित्रीकृतोत्तमांगाय ज्योतिर्मयाय मतिश्रुतावधिमनःपर्ययकेवलज्ञानाय असि-आउसा स्वाहा। इसमंत्र को पढकर मस्तक पर कपूर मिश्रित भस्मको डालकर "ॐ ह्रीं श्रीं क्लीं ऐं अर्हं अ सि आ उ सा स्वाहा इस मंत्र को बोलकर प्रथम केशोत्पाटन करके पश्चात्-

ॐ ह्रां अर्हद्भ्यो नमः ॐ ह्रीं सिद्धेभ्यो नमः ॐ ह्रूं सूरिभ्यो नमः ॐ ह्रौं पाठकेभ्यो नमः ॐ ह्रः सर्वसाधुभ्यो नमः इन पांचों मंत्रों का उच्चारण करते हुये गुरु अपने हाथ से पांचवार केशों को उपाडें। पश्चात् अन्य कोई भी लोच कर सकते हैं लोचके पूर्ण होने पर 'बृहद्दीक्षायां लोच-

निष्ठापनक्रियायां पूर्वाचार्या·····सिद्ध भक्ति कायोत्सर्गं करोम्यहं।

पूर्ववद्दंडकादि करके सिद्ध भक्तिका पाठ करे। नंतर मस्तक प्रक्षालनकर शिष्य गुरुभक्तिपूर्वक आचार्य को नमस्कार करके वस्त्राभरण यज्ञोपवीतादि को त्यागकर के वहीं स्थित होकर दीक्षा की याचना करें। नंतर गुरु मस्तक पर श्री कार "श्रीं" लिखकर ॐ ह्रीं अर्हं अ सि आ उ सा ह्रीं स्वाहा इस मंत्र को १०८ वार जाप्य देवें। पश्चात् गुरु उसकी अंजलि में केशर कपूर श्रीखंडसे "श्री" वर्ण लिखे और श्रीकार के चारो ही तरफ

रयणत्तयं च वंदे चउवीसजिणं तहा वंदे।
पंचगुरूणं वंदे चारण जुगलं तहा वंदे ॥२४॥

इस श्लोक को पढते हुये श्री वर्ण के पूर्व में ३ दक्षिण में २४ पश्चिम में ५ उत्तर में ४ इस तरह अंकों को लिखे। पुनः "सम्यग्दर्शनाय नमः सम्यग्ज्ञानाय नमः, सम्यक्चारित्राय नमः" इस मंत्र को पढते हुये तंदुलोंसे अंजलि को भर-देवे और ऊपर नारियल और सुपारी को रखकर सिद्ध चारित्र योगि भक्ति को पढकर व्रतादि प्रदान करे। तथा

बृहद्दीक्षायां व्रतादानक्रियायां पूर्वाचार्यानुक्रमेण··सिद्ध भक्ति कायोत्सर्गं करोम्यहं।

दंडकादि करके-सिद्ध भक्ति पढ़े।

बृहद्दीक्षायां व्रतादानक्रियायां.........चारित्रभक्ति कायोत्सर्गं करोम्यहं।

दंडकादि करके चारित्र भक्ति पढ़े।

बृहद्दीक्षायां व्रतादानक्रियायां.........योगिभक्ति कायोत्सर्गं करोम्यहं। दंडकादि करके-योगि भक्ति को पढ़ें।

पुनः—वदसमिदिंदियरोधो लोचो आवासयमचेलमण्हाणं खिदिसयणमदंतवणं ठिदिभोयणमेयभत्तं च॥

इस श्लोक को पढ़कर अट्ठाईस मूलगुणों का संक्षिप्त लक्षण समझाकर पंच महाव्रत पंचसमिति पंचेन्द्रिय-रोध लोच षडावश्यकक्रियादयोऽष्टाविंशतिमूलगुणाः उत्तमक्षमामार्दवार्जवसत्यशौचसंयमतपस्त्यागाकिंचन्यब्रह्मचर्याणि दशलाक्षणिको धर्मः अष्टादश शीलसहस्राणि चतुरशीतिलक्ष गुणाः त्रयोदशविधं चारित्रं द्वादशविधं तपश्चेति अर्हत्सिद्धाचार्योपाध्याय सर्वसाधु साक्षिकं सम्यक्त्वपूर्वकं दृढव्रतं सुव्रतं समारूढं ते भवतु। इस पाठका तीनबार उच्चारण करके व्रतों को देवे। नंतर

शांति भक्ति का पाठ करे (यहां पर किस हेतुक शांति भक्ति है वह स्पष्ट नहीं हुआ)

बृहद्दीक्षायां.....परमशांत्यर्थं शांति भक्ति कायोत्सर्गं करोम्यहं ।

"दण्डक कायोत्सर्ग, थोस्मामि स्तव करे-शांति भक्ति का पाठ करे ।

पश्चात्—आशीः श्लोक को पढ़कर अंजलिके चावलों को दाता को दिला देवे ।

आशीः श्लोकः—

श्रीशांतिरस्तु शिवमस्तु जयोऽस्तु नित्य-
मारोग्यमस्तु तव पुष्टिसमृद्धिरस्तु ॥
कल्याणमस्त्वभिमतस्तव वृद्धि रस्तु
दीर्घायुरस्तु कुलगोत्रधनं सदास्तु ॥

अथ षोडश संस्कारारोपणं

(१) अयं सम्यग्दर्शन संस्कार इह मुनौ स्फुरतु ।
(२) अयं सम्यग्ज्ञान संस्कार इह मुनौ स्फुरतु ॥
(३) अयं सम्यक् चारित्र संस्कार इह मुनौ स्फुरतु
(४) अयं बाह्याभ्यंतर तपः संस्कार इह मुनौ स्फुरतु
(५) अयं चतुरंग वीर्य संस्कार इह मुनौ स्फुरतु ।
(६) अयं अष्ट मातृ मण्डल संस्कार इह मुनौ स्फुरतु
(७) अयं शुद्ध्यष्टकावष्टम्भ संस्कार इह मुनौ स्फुरतु
(८) अयं अशेष परीषहजय संस्कार इह मुनौ स्फुरतु

(९) अयं त्रियोगासंगमनिवृत्तिशीलतासंस्कार इह मुनौ स्फुरतु ।

(१०) अयं त्रिकरणासंयमनिवृत्तिसंस्कार इह मुनौ स्फुरतु ।

(११) अयं दशासंयमनिवृत्तिशीलता संस्कार इह मुनौ स्फुरतु ।

(१२) अयं चतुः संज्ञा निग्रह शीलता संस्कार इह मुनौ स्फुरतु ।

(१३) अयं पंचेन्द्रियजयशीलतासंस्कार इह मुनौ स्फुरतु ।

(१४) अयं दशधर्मधारणशीलतासंस्कार इह मुनौ स्फुरतु ।

(१५) अयं अष्टादशसहस्रशीलता संस्कार इह मुनौ स्फुरतु ।

(१६) अयं चतुरशीतिलक्षणसंस्कार इह मुनौ स्फुरतु

इन एक एक मंत्रों का उच्चारण क्रमसे कर मस्तक पर लवंग पुष्प क्षेपण करे । पुनः—

णमो अरहंताणं णमो सिद्धाणं णमो आइरियाणं णमो उवज्झायाणं णमो लोए सव्वसाहूणं ॥

ॐ परम हंसाय परमेष्ठिने हं स हं स हं हां ह्रूं ह्रौं ह्रीं ह्रें ह्रः जिनाय नमः जिनं स्थापयामि संवौषट् ॥

इस मंत्र को पढ़ कर पुनः पुष्पादि मस्तक पर क्षेपण करे।

नंतर गुर्वावली पढ़कर अमुकके अमुक नामा तुम-शिष्य हो। ऐसा कह कर

"अथाद्ये जंबू द्वीपे भरत क्षेत्रे आर्य खण्डे……… देशे……ग्रामे श्रीवीर निर्वाण संवत्सरे २४……मासो-त्तममासे……पक्षे……तिथौ……वासरे मूल संघस्थ नंदी संघे सरस्वती गच्छे बलात्कारगणे श्री कुंद कुंदाचार्य परंपरायां आचार्यवर्य श्रीशांतिसागरस्तत्शिष्य आचार्य श्री वीरसागरस्तत्शिष्य आचार्य श्रीशिवसागरोऽहं मे अमुकनामधेयस्त्वं शिष्योऽसि" उपकरणादि प्रदान करे।

ॐ णमो अरहंताणं भो अंतेवासिन्! षड्जीवनिकाय रक्षणाय मार्दवादि गुणोपेतमिदं पिच्छिकोपकरणं गृहाण गृहाण।

यह बोलकर पिच्छी प्रदान करे। शिष्य दोनों हाथों से लेवे।

ॐ णमो अरहंताणं मतिश्रुतावधिमनःपर्ययकेवल ज्ञानाय द्वादशांगश्रुताय नमः। भो अंतेवासिन्! इदं ज्ञानोपकरणं गृहाण गृहाण, शास्त्र देवे! शिष्य दोनों हाथों में लेकर मस्तक पर चढ़ावे।

ॐ णमो अरहंताणं रत्नत्रयपवित्रीकरणांगाय बा-

बाह्याभ्यंतरमलशुद्धाय नमः। भो अंतेवासिन्! इदं शौचोपकरणं गृहाण गृहाण।

गुरु बायें हाथ से उठाकर कमंडलु देवे। (शिष्य भी बायें हाथ से लेवे)

अनंतर समाधि भक्ति करें।

अथ बृहद्दीक्षाक्रियानिष्ठापनायां सिद्धभक्त्यादिकं कृत्वा हीनाधिकदोषशुद्ध्यर्थं समाधि भक्ति कायोत्सर्गं करोम्यहं।

दंडकादि करके—समाधि भक्ति का पाठ करे।

अनंतर नव दीक्षित मुनि गुरु भक्ति पूर्वक गुरुको नमस्कार करके अन्य मुनियों को भी नमस्कार करके बैठे। यावत् व्रतारोपण न होवे तावत्पर्यंत अन्य मुनिजन प्रतिवंदना न करें और दाता आदि प्रमुख जन उत्तम फलों को सन्मुख रख कर नमोऽस्तु कहकर नमस्कार करें।

पश्चात्—उसी पक्ष में अथवा द्वितीय पक्ष में शुभ मुहूर्त में व्रतारोपण करे। तब रत्नत्रय पूजा कराके पाक्षिक प्रतिक्रमण पाठ पढ़ना चाहिये और पाक्षिक नियम ग्रहण समय के पूर्व ही जब वदसमिदिंदिय इत्यादि पाठ पढा जाता है तब पूर्व के समान ही व्रतादि देवे। अर्थात् जहां वदसमिदिंदिय इत्यादि पढकर प्रायश्चित्त देने का विधान है वहीं पर वदसमिदिंदिय आदि को तीन बार बोलकर

व्रतादि देवे जैसे पूर्व में इस श्लोक को पढ़कर मूलगुणों का वर्णन करनेके नंतर पंचमहाव्रतपंचसमिती इत्यादि को तीन वार पढ़ व्रत प्रदान किये थे तद्वत् इस समय भी करे। और नियम ग्रहण के समय पर ही यथायोग्य कोई पल्य विधानादि एकतप (व्रत) भी देवे। तथा दाता प्रमुख श्रावक आदि को भी कोई न कोई एक एक तप (व्रत) देवे, तत्पश्चात् सभी मुनिगण प्रतिवंदना करें।

अथ मुख शुद्धि मुक्त करण विधिः—

त्रयोदश पांच अथवा तीन कटोरियों में लवंग इलायची—सुपाड़ी—आदि को डालकर वह कटोरियां गुरु के सामने स्थापित करें। और अथ मुखशुद्धिमुक्तकरण पाठ क्रियायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भाव-पूजावंदनास्तवसमेतं सिद्धभक्ति कायोत्सर्गं करोम्यहं।

णमो अरहंताणं इत्यादि दंडक कायोत्सर्ग थोस्सामि स्तव पढे सिद्धा नुद्धत आदि सिद्ध भक्ति का पाठ करे।

अथ मुखशुद्धिमुक्तकरणपाठक्रियायां······योगिभक्ति कायोत्सर्गं करोम्यहं।

पूर्ववद्दंडकादि करके—योगि भक्ति पढे।

अथ मुख······आचार्य भक्ति कायोत्सर्गं करोम्यहं।

(दंडकादि करके—आचार्य भक्ति पढे)

अथ मुख शुद्धि··शांतिभक्ति कायोत्सर्गं करोम्यहं।

(दंडकादि करके—शांति भक्ति पढे) ।

अथ मुख शुद्धि मुक्त करण पाठ क्रियायां पूर्वा... सिद्ध-योगि-आचार्य—शांति भक्तीः कृत्वा तद्धीनाधिक दोष शुद्ध्यर्थं समाधिभक्ति कायोत्सर्गं करोम्यहं ।

(दंडकादि करके—समाधि भक्ति पढे)

पश्चात् मुख शुद्धि ग्रहण करे ।

अर्थात् इससे एसा समझ में आता है कि श्रावक जब तक दीक्षित नही होता आचमन स्नानादिक से शुद्धि करता रहता है । दीक्षा के अनंतर आचमनादि से होने वाली शुद्धि को ही छोड़ते हुये (मुक्त करण) ऐसी विधि करता है पुनः उसे मुख शुद्धि (आचमन मंत्रादि के द्वारा व जलादि के द्वारा) करने की आवश्यकता नहीं रहती है ।

इति महाव्रतदीक्षाविधिः

विशेष—यद्यपि सभी भक्तियों में यहां पर कृत्यविज्ञापना का उल्लेख स्पष्ट नही है तो भी लोच के स्थान में देने से व भक्ति पाठ के पूर्व तत्तज्जन्य विषय विज्ञापना की आज्ञा है अतः सभी में ही कृत्य विज्ञापन प्रयोग दिखाया है ।

क्षुल्लक दीक्षा विधिः

अथ लघुदीक्षायां सिद्ध—योगि-शांति—समाधिभक्तीः

पठेत्। ओं ह्रीं श्रीं क्लीं ऐं अर्हं नमः अनेन मंत्रेण जाप्यं वार २१ अथवा १०८ दीयते।

अन्यच्च विस्तरेण लघुदीक्षाविधिः

अथ लघुनेतृजनः पुरुषः स्त्री वा दाता संस्थापयति। यथायोग्यमलंकृतं कृत्वा चैत्यालये समानयेत्, देवं वन्दित्वा सर्वैः सह क्षमां कृत्वा गुरोरग्रे च दीक्षां याचयित्वा तदाज्ञया सौभाग्यवतीस्त्रीविहितस्वस्तिकोपरि श्वेतवस्त्रं प्रच्छाद्य तत्र पूर्वाभिमुखः पर्यंकासनो गुरुश्चोत्तराभिमुखः संघाष्टकं संघं च परिपृच्छ्य लोचं ......ॐ नमोऽर्हते भगवते प्रक्षीणाशेषदोषकल्मषाय दिव्यतेजोमूर्तये शांतिनाथाय शांतिकराय सर्वविघ्नप्रणाशकाय सर्वरोगापमृत्युविनाशनाय सर्व परकृत क्षुद्रोपद्रव विनाशनाय सर्वक्षाम डामर विनाशनाय ओं ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा अमुकस्य सर्वशांतिं कुरु २ स्वाहा अनेन मन्त्रेण गंधोदकादिकं त्रिवारं शिरसि निक्षिपेत्। शांतिमंत्रेण गंधोदकं त्रिःपरिषिच्य वामहस्तेन स्पृशेत्। ततो दध्यक्षतगोमयतद्भस्म दूर्वांकुरान् मस्तके वर्धमानमंत्रेण निक्षिपेत्, ॐ णमो भयवदो वड्ढमाणस्सेत्यादि वर्धमानमंत्रः पूर्वं कथितः। लोचादिविधिं महाव्रतवत् विधाय सिद्धभक्तिं योगिभक्तिं पठित्वा व्रतं दद्यात्।

दंसणवयेत्यादि वारत्रयं पठित्वा व्याख्यां विधाय च गुर्वावलीं पठेत्। ततः संयमाद्युपकरणं दद्यात्।

अर्थात् लोचक्रियामें पूर्ववत् सिद्ध योगिभक्ति को पढ़कर, मस्तक पर मंत्र पूर्वक गंधोदकादि का सिंचन कर वर्धमान मन्त्र से दध्यक्षतादि [illegible] करे व पवित्रभस्मसे मन्त्र पूर्वक ५ बार लोंच करके लोचनिष्ठापन में सिद्धभक्ति करके क्रिया करें व शिष्य गुरुभक्तिपूर्वक गुरु वंदना कर वस्त्राभरणादि त्यागकर दीक्षा याचना करे पश्चाद् गुरु मस्तक पर श्रीकार लिखकर पूर्ववद् जाप्यादि करके अंजलि भरदेवे। नंतर सिद्धभक्ति योगिभक्ति पूर्वोक्त विधि से करके व्रतप्रदान करें अनंतर—

दंसण वय सामाइय पोसह सचित्तराइभत्ते य ;
बंभारंभपरिग्गहअणुमणमुद्दिठ्ठ देसविरदे दे ॥

अरहंतसिद्धआइरियउवज्झायसव्वसाहु सक्खियं सम्मत्त पुव्वगं सुव्वदं दढव्वदं समारोहियं ते भवदु।

श्लोक मात्र को एक बार पढ़कर संक्षिप्त रूप लक्षण समझाकर पुनः "दंसण इत्यादि से ते भवदु" पर्यंत ३ बार पढ़कर व्रत प्रदान करें। नंतर गुर्वावलीको पढ़कर अमुकके तुम अमुक नामा शिष्य हो ऐसा कहकर मन्त्र पूर्वक उपकरण प्रदानकरें। विशेष—महाव्रत दीक्षामें व्रत देनेके बादमें शांति भक्ति का भी विधान है परन्तु यहां पर उल्लेख नहीं है।

ओं णमो अरहंताणं भो क्षुल्लक! (आर्य—ऐलक) क्षुल्लिके वा षट्जीवनिकायरक्षणाय मार्दवादिगुणोपेतमिदं पिच्छोपकरणं गृहाण इत्यादि पूर्ववत्कमंडलु ज्ञानो-

पकरणादिकं च मन्त्रं पठित्वा दद्यात् । अन्तर केवल 'हे' में ह अर्थात् क्षुल्लक, ऐलक, अथवा क्षुल्लिके, जो हो उसका सम्बोधन कर पूर्व के मंत्रों को ही बोलकर शास्त्र, कमंडलु प्रदान करें ।

इति लघुदीक्षाविधानं समाप्तम्

अथोपाध्यायपददानविधिः

सुमूहूर्ते दाता गणधरवलयार्चनं द्वादशांगश्रुतार्चनं च कारयेत् । ततः श्रीखण्डादिना छटान् दत्वा तन्दुलैः स्वस्तिकं कृत्वा तदुपरि पट्टकं संस्थाप्य तत्र पूर्वाभिमुखं तमुपाध्यायपदयोग्यं मुनिमासयेत् । अथोपाध्यायपदस्थापनक्रियायां पूर्वाचार्यानुक्रमेइत्याद्युच्चार्य सिद्ध-श्रुतभक्ती पठेत् । तत आह्वाननादिमंत्रानुच्चार्य शिरसि लवंगपुष्पाक्षतं क्षिपेत तद्यथा—ओं ह्रौं णमो उवज्झायाणं उपाध्यायपरमेष्ठिन् ! अत्र एहि एहि संवौषट् आह्वाननं स्थापनं सन्निधिकरणं ततश्च ओं ह्रौं णमो उवज्झायाणं उपाध्यायपरमेष्ठिने नमः इमं मंत्रं सहेतुना चन्दनेन शिरसि न्यसेत् । ततश्च शान्तिसमाधिभक्ती पठेत् । ततः स उपाध्यायो गुरुभक्तिं दत्वा प्रणम्य दात्रे आशिषं दद्यादिति ।

इत्युपाध्यायपदस्थापनविधिः ।

अथाचार्यपदस्थापनविधिः

सुमुहूर्ते दाता शांतिकं गणधरवलयार्चनं च यथा—

शक्ति कारयेत्। ततः श्रीखंडादिना छटादिकं कृत्वा आचार्यपदयोग्यं मुनिमामयेत्। अथ आचार्यपदप्रतिष्ठापन क्रियायां इत्याद्युच्चार्य सिद्धाचार्यभक्ती पठेत्'। ओं हं परमसुरभिद्रव्यसन्दर्भपरिमलगर्भतीर्थाम्बुसम्पूर्णसुवर्णकलशपंचकतोयेन परिषेचयामीति स्वाहा इति पठित्वा कलशपंचकतोयेन पादोपरि सेचयेत् ततः पंडिताचार्यो "निर्वेदसौष्ठव इत्यादिमहर्षिस्तवनं पठन् पादौ समंतात्परामृश्य गुणारोपणं कुर्यात्"। ततः 'ॐ हं णमो आइरियाणं आचार्य परमेष्ठिन्! अत्र एहि एहि संवौषट्' आह्वाननं, स्थापनं सन्निधीकरणं च, ततश्च ओं हं णमो आइरियाणं धर्माचार्याधिपतये नमः अनेन मंत्रेण सहेन्दुना चन्दनेन पादयोर्द्वयोस्तिलकं दद्यात्। ततः शान्तिसमाधिभक्ती कृत्वा गुरुभक्त्या गुरुं प्रणम्योपविशति ततः उपासकास्तस्य पादयोरष्टतयीमिष्टिं कुर्वन्ति। यतयश्च गुरुभक्तिं दत्वा प्रणमन्ति। स उपासकेभ्य आशीर्वादं दद्यात्।

इत्याचार्यपददानविधिः

ॐ ह्रां ह्रीं श्रीं अर्हं हं सः आचार्याय नमः आचार्याह्वानमंत्रः अन्यच्च—

ॐ ह्रीं श्रीं अर्हं हं सः आचार्याय नमः आचार्यमंत्रः।

दीक्षा-नक्षत्राणि

प्रणम्य शिरसा वीरं जिनेन्द्रममलव्रतम्

दीक्षा ऋक्षाणि वक्ष्यन्ते सतां शुभफलाप्तये ।१।
भरण्युत्तरफाल्गुन्यौ मघाचित्राविशाखिकाः ।
पूर्वाभाद्रपदा भानि रेवती मुनि-दीक्षणे । २ ।
रोहिणी चोत्तराषाढा उत्तराभाद्रपत्तथा ।
स्वातिः कृत्तिकया सार्धं वर्ज्यंते मुनिदीक्षणे ।३।
अश्विनी-पूर्वाफाल्गुन्यौ हस्तस्वात्यनुराधिकाः ।
मूलं तथोत्तराषाढा श्रवणः शतभिषक्तथा । ४ ।
उत्तराभाद्रपच्चापि दशेति विशदाशयाः
आर्यिकाणां व्रते योग्यान्युषन्ति शुभहेतवः । ५ ।
भरण्यां कृत्तिकायां च पुष्ये श्लेषार्द्रयोस्तथा ।
पुनर्वसौ च नो दद्युरार्यिकाव्रतमुत्तमाः ।६।
पूर्वाभाद्रपदा मूलं धनिष्ठा च विशाखिका ।
श्रवणश्चैषु दीक्ष्यन्ते क्षुल्लकाः शल्यवर्जिताः ।७।

इति दीक्षानक्षत्रपटलं ।
इति नैमित्तिक क्रिया प्रयोग विधिः

सिद्ध भक्ति (प्राकृत)

अट्ठविहकम्ममुक्के अट्ठगुणड्ढे अणोवमे सिद्धे ।
अट्ठमपुढविणिविट्ठे णिट्ठियकज्जे य वंदिमो णिच्चं ॥१॥
तित्थयरेदरसिद्धे जल थल आयासणिव्वुदे सिद्धे ।
अंतयडेदरसिद्धे उक्कस्सजहण्णमज्झिमोगाहे ॥२॥

उड्ढमहतिरियलोए छव्विहकाले य णिव्वुदे सिद्धे ।
उवसग्गणिरुवसग्गे दीवोदहिणिव्वुदे य वंदामि ॥३॥
पच्छायडे य सिद्धे दुगतिगचदुणाण पंचचदुरजमे ।
परिवडिदापरिवडदे संजमसम्मत्तणाणमादीहिं ॥४॥
साहरणासाहरणे सम्मुग्घादेदरेय य णिव्वादे ।
ठिदपलियंकणिसण्णे विगयमलेपरमणाणगे वन्दे ॥५॥
पुंवेदं वेदंता जे पुरिसा खवगसेढिमारूढा ।
सेसोदयेण वि तहा ज्झाणुवजुत्ता य ते दु सिज्झंति ॥६॥
पत्तेयसयं बुद्धाबोहियबुद्धा य होंति ते सिद्धा ।
पत्तेयं पत्तेयं समये समयं पणिवदामि सदा ॥७॥
पण णव दु अट्ठवीसा चउ तियणवदीय दोण्णि पंचेव ।
बावण्णहीणबियसय पयडिविणासेण होंति ते सिद्धा ॥
अइसयमव्वाबाहं सोक्खमणंतं अणोवमं परमं ।
इन्दियविसयातीदं अप्पत्तं अच्चवं च ते पत्ता ॥९॥
लोयग्गमत्थयत्था चरमसरीरेण ते हु किंचूणा ।
गयसित्थमूसगब्भे जारिस आयार तारिसायारा ॥१०॥
जरमरणजम्मरहिया ते सिद्धा मम सुभत्तिजुत्तस्स ।
देंतु वरणाणलाहं बुहयणपरिपत्थणं परमसुद्धं ॥११॥
किच्चा काउसग्गं चउरट्ठय दोसविरहियं सुपरिसुद्धं ।
अइभत्तिसंपउत्तो जो वंदइ लहु लहइ परमसुहं ॥१२॥

अंचलिका

इच्छामि भंते ! सिद्धभत्ति काउसग्गो कओ तस्सा- लोचेउं सम्मणाणसम्मदंसणसम्मचरित्तजुत्ताणं अट्ठविह- कम्मविप्पमुक्काणं अट्ठगुणसंपण्णाणं उड्ढलोयमत्थयम्मि पयट्ठियाणं तवसिद्धाणं णयसिद्धाणं संजमसिद्धाणं अती- ताणागदवट्टमाणकालत्तयसिद्धाणं सव्वसिद्धाणं सया णिच्चकालं अंचेमि पूजेमि वन्दामि णमंस्सामि दुक्ख- क्खओ कम्मक्खओ बोहिलाओ सुगइगमणं समाहिमरणं जिणगुणसंपत्ति होउ मज्झं।

श्रुतभक्ति (प्राकृत)

सिद्धवरसासणाणं सिद्धाणं कम्मचक्कमुक्काणं।
काऊण णमुक्कारं भत्तीए णमामि अंगाइम् ॥१॥
आयारं सुदयडं ठाणं समवाय विहायपण्णत्ती।
णाणाधम्मकहाओ उवासयाणं च अज्झयणं ॥२॥
वन्दे अंतयडसं अणुत्तरदसं च पण्हवायरणं।
एयारसमं च तहा विवायसुत्तं णमंसामि ॥३॥
परियम्म सुत्तपढमाणुओय पुव्वगयचूलिया चेव।
पवरवर दिट्ठिवादं तं पंचविहं पणिवदामि ॥४॥
उप्पाय पुव्वमग्गायणीय विरियत्थिणत्थियपवादं।
णाणासच्चपवादं आदा कम्मप्पवादं च ॥५॥

पच्चक्खाणं विज्जाणुवाय कल्लाणणाम वरपुव्वं ।
पाणावायं किरियाविसालमथलोयविन्दुसारसुदं ॥६॥

दसचउदस अट्ठट्ठारस बारस तह य दोसु पुव्वेसु ।
सोलसवीसं तीसं दसमम्मिय पण्णरसवत्थू ॥७॥

एदेसिं पुव्वाणं जावदियो वत्थुसंगहो भणियो ।
सेसाणं पुव्वाणं दसदसवत्थू पणिवदामि ॥८॥

एक्केक्कम्मि य वत्थू वीसं वीसं च पाहुडा भणिया
विसमसमा वि य वत्थू सव्वे पुण पाहुडेहि समा ॥९॥

पुव्वाणं वत्थुसयं पंचाणवदी हवंति वत्थूओ ।
पाहुड तिण्णिसहस्सा णव य सया चउदसाणंपि ॥

एवमए सुदपवरा भत्तीराएण संथुया तच्चा ।
सिग्धं मे सुदलाहं जिणवरवसहा पयच्छंतु ॥११॥

अंचलिका

इच्छामि भंते ! सुदभत्ति काउस्सग्गो कओ तस्स आलोचेउं अंगोवंगपइण्णए पाहुडयपरियम्मसुत्तपढमाणिओगपुव्वगयचूलिया चेव सुत्तत्थयथुइ धम्मकहाइयं णिच्चकालं अंचेमि, पूजेमि, वन्दामि, णमंसामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइगमणं, समाहिमरणं जिणगुणसंपत्ति होउ मज्झं ।

चारित्र भक्ति (प्राकृत)

तिलोए सव्वजीवाणं हिदं धम्मोवदेसिणं ।
वड्ढमाणं महावीरं वन्दित्ता सव्ववेदिणं ॥१॥
घादिकम्मविघादत्थं घादिकम्मविणासिणा ।
भासियं भव्वजीवाणं चारित्तं पंचभेददो ॥२॥
सामाइयं तु चारित्तं छेदोवट्ठावणं तहा ।
तं परिहारविसुद्धिं च संजमं सुहुमं पुणो ॥३॥
जहाखादं तु चारित्तं तहाखादं तु तं पुणो ।
किच्चाहं पंचहाचारं मंगलं मलसोहणं ॥४॥
अहिंसादीणि उत्ताणि महव्वयाणि पंच य ।
समिदीओ तदो पंच पंच इन्दियणिग्गहो ॥५॥
छब्भेयावास भूसिज्जा अण्हाणत्तमचेलदा ।
लोयत्तं ठिदिभुत्तिं च अदंतधावणमेव य ॥६॥
एयभत्तेण संजुत्ता रिसि मूलगुणा तहा ।
दसधम्मा तिगुत्तीओ सीलाणि सयलाणि च ॥७॥
सव्वेवि य परीसहा उत्तुत्तरगुणा तहा ।
अण्णे वि भासिया संता तेसिं हाणि मए कया ॥८॥
जइ रायेण दोसेण मोहेणाणादरेण वा ।
वन्दित्ता सव्वसिद्धाणं संजदा सा मुमुक्खुणा ॥९॥
संजदेण मए सम्मं सव्वसंजमभाविणा ।
सव्वसंजमसिद्धीओ लब्भदे मुत्तिजं सुहं ॥१०॥

अंचलिका

इच्छामि भंते ! चारित्तभत्ति काउस्सग्गो कओ तस्स आलोचेउं सम्मणाणजोयस्स सम्मत्ताहिट्ठियस्स सव्वपहाणस्स णिव्वाणमग्गस्स कम्मणिज्जरफलस्स खमाहारस्स पंचमहव्वयसंपण्णस्स तिगुत्तिगुत्तस्स पंचसमिदिजुत्तस्स णाणज्झाणसाहणस्स समया इव पवेसयस्स सम्मचारित्तस्स सया अंचेमि, पूजेमि, वन्दामि, णमंसामि, दुक्खक्खओ कम्मक्खओ, बोहिलाहो, सुगइगमणं, समाहिमरणं जिणगुणसंपत्ति होउ मज्झं।

योगि भक्ति (प्राकृत)

थोस्सामि गुणधराणं अणयाराणं गुणेहि तच्चेहिं।
अंजलिमउलियहत्थो अभिवन्दंतो सविभवेण ॥१॥
सम्मं चेव य भावे मिच्छाभावे तहेव बोधव्वा।
चइऊण मिच्छभावे सम्मम्मि उवट्ठिदे वन्दे ॥२॥
दोदोसविप्पमुक्के तिदंडविरद तिसल्लपरिसुद्दे।
तिण्णियगारवरहिये तियरणसुद्दे णमंसामि ॥३॥
चउविहकसायमहणे चउगयसंसारगमण भयभीए।
पंचासवपडिविरदे पंचेंदियणिज्जिदे वन्दे ॥४॥
छज्जीवदयावण्णे छडायदणविवज्जिदे समिदभावे।
सत्त भयविप्पमुक्के सत्ताण सिवंकरे वन्दे ॥५॥

णट्ठट्ठमयट्ठाणे पणट्ठकम्मट्ठणट्ठ संसारे
परमट्ठणिट्ठियट्ठे अट्ठगुणड्ढीसरे वन्दे ॥६॥
णवबंभचेरगुत्ते णवणयसब्भावजाणगे वन्दे ।
दहविहधम्मट्ठाई दससंजमसंजदे वन्दे ॥७॥
एयारसंगसुदसायरपारगे बारसंगसुदणिउणे ।
बारसविहतवणिरदे तेरसकिरियादरे वन्दे ॥८॥
भूदेसु दयावण्णे चउदस चउदसमुगंथपरिसुद्धे ।
चउदसपुव्वयगब्भे चउदसमलविवज्जिदे वन्दे ॥९॥
वन्दे चउत्थभत्तादिजावछम्मासखवणपडिवण्णे ।
वन्दे आदावन्ते सूरस्स य अहिमुहट्ठिदे सूरे ॥१०॥
बहुविहपडिमट्ठाई णिसिज्जवीरासणेक्कवासीय ।
अणिट्ठीवकंडुवदीवे चत्तदेहे य वन्दामि ॥११॥
ठाणी मोणवदीये अब्भोवासीय रुक्खमूलीय ।
धुवकेसमंसुलोमे णिप्पडियम्मे य वन्दामि ॥१२॥
जल्लमल्ललित्तगत्ते वन्दे कम्ममलकलुसपरिसुद्धे ।
दीहणहमंसुलोमे तवसिरिभरिये णमंसामि ॥१३॥
णाणोदयाहिसित्ते सीलगुणविहूसिये तवसुगंधे ।
ववगयरायसुदड्ढे सिवगइपहणायगे वन्दे ॥१४॥
उग्गतवे दित्ततवे तत्ततवे महातवे य घोरतवे ।
वन्दामि तवमहन्ते तवसंजमइड्ढिसंपत्ते ॥१५॥
आमोसहिये खेलोसहिये जल्लोसहिये तवसिद्धे ।

विप्पोसहीये सव्वोसहीये वन्दामि तिविहेण ॥१६॥
अमयमहुखीरसप्पिसवीयअक्खिणमहाणसे वन्दे ।
मणबलिवचणबलिकायबलिणो य वन्दामि तिविहेण
वरकुट्ठबीयबुद्धी पदाणुसारीय भिण्णसोदारे ।
उग्गहईहसमत्थे सुत्तत्थविसारदे वन्दे ॥१८॥
आभिणिवोहियसुदओहिणाणिमणणाणिसव्वणाणीय
वन्दे जगप्पदीवे पच्चक्खपरोक्खणाणीये ॥१६॥
आयासतंतुजलसेढिचारणे जङ्घचारणे वन्दे ।
विउवणइड्ढिपहाणे विज्जाहरपण्णसवणे य ॥२०॥
गइचउरंगुलगमणे तहेव फलफुल्लचारणे वन्दे ।
अणुवमतवमहन्ते देवासुरवन्दिदे वन्दे ॥२१॥
जियभय जियउवसग्गे जियइंदियपरीसहे जियकसाए
जियरायदोसमोहे जियसुहदुक्खे णमंसामि ॥२२॥
एवं मयेभित्थुया अणयारा रायदोसपरिसुद्धा ।
सङ्घस्स वरसमाहिं मज्झवि दुक्खक्खयं दिंतु ॥२३॥

अंचलिका—आलोचना

इच्छामि भंते योगिभत्ति काउस्सग्गो कओतस्स आलोचेउं अड्ढाइज्जदीवदोसमुद्देसु पण्णारसकम्मभूमिसु आदावणरुक्खमूलअब्भोवासठाणमोणविरासणेक्कपासकु—क्कुडासण चउत्थपक्खखवणावियोगजुत्ताणं सव्वसाहूणं

णिच्चकालं अंचेमि, पूजेमि वन्दामि, णमंसामि, दुक्ख-क्खओ कम्मक्खओ, बोहिलाहो, सुगइगमणं समाहिमरणं जिणगुणसंपत्ति होउ मज्झं।

प्राकृत-निर्वाणभक्तिः।

अट्ठावयम्मि उसहो चंपाए वासुपुज्ज जिणणाहो।
उज्जंते णेमिजिणो पावाए णिव्वुदो महावीरो॥ १॥
वीसं तु जिणवरिंदा अमरासुरवंदिदा धुदकिलेसा।
सम्मेदे गिरिसिहरे णिव्वाण गया णमो तेसिं॥ २॥
सत्तेव य बलभद्दा जदुवणरिंदाण अट्ठकोडीओ।
गजपंथे गिरिसिहरे णिव्वाण गया णमो तेसिं॥ ३॥
वरदत्तो य वरंगो सायरदत्तो य तारवरणयरे।
आहुट्ठयकोडीओ णिव्वाण गया णमो तेसिं॥ ४॥
णेमिसामी पज्जुण्णो संबुकुमारो तहेव अणिरुद्धो।
बाहत्तरकोडीओ उज्जन्ते सत्तसया वंदे॥ ५॥
रामसुआ विण्णि जणा लाडणरिंदाण पंचकोडीओ।
पावाए गिरिसिहरे णिव्वाण गया णमो तेसिं॥ ६॥
पंडुसुआ तिण्णि जणा दविडणरिंदाण अट्ठकोडीओ।
सित्तुंजे गिरिसिहरे णिव्वाण गया णमो तेसिं॥ ७॥
रामहणूसुग्गीवो गवय गवक्खो य णील महणीलो।
णवणवदी कोडीओ तुंगीगिरिणिव्वुदे वंदे॥ ८॥

अंगाणंग कुमारा विक्खापंचद्धकोडिरिसि सहिया ।
सुवण्णगिरिमत्थयत्थे णिव्वाण गया णमो तेसिं ॥ ९ ॥
दहमुहरायस्स सुआ कोडी पंचद्धमुणिवरे सहिया ।
रेवा उहयम्मि तीरे णिव्वाण गया णमो तेसिं ॥ १० ॥
रेवाणइए तीरे पच्छिमभायम्मि सिद्धवरकूटे ।
दो चक्की दह कप्पे आहुट्ठयकोडिणिव्वुदे वंदे ॥ ११ ॥
वडवाणीवरणयरे दक्खिणभायम्मि चूलगिरिसिहरे ।
इंदजिय कुंभयण्णो णिव्वाण गया णमो तेसिं ॥ १२ ॥
पावागिरिवर सिहरे सुवण्णभद्दाइमुणिवरा चउरो ।
चलणाणईतडग्गे णिव्वाण गया णमो तेसिं ॥ १३ ॥
फलहोडीवरगामे पच्छिमभायम्मि दोणगिरिसिहरे ।
गुरुदत्ताइमुणिंदा णिव्वाण गया णमो तेसिं ॥ १४॥
णायकुमार मुणिंदो वालि महावालि चेव अज्झेया ।
अट्ठावयगिरिसिहरे णिव्वाण गया णमो तेसिं ॥ १५ ॥
अच्चलपुरवरणयरे ईसाणभाए मेढगिरिसिहरे ।
आहुट्ठय कोडीओ णिव्वाण गया णमो तेसिं ॥ १६ ॥
वंसत्थलम्मि णयरे पच्छिमभायम्मि कुंथुगिरिसिहरे ;
कुलदेसभूषणमुणी णिव्वाण गया णमो तेसिं ॥ १७ ॥
जसहररायस्स सुआ पंचसया कलिंगदेसम्मि ।
कोडिसिलाए कोडिमुणी णिव्वाण गया णमो तेसिं ॥१८॥
पासस्स समवसरणे गुरुदत्तवरदत्त पंचरिसि पमुहा ।

गिरिसिंदे गिरिसिहरे णिव्वाण गया णमो तेसिं ॥ १९ ॥
जे जिणु जित्थु तत्था जे दु गया णिव्वुदिं परमं ।
ते वंदामि य णिच्चं तियरणसुद्धो णमंसामि ॥ २० ॥
सेसाणं तु रिसीणं णिव्वाणं जम्मि जम्मि ठाणम्मि ।
ते हं वंदे सव्वे दुक्खक्खय कारणट्ठाए ॥ २१ ॥
पासं तह अहिणंदण णायद्दहि मंगलाउरे वंदे ।
अस्सारम्भे पट्टणि मुणिसुव्वओ तहेव वंदामि ॥ १ ॥
बाहूबलि तह वंदमि पोदनपुर हत्थिनापुरे वंदे ।
संती कुंथुव अरिहो वाराणसीए सुपास पासं च ॥ २ ॥
महुराए अहिछित्ते वीरं पासं तहेव वंदामि ।
जंवुमुणिंदो वंदे णिव्वुइपत्तोवि जंवुवणगहणे ॥ ३ ॥
पंचकल्लाण ठाणइ जाणिवि संजादमच्चलोयम्मि ।
मणवयणकायसुद्धो सव्वे सिरसा णमंसामि ॥ ४ ॥
अग्गलदेवं वंदमि वरणयरं णिवणकुंडली वंदे ।
पासं सिरिपुरि वंदमि लोहागिरिसंखदीवम्मि ॥ ५ ॥
गोम्मटदेवं वंदमि पंचसयं धणुहउच्चं तं ।
देवा कुणंति वुट्ठी केसर कुसुमाण तस्स उवरिम्मि ॥ ६ ॥
णिव्वाणठाण जाणिवि अइसयठाणाणि अइसये सहिया ।
संजाद मिच्चलोए सव्वे सिरसा णमंसामि ॥ ७ ॥
जो जण पढइ तियालं णिव्वुइकंडंपि भावसुद्धीए ।
भुंजदि णरसुर सुक्खं पच्छा सो लहइ णिव्वाणं ॥ ८ ॥

अंचलिका:—

इच्छामि भंते ! परिणिव्वाणभक्ति काउस्सग्गो कओ तस्सालोचेउं। इमम्मि अवसप्पिणीए चउत्थसमयस्स पच्छिमे भाए आहुट्ठ मासहीणे वासचउक्कम्मि सेसकम्मि पावाए णयरीए कत्तियमासस्स किण्हचउद्दसिए रत्तीए सादीय णक्खत्ते पच्चूसे भयवदो महदिमहावीरो वड्ढ-माणो सिद्धिं गदो, तिसुवि लोएसु भवण वासियवाणविंत-रजोयिसियकप्पवासियत्ति चउव्विहा देवा सपरिवारा दिव्वेण गंधेण, दिव्वेण पुप्फेण, दिव्वेण धूवेण दिव्वेण चुण्णेण दिव्वेण ण्हाणेण णिच्चकालं अच्चंति, पूजंति वंदंति, णमंसंति, परिणिव्वाणमहाकल्लाण पुज्जं करेंति अहमवि इह सन्तो तत्थ संताइं णिच्चकालं अंचेमि, पूजेमि, वंदामि, णमंसामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइगमणं, समाहिमरणं, जिणगुणसंपत्ति होउ मज्झं।

ईर्यापथ शुद्धि (दर्शनस्तोत्र)

निःसंगोऽहं जिनानां सदनमनुपमं त्रिःपरीत्येत्य भक्त्या
स्थित्वा गत्वा निषद्योच्चरणपरिणतोऽन्तःशनैर्हस्तयुग्मं ॥
भाले संस्थाप्य बुद्ध्या मम दुरितहरं कीर्तये शक्रवन्द्यं ।
निंदादूरं सदाप्तं क्षयरहितममुं ज्ञानभानुं जिनेन्द्रम् ।१।

श्रीमत्पवित्रमकलंकमनंतकल्पं
स्वायंभुवं सकलमंगलमादितीर्थं ।
नित्योत्सवं मणिमयं निलयं जिनानां,
त्रैलोक्यभूषणमहं शरणं प्रपद्ये ॥ २ ॥

श्रीमत्परमगंभीरस्याद्वादामोघलाञ्छनं
जीयात्त्रैलोक्यनाथस्य शासनं जैनशासनं ॥ ३ ॥

श्रीमुखालोकनादेव श्रीमुखालोकनं भवेत ।
आलोकनविहीनस्य तत्सुखावाप्तयः कुतः ॥ ४ ॥

अद्याभवत् सफलता नयन द्वयस्य,
देव ! त्वदीयचरणांबुजवीक्षणेन ।
अद्य त्रिलोकतिलक ! प्रतिभासते मे,
संसारवारिधिरयं चुलुकप्रमाणं ॥ ५ ॥

अद्य मे क्षालितं गात्रं नेत्रे च विमलीकृते,
स्नातोऽहं धर्मतीर्थेषु जिनेन्द्र ! तव दर्शनात् ॥६॥

नमो नमः सत्त्वहितंकराय, वीराय भव्यांबुज-भास्कराय ।
अनंतलोकाय सुरार्चिताय, देवाधिदेवाय नमो जिनाय ।७।

नमो जिनाय त्रिदशार्चिताय, विनष्टदोषाय गुणार्णवाय
विमुक्तमार्ग प्रतिबोधनाय देवाधिदेवाय नमो जिनाय ।८।

देवाधिदेव ! परमेश्वर ! वीतराग !
सर्वज्ञ ! तीर्थंकर सिद्ध महानुभाव !
त्रैलोक्यनाथ ! जिनपुंगव ! वर्धमान
स्वामिन् ! गतोऽस्मि शरणं चरणद्वयं ते ॥ ९ ॥

जितमदहर्षद्वेषा जितमोहपरीषहा जितकषायाः ।
जितजन्ममरणरोगा जितमात्सर्या जयंतु जिनाः ॥१०॥

जयतु जिनवर्धमानस्त्रिभुवनहितधर्मचक्रनीरजबंधुः ।
त्रिदशपतिमुकुटभासुरचूडामणिरश्मिरंजितारुणचरणः ॥

जय जय जय त्रैलोक्यकाण्डशोभिशिखामणे !
नुद नुद नुद स्वांतध्वांतं जगत्कमलार्क नः ॥
नय नय नय स्वामिन् शांतिं नितांतमनन्तिमा
नहि नहि नहि त्राता लोकैकमित्र भवत्परः ॥ १२॥

चित्ते मुखे शिरसि पाणिपयोजयुग्मे,
भक्तिं स्तुतिं विनतिमञ्जलिमञ्जसैव ।
चेक्रीयते चरिकरीति चरीकरीति ।
यश्चर्करीति तव देव ! स एव धन्यः ॥ १३ ॥

जन्मोन्माद्यं भजतु भवतः पादपद्मं न लभ्यं,
तच्चेत्स्वैरं चरतु न च दुर्देवतां सेवतां सः ॥

अश्नात्यन्नं यदिह सुलभं दुर्लभं चेन्मुधास्ते
क्षुद्व्यावृत्यै कवलयति कः कालकूटं बुभुक्षुः ॥१४॥

रूपं ते निरुपाधि सुन्दरमिदं पश्यन् सहस्रेक्षणः
प्रेक्षाकौतुककारि कोत्र भगवन्नोपैत्यवस्थांतरं ।
वाणीं गद्गदयन् वपुः पुलकयन् नेत्रद्वयं स्रावयन् ।
मूर्द्धानं नमयन् करौ मुकुलयंश्चेतोपि निर्वापयन् ॥ १५ ॥

त्रस्ताराति रिति त्रिकालविदिति त्राता त्रिलोक्या इति ।
श्रेयःसूतिरिति श्रियां निधिरिति श्रेष्ठः सुराणामिति ॥
प्राप्तोऽहं शरणं शरण्यमगतिस्त्वां तत्त्यजोपेक्षणं ।
रक्ष क्षेमपदं प्रसीद जिन ! किं विज्ञापितैर्गोपितैः । १६ ।

त्रिलोकराजेन्द्रकिरीटकोटि–
प्रभाभिरालीढपदारविंदं ।
निर्मूलमुन्मूलितकर्मवृक्षं–
जिनेन्द्रचन्द्रं प्रणमामि भक्त्या ॥ १७ ॥

करचरणतनुविघातादटतो निहतः प्रमादतः प्राणी ।
ईर्यापथमिति भीत्या मुञ्चे तद्दोषहान्यर्थं ॥

ईर्यापथे प्रचलताद्य मया प्रमादा–
देकेन्द्रियप्रमुखजीवनिकायबाधा ।
निर्वर्तिता यदि भवेदयुगांतरेक्षा–
मिथ्या तदस्तु दुरितं गुरुभक्तितो मे ।

इति स्तोत्रम्

चारित्र भक्तिकी अंचलिका

इच्छामि भंते ! चारित्तभत्तिकाउस्सग्गो कओ तस्स आलोचेउं । सम्मणाणजोयस्स सम्मत्ताहिट्ठियस्स सव्व-पहाणस्स णिव्वाणमग्गस्स कम्मणिज्जरफलस्स खमाहारस्स पंचमहव्वयसंपण्णस्स तिगुत्तिगुत्तस्स पंचसमिदिजुत्तस्स णाणज्झाणसाहणस्स समया इव पवेसयस्स सम्मचारित्तस्स सया णिच्चकालं अंचेमि, पूजेमि, वंदामि, णमंसामि, दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं, समाहिमरणं, जिणगुणसंपत्ति होउ मज्झं ।

समाधिभक्ति:

स्वात्माभिमुखसंवित्तिलक्षणं श्रुतचक्षुषा ।
पश्यन् पश्यामि देव त्वां केवलज्ञानचक्षुषा ॥१॥

शास्त्राभ्यासो जिनपतिनुतिः संगतिः सर्वदार्यैः ।
सद्वृत्तानां गुणगणकथा दोषवादे च मौनम् ॥
सर्वस्यापि प्रियहितवचो भावना चात्मतत्त्वे ।
संपद्यन्तां मम भवभवे यावदेतेऽपवर्गः ॥ २ ॥

जैनमार्गरुचिरन्यमार्गनिर्वेगता जिनगुणस्तुतौ मतिः ।
निष्कलंक विमलोक्तिभावनाः संभवं तु मम जन्मजन्मनि ॥

गुरुमूले यतिनिचिते चैत्यसिद्धांतवार्धिसद्घोषे ।
मम भवतु जन्मजन्मनि सन्यासनसमन्वितं मरणं ॥४॥

जन्मजन्मकृतं पापं जन्मकोटिसमार्जितम् ।
जन्ममृत्युजरामूलं हन्यते जिनवंदनात् ॥ ५ ॥

आबाल्याज्जिनदेवदेव ! भवतः श्रीपादयोः सेवया ।
सेवासक्तविनेयकल्पलतया कालोद्ययावद्गतः ।
त्वां तस्याः फलमर्थये तदधुना प्राणप्रयाणक्षणे ।
त्वन्नामप्रतिबद्धवर्णपठने कण्ठोऽस्त्वकुण्ठो मम ॥६॥

तव पादौ मम हृदये मम हृदयं तव पदद्वये लीनं ।
तिष्ठतु जिनेन्द्र ! तावद्यावन्निर्वाणसंप्राप्तिः ॥७॥

एकापि समर्थेयं जिनभक्तिर्दुर्गतिं निवारयितुं ।
पुण्यानि च पूरयितुं दातुं मुक्तिश्रियं कृतिनः ॥

पंच अरिंजयणामे पंच य मदिसायरे जिणे वन्दे ।
पंच जसोयरणामे पंचस्मिय मंदरे वंदे ॥९॥

रयणत्तयं च वन्दे चव्वीसजिणे च सव्वदा वन्दे ।
पंचगुरूणां वन्दे चारणचरणं सदा वन्दे ॥१०॥

अर्हमित्यक्षरब्रह्मवाचकं परमेष्ठिनः ।
सिद्धचक्रस्य सद्बीजं सर्वतः प्रणिदध्महे ॥११॥

कर्माष्टकविनिर्मुक्तं मोक्षलक्ष्मीनिकेतनं ।
सम्यक्त्वादिगुणोपेतं सिद्धचक्रं नमाम्यहम् ॥१२॥

आकृष्टिं सुरसंपदां विदधते मुक्तिश्रियो वश्यता–
मुच्चाटं विपदां चतुर्गतिभुवां विद्वेषमात्मैनसाम् ।

स्तंभं दुर्गमनं प्रति प्रयततो मोहस्य संम्मोहनम् ।
पायात्पंचनमस्क्रियाक्षरमयी माराधनादेवता ॥१३॥
अनंतानंतसंसारसंततिच्छेदकारणं ।
जिनराजपदाम्भोजस्मरणं शरणं मम ॥१४॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष जिनेश्वर ॥१५॥
नहि त्राता नहि त्राता नहि त्राता जगत्त्रये ।
वीरागात्परो देवो न भूतो न भविष्यति ॥ १६ ॥
जिने भक्तिर्जिने भक्तिर्जिने भक्तिर्दिने दिने ।
सदा मेऽस्तु सदा मेऽस्तु सदा मेऽस्तु भवे भवे ॥ १७ ॥
याचेहं याचेऽहं जिन तव चरणारविंदयोर्भक्तिम् ।
याचेहं याचेहं पुनरपि तामेव तामेव ॥ १८ ॥
